12. श्रीमन् मित्रमिश्रविरचितायाः आनन्दकन्दचम्पूकाव्यस्य व्याख्यायाः गूडार्थदीपिकाटीकायाः मातृकापरिचयः — 83-90
–श्रीनारायणस्वामि एस्. एस्. (बेङ्गळूरु)

13. **ನೂತನ ರಾಷ್ಟ್ರೀಯ ಶಿಕ್ಷಣ ನೀತಿ, ನವ ಭಾರತ ನಿರ್ಮಾಣದೆಡೆ ದೃಢ ಹೆಜ್ಜೆ.........** — 91-94
–डा. रवीन्द्र कृष्ण भट्ट, सूरि (हेगडे)

14. व्यासकृतिपरिचयः — 95-104
–डा. नारायण पूजार (तिरुपति)

15. वेदागमोपनिषत्सु वीरशैवसिद्धान्तस्य प्रागलभ्यम् — 105-110
–मल्लिकार्जुन के. बि. (मैसूरु)

16. भाष्यकारमते तत्त्वमसिवाक्ये शक्त्यैव अभेदान्वयस्य निर्वाहः — 111-112
–डा. श्रीधर भट्ट ऐनकै (मैसूरु)

17. प्रस्थानत्रयतत्त्वदर्शी कालिदासः — 113-122
–शिवप्प एच्. (बेङ्गळूरु)

18. जैनाराधनामण्डलानाम् एकमध्ययनम् — 123-133
–विदुषी तेजस्विनी डि. (मैसूरु)

19. संशयः — 134-141
–डा. भास्करभट्टः जोशि (बेङ्गळूरु)

EDITORIAL ADVISORY BOARD MEMBER'S LIST — 142-143

********

ISSN 2250-1711

॥ सत्यं ज्ञानमनन्तम् ॥

# JOURNAL OF VEDA SAMSKRITA ACADEMY

**A NATIONAL PEER-REVIEWED RESEARCH JOURNAL**

**मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका**

VOLUME: XVI
July to December - 2020

Chief-Editor :
**DR. GOPALKRISHNA HEGDE**
[Jyotishashastra-Dharmashastra Vidwan]

VEDA SAMSKRITA ACADEMY (R.)
[Formerly: Veda Samskrita Prasarinee Sabha]
[No.: DR : SOR : 108 : 2003-04 Dated : 30-10-2003]

Title of the Journal : **Journal of Veda Samskrita Academy**
A National Peer-Reviewed Research Journal

**मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका**

**ISSN** : **2250-1711**

Editor & Publisher : **Dr. Gopalkrishna Hegde**
gopalkrishnh9@gmail.com
08386-260135
09741847399

Director,
Veda Samskrita Academy (Regd.)
Kalkod Road, HEGDE- 581330
Kumta, Uttara Kannada, Karnataka

web site : www.vedasamskritaacademy.org
E-mail : vedasmkac@gmail.com

All rights are Reserved with the Publisher
" All opinion / views expressed in the research papers are of the authors only, no way they are ascribed to the Academy"

Languages : Samskrita, Kannada, English,Hindi

Imprint : Volume XVI
July to December – 2020

Paper : 70gsm (B2B) and Art paper – 300gsm
Size of the Journal : 21 X 14 cm
Number of Pages : 143 + 12 + 4 (colour page)
Number of Copies : 100
D. T. P. : Pavan Graphics, Hegde
Art works : Girish R. Bhat, Digital World
Printing & Binding : Shri Krishna Mudranalaya, Hegde

**Price : Rs. 200 /- per volume**



## विषयसूची

| | | |
|---|---|---|
| | सम्पादकीयम् | V |
| | Prolouge | VI-VII |
| | **ಮೊದಲ ಮಾತು** | IX-XII |
| 1. | आश्रमधर्माणां सृष्टिपोषकत्वचिन्तनम्<br>–डा. वेङ्कटरमण हेगडे (मैसूरु) | 1-9 |
| 2. | भागवतमहापुराणे जलस्रोतसां विचारः<br>–विघ्नेश शर्मा के. वि. (मङ्गळूरु) | 10-17 |
| 3. | सिद्धान्तशिखामणिग्रन्थोक्तरीत्या सकाय–अकाय–परकायस्थल विषयनिरूपणम्<br>–विद्वान् डा. के. एम्. महदेवय्यः (मैसूरु) | 18-23 |
| 4. | भरतमुनिकृतम् अष्टरसवर्णनम्<br>–डा. रेखादेवि एस्. एच्. (बेङ्गळूरु) | 24-29 |
| 5. | शक्तिविशिष्टाद्वैतसिद्धान्तानुसारेण मुण्डकोपनिषदुक्तरीत्या गुरुस्वरूपमहत्त्वप्रतिपादनम्<br>–चन्द्रशेखरय्यः (बेङ्गळूरु) | 30-37 |
| 6. | पौष्करागमविद्यापादोक्तरीत्या पतिविषयप्रतिपादनम्<br>–एस्. पि. दयानन्दः (मैसूरु) | 38-46 |
| 7. | शङ्करनारायणविरचिततन्त्रदर्पणाभिधानवार्षिकतन्त्रव्याख्याने पाताः<br>–राधाकृष्ण बि. (तिरुपति) | 47-55 |
| 8. | ಪಾಣಿನೀಯ ವ್ಯಾಕರಣದಲ್ಲಿ ಸುಬರ್ಥಗಳು<br>–प्रो. सुब्राय नागप्प भट्ट (धारवाड) | 56-63 |
| 9. | व्याकरणे शब्दवृत्तयः<br>–डा. अनुपमा बि. (बेङ्गळूरु) | 64-68 |
| 10. | साङ्ख्यदर्शने मोक्षस्वरूपम्<br>–डा. एस्. एस्. निरञ्जनमूर्ति (तुमकूरु) | 69-73 |
| 11. | कुमारसम्भवस्य पञ्चमाध्याये पार्वती<br>–विदुषी सावित्री पूजारि (बेङ्गळूरु) | 74-82 |

ವೇದಾಂತಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದಾಗಿದ್ದು ಚೆನ್ನಾಗಿ ಮೂಡಿ ಬಂದಿವೆ.

* ಬೆಂಗಳೂರಿನ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಡಾ. ರೇಖಾದೇವಿ ಎಸ್. ಎಚ್. ರವರ **"भरतमुनिकृतम् अष्टरसवर्णनम्"** ಎನ್ನುವ ಲೇಖನ ಅಲಂಕಾರಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದು ಚೆನ್ನಾಗಿದೆ.

* ತಿರುಪತಿಯ ರಾಷ್ಟ್ರಿಯ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಸಂಶೋಧನಾ ಛಾತ್ರರಾಗಿರುವ ರಾಧಾಕೃಷ್ಣ ಬಿ. ಯವರ **"शङ्कनारायणविरचिततन्त्रदर्पणाभिधानवार्षिकतन्त्र–व्याख्याने पाताः"** ಎನ್ನುವ ಲೇಖನದಲ್ಲಿ ಜ್ಯೋತಿಷಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ ವಿಷಯವು ಚೆನ್ನಾಗಿ ಪ್ರತಿಪಾದಿತವಾಗಿದೆ.

* ಬೆಂಗಳೂರಿನ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಡಾ. ಅನುಪಮಾ ಬಿ. ಯವರ **"व्याकरणे शब्दवृत्तयः"** ಎನ್ನುವ ಲೇಖನ ಮತ್ತು ಧಾರವಾಡದ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಸಂಶೋಧನಾ ಛಾತ್ರರಾಗಿರುವ ಪ್ರೊ. ಸುಬ್ರಾಯ ನಾಗೇಶ ಭಟ್ಟರ "ಪಾಣಿನೀಯ ವ್ಯಾಕರಣದಲ್ಲಿ ಸುಬರ್ಥಗಳು" ಎನ್ನುವ ಲೇಖನ ವ್ಯಾಕರಣಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದು ಚೆನ್ನಾಗಿದೆ.

* ತುಮಕೂರಿನ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ಪ್ರಾಂಶುಪಾಲರಾಗಿರುವ ಡಾ. ಎಸ್. ಎಸ್. ನಿರಂಜನಮೂರ್ತಿಯವರ **"साङ्ख्यदर्शने मोक्षस्वरूपम्"** ಎನ್ನುವ ಲೇಖನ ಸಾಂಖ್ಯಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದಾಗಿದ್ದು ಚೆನ್ನಾಗಿದೆ ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಅತ್ಯಂತ ಉಪಕಾರಿ ಆಗಿದೆ.

* ಬೆಂಗಳೂರಿನ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ವಿದುಷೀ ಸಾವಿತ್ರಿ ಪೂಜಾರಿಯವರ **"कुमारसम्भवस्य पञ्चमाध्याये पार्वती"'** ಮತ್ತು ಶ್ರೀಶಿವಪ್ಪ ಎಚ್. ರವರ **"प्रस्थानत्रयतत्त्वदर्शी कालिदासः"** ಎನ್ನುವ ಲೇಖನ ಮಹಾಕಾವ್ಯಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದು ಚೆನ್ನಾಗಿದೆ.

* ಬೆಂಗಳೂರಿನ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಶ್ರೀ ನಾರಯಣ ಸ್ವಾಮಿಯವರ **"श्रीमन्मित्रमिश्रविरचितायाः आनन्दकन्दचम्पूकाव्यस्य व्याख्यायाः गूडार्थ–दीपिकाटीकायाः मातृकापरिचयः"** ಎನ್ನುವ ಲೇಖನ ಹಸ್ತಪ್ರತಿಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದು ಚೆನ್ನಾಗಿದೆ.

* ನಮ್ಮ ಅಕಾಡೆಮಿಯ ಎಡ್ವೈಸರಿ ಬೋರ್ಡಿನ ಸದಸ್ಯರಲ್ಲಿ ಒಬ್ಬರಾಗಿರುವ ಡಾ. ರವೀಂದ್ರ ಕೃಷ್ಣ ಭಟ್ಟ ಸೂರಿಯವರ "ನೂತನ ರಾಷ್ಟ್ರೀಯ ಶಿಕ್ಷಣ ನೀತಿ, ನವ ಭಾರತ ನಿರ್ಮಾಣದೆಡೆ ದೃಢ ಹೆಜ್ಜೆ..........." ಎನ್ನುವ ಲೇಖನ ಶಿಕ್ಷಣಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದಾಗಿದ್ದು ಸಂಗ್ರಹಯೋಗ್ಯವಾಗಿದೆ.

* ಮೈಸೂರಿನ ಮಹಾರಾಜಾ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ಅದ್ವೈತ ವೇದಾಂತ ಶಾಸ್ತ್ರ



# सम्पादकीयम्

अथ विदितचरमेवैतत् सारस्वतलोकनिपुणानां तत्रभवतां यत् **"मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका"** संशोधनकर्मणि निरतानां नितराम् उपकरोतीति ।

विभिन्नेषु विश्वविद्यालयेषु अन्यान्यभाषामवलम्ब्य संशोधनं कुर्वतां स्वस्वविषयसम्बद्धलेखानां प्राप्तार्हतायां पत्रिकायां प्रकटनम् अनिवार्यमिति च ।

नियमश्चैषः विश्वविद्यालयानुदानायोगेन (UGC) 2009 तमे वर्षे परि–ष्कृतनियमेष्वन्यतमः ।

वेद–वेदाङ्ग–दर्शन–पुराण–इतिहास–काव्य–नाटक–शिक्षण–शास्त्रादि सम्बद्धानाम् आङ्ग्ल–हिन्दी–कन्नड–संस्कृताद्यन्यतमभाषया उपनिबद्धानां लेखानां प्रकटनाय **"वेदसंस्कृत–अकाडेमी (रि.)"** इत्याख्या संस्था **NISCAIR** संस्थया **ISSN** सङ्ख्याप्रदानेन मुद्राङ्किता संशोधनपत्रिका प्रकटनकर्मणि बद्धादरेति निश्चप्रचम् ।

**"वेदसंस्कृत–अकाडेमी (रि.)"** द्वारा **"मूल्याङ्किता राष्ट्रियसंशोधन–पत्रिका"** नाम्ना प्राकट्यं नीतासु च पत्रिकासु उपशतं लेखनानि प्राकाश्यन्त । पत्रिकाश्च लेखकानां हस्तङ्गता इति आत्मानं धन्यं मन्यामहे ।

अस्यां च प्रचिकटयिषितायां षोडशसम्पुटे लौकिकालौकिकविषय–सम्बद्धानि **एकोनविंशतिलेखनानि** प्राकट्यमर्हन्तीति महत् प्रमोदस्थानमिदम् । प्रयत्नोऽयं लेखप्रदानेन भवद्भिः सफलीक्रियत इति विश्वसिमः ।

दिनाङ्कः : ०८–०२–२०२१

भवदीयः,
सम्पादकः
[सम्पादकमण्डलीपरतः]

********

# ಮೊದಲಮಾತು

**2011** ರಲ್ಲಿ ತಿರುಪತಿಯಲ್ಲಿ ಶ್ರೀವೇಂಕಟೇಶ್ವರನ ದಿವ್ಯ ಸನ್ನಿಧಿಯಲ್ಲಿ ಮಿತ್ರವರ್ಯರಾದ ಪ್ರೊ. ವಿರೂಪಾಕ್ಷ ಜಡ್ಡಿಪಾಲರವರ ದೂರದರ್ಶಿತ್ವದ ಫಲಸ್ವರೂಪವಾಗಿ ಮೂಡಿಬಂದ "ಜರ್ನಲ್ ಆಫ್ ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿ" ಎನ್ನುವ ಈ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆ **2013** ರಲ್ಲಿ ತನ್ನ ಕಾರ್ಯವನ್ನು ಪ್ರಾರಂಭಿಸಿತು. **2020** ಕ್ಕೆ **8** ವರ್ಷ ಕಳೆದು, ಪ್ರಾಯಪ್ರಬುದ್ಧವಾಗಿ ನಿಂತು ಸಂಶೋಧನಾ ಕ್ಷೇತ್ರದಲ್ಲಿ ಮೈಲುಗಲ್ಲಾಗಿ ನಿಂತಿದೆ ಎಂದು ಹೇಳಲು ತುಂಬಾ ಹೆಮ್ಮೆ ಎನಿಸುತ್ತಿದೆ. ಇದಕ್ಕೆ ನಮ್ಮ ಎಡ್ವೈಸರಿ ಬೋರ್ಡಿನ ಎಲ್ಲಾ ಸದಸ್ಯರ ನಿಸ್ವಾರ್ಥ ಪರಿಶ್ರಮ ಈ ಹಂತಕ್ಕೆ ಬಂದು ನಿಲ್ಲಲು ಕಾರಣವಾಗಿದೆ ಎನ್ನುವುದು ನಿತ್ಯ ಸತ್ಯವಾಗಿದೆ. ಇದರೊಟ್ಟಿಗೆ ಲೇಖನವನ್ನು ನೀಡಿದ ಎಲ್ಲಾ ಸಂಶೋಧನಾ ವಿದ್ಯಾರ್ಥಿಗಳ ಭಾಗವನ್ನೂ ಮರೆಯುವಂತಿಲ್ಲ. ಈ ಪ್ರಕಾಶನಾ ಕಾರ್ಯದಲ್ಲಿ ಸಹಕರಿಸಿದ ಎಲ್ಲರನ್ನೂ ಕೃತಜ್ಞತಾ ಪೂರ್ವಕ ಸ್ಮರಿಸುತ್ತೇನೆ ಮತ್ತು ಅಭಿನಂದಿಸುತ್ತೇನೆ.

ನಮ್ಮ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯ **15** ನೇ ಸಂಪುಟವನ್ನು ಶ್ರೀಸ್ವರ್ಣವಲ್ಲಿ ಮಠದಲ್ಲಿ ಇತ್ತೀಚಿಗೆ ನಡೆದ ಶ್ರೀ ಶಾಂಕರಸರಸ್ವತೀ ಮಂಗಲಮಹೋತ್ಸವ ಸಂದರ್ಭದಲ್ಲಿ ಶ್ರೀ ಶ್ರೀಮದ್ ಗಂಗಾಧರೇಂದ್ರ ಸರಸ್ವತೀ ಮಹಾಸ್ವಾಮಿಗಳವರು ಲೋಕಾರ್ಪಣೆ ಗೊಳಿಸಿದರು. ಈ ಸಮಾರಂಭದಲ್ಲಿ ನಮ್ಮ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಮಾನ್ಯ ಕುಲಪತಿಗಳಾದ ಪ್ರೊ. ಕೆ. ಇ. ದೇವನಾಥನ್ ರವರ ಉಪಸ್ಥಿತಿಯಲ್ಲಿ ಲೋಕಾರ್ಪಣೆಗೊಂಡಿದೆ ಎಂದು ಹೇಳಲು ಸಂತೋಷವೆನಿಸುತ್ತದೆ. ಇದು ನಮ್ಮ ಅಕಾಡೆಮಿಯ ಮಹತ್ ಸೌಭಾಗ್ಯ ಎಂದು ಭಾವಿಸುತ್ತೇನೆ. ಯಾಕೆಂದರೆ ನಮ್ಮ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಗೆ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದಿಂದ ಮಾನ್ಯತೆ ಸಿಕ್ಕ ಕೆಲವೇ ದಿನಗಳಲ್ಲಿ ಮಾನ್ಯ ಕುಲಪತಿಗಳ ಸಮಕ್ಷಮದಲ್ಲಿ ಲೋಕಾರ್ಪಣೆಗೊಂಡಿರುವುದು ದೈವ ಸಂಕಲ್ಪ.

ದಿವ್ಯ ಮಂತ್ರಾಕ್ಷತೆಯನ್ನು ನೀಡುವ ಘಳಿಗೆಯಲ್ಲಿ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯ ಕುರಿತಾಗಿ ಮೆಚ್ಚುಗೆಯ ಆಶೀರ್ವಾದವನ್ನು ನೀಡಿದರು. "ವರ್ಧತಾಮ್ ಅಭಿವರ್ಧತಾಮ್" ಎಂದು ಹರಸಿದರು.

ಇದೇ ಸಂದರ್ಭದಲ್ಲಿ ಇನ್ನೊಂದು ಮಹತ್ತ್ವದ ವಿಷಯವನ್ನು ತಮ್ಮ ಮುಂದೆ ಪ್ರಸ್ತಾಪಿಸುತ್ತಿದ್ದೇನೆ. ನಮ್ಮ ಅಕಾಡೆಮಿಯ ಕಾರ್ಯಪರಿಷತ್ತಿನ ಸದಸ್ಯರಲ್ಲಿ ಒಬ್ಬರಾದ ಡಾ. ರವೀಂದ್ರ ಕೃಷ್ಣ ಭಟ್ಟ, ಸೂರಿ ಯವರಿಗೆ **2020** ನೇ ಸಾಲಿನಲ್ಲಿ ಜಿಲ್ಲಾ ಮಟ್ಟದ "ಉತ್ತಮಶಿಕ್ಷಕ" ಪ್ರಶಸ್ತಿ ಮತ್ತು ರಾಜ್ಯ ಮಟ್ಟದ "ಉತ್ತಮಶಿಕ್ಷಕ" ಪ್ರಶಸ್ತಿ ಪ್ರಾಪ್ತವಾಗಿದೆ.



ಪ್ರಾಥಮಿಕ ಶಾಲಾ ದೈಹಿಕ ಶಿಕ್ಷಕ ಸಂಘದ ರಾಜ್ಯಾಧ್ಯಕ್ಷರಾಗಿಯೂ, ಉತ್ತರಕನ್ನಡ ಜಿಲ್ಲಾ ಪ್ರಾಥಮಿಕಶಾಲಾ ಶಿಕ್ಷಕ ಸಂಘದ ಅಧ್ಯಕ್ಷರಾಗಿಯೂ ಚುನಾವಣೆಯಲ್ಲಿ ನಿರ್ವಾಚಿತರಾಗಿದ್ದಾರೆ. ಒಂದೇ ಶೈಕ್ಷಣಿಕ ಸಾಲಿನಲ್ಲಿ ಇಷ್ಟೆಲ್ಲಾ ಪ್ರಶಸ್ತಿಗಳನ್ನು ತನ್ನದಾಗಿಸಿಕೊಂಡು ಹೊಸದಾದ ಒಂದು ಇತಿಹಾಸವನ್ನೇ ಸೃಷ್ಟಿಸಿದ್ದಾರೆ ಎನ್ನುವುದು ಗಮನಾರ್ಹವಾದ ವಿಷಯವಾಗಿದೆ.

ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಅಕಾಡೆಮಿಯು ದಿನಾಂಕ : **27-12-2020** ರವಿವಾರದಂದು ಅಕಾಡೆಮಿಯ ಪ್ರಾಂಗಣದಲ್ಲಿ ಅವರನ್ನು ಗೌರವಪೂರ್ವಕ ಸಮ್ಮಾನಿಸಲಾಯಿತು. ಇಡಗುಂಜಿಯ ಲೋಕವಿಖ್ಯಾತ ಶ್ರೀಸಿದ್ಧಿವಿನಾಯಕ ದೇವಸ್ಥಾನದ ಮುಖ್ಯ ಟ್ರಸ್ಟಿಗಳಾದ ಡಾ. ಜಿ. ಜಿ. ಸಭಾಹಿತರು ಮತ್ತು ಬೈಲೂರಿನ ಖ್ಯಾತ ಜ್ಯೋತಿರ್ವಿದ್ವಾಂಸರಾದ ನೀಲಕಂಠ ಯಾಜಿಗಳು ಹಾಗೂ ನೂರಾರು ಸಮಾಜ ಬಾಂಧವರ ಉಪಸ್ಥಿತಿಯಲ್ಲಿ ಈ ಸಮ್ಮಾನ ನಡೆದಿರುವುದು ಒಂದು ವಿಶೇಷವಾಗಿದೆ.

ಪ್ರಕೃತ ಈ **16** ನೇ ಸಂಪುಟದಲ್ಲಿ ಒಟ್ಟೂ **19** ಲೇಖನಗಳನ್ನು ಪ್ರಕಟಿಸುತ್ತಾ ಇದ್ದೇವೆ.

* ಮೈಸೂರಿನ ಮಹಾರಾಜಾ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ಧರ್ಮಶಾಸ್ತ್ರ ಪ್ರಾಧ್ಯಾಪಕ ರಾಗಿರುವ ಪ್ರೊ. ವೆಂಕಟರಮಣ ಹೆಗಡೆಯವರ "आश्रमधर्माणां सृष्टिपोषकत्वचिन्तनम्" ಎಂಬ ಲೇಖನ ಧರ್ಮಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದಾಗಿದ್ದು, ಸಂಗ್ರಹಯೋಗ್ಯವಾಗಿದೆ.

* ಮಂಗಳೂರು ವಿಶ್ವವಿದ್ಯಾಲಯದ ಸಂಶೋಧನಾ ಛಾತ್ರರಾಗಿರುವ ವಿಘ್ನೇಶ ಶರ್ಮಾ ಕೆ. ವಿ. ಯವರ "भागवतमहापुराणे जलस्रोतसां विचारः" ಎನ್ನುವ ಲೇಖನ ಚೆನ್ನಾಗಿ ಮೂಡಿ ಬಂದಿದೆ.

* ಮೈಸೂರಿನ ಮಹಾರಾಜಾಸಂಸ್ಕೃತಕಾಲೇಜಿನ ಪ್ರಾಂಶುಪಾಲರಾದ ಮತ್ತು ಶಕ್ತಿ-ವಿಶಿಷ್ಟಾದ್ವೈತವೇದಾಂತದ ಪ್ರಾಧ್ಯಾಪಕರಾಗಿರುವ ವಿದ್ವಾನ್ ಡಾ. ಕೆ.ಎಮ್.ಮಹದೇವಯ್ಯ ನವರ "सिद्धान्तशिखामणिग्रन्थोक्तरीत्या सकाय-अकाय-परकायस्थलविषयनिरूपणम्" ಎನ್ನುವ ಲೇಖನ ಚೆನ್ನಾಗಿದೆ. ಮತ್ತು ಬೆಂಗಳೂರಿನ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಸಂಶೋಧನಾ ಛಾತ್ರರಾಗಿರುವ ಚಂದ್ರಶೇಖರಯ್ಯನವರ "शक्तिविशिष्टाद्वैतसिद्धान्ता- नुसारेण मुण्डकोपनिषदुक्तरीत्या गुरुस्वरूपमहत्त्वप्रतिपादनम्" ಎಂಬ ಲೇಖನ ಮತ್ತು ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾಲಯದ ಸಂಶೋಧನಾ ಛಾತ್ರರಾಗಿರುವ ಎಸ್. ಪಿ. ದಯಾನಂದರವರ "पौष्करागमविद्यापादोक्तरीत्या पतिविषयप्रतिपादनम्" ಎನ್ನುವ ಲೇಖನ ಮತ್ತು ಅದೇ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಮಲ್ಲಿಕಾರ್ಜುನ ಕೆ. ಬಿ. ಯವರ "शिवाद्वैतमञ्जरीग्रन्थे प्रतिपादित-विषयाणां विमर्शात्मकमध्ययनम्" ಎಂಬ ಲೇಖನ ಶಕ್ತಿವಿಶಿಷ್ಟಾದ್ವೈತ

**Shastra Vidwan Shri Neelakantha Yaji** was the guestof honour.

We are publishing **nineteen** research articles in this sixteenth volume. As usual articles related to **धर्मशास्त्रम्, शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्, ज्योतिषशास्त्रम्, व्याकरणशास्त्रम्, अलङ्कारशास्त्रम्, साङ्ख्यदर्शनम्, महाकाव्यम्, हस्तप्रतिशास्त्रम्, नूतनशिक्षणशास्त्रम्, द्वैतवेदान्तशास्त्रम्, अद्वैतवेदान्तशास्त्रम्** etc. have been included in the present volume.

Honourable members of editorial bord especially **Prof. N. Laxminarayana Bhat**, Principal of Samskrita College, Udupi, **Prof. Ramachandra Bhat**, Rtd. Principal of Samskrita College, Ummachagi, **Prof. Shankar Nagesh Bhat**, Balegadde H.O.D. Adwita Vedanta of Shree Swarnavalli Samskrita College, **Prof. Venkataramana Hegde**, of Samskrita College, Mysuru, **Dr. U. G. Shastri**, Rtd. Principal of Dr. A.V. Baliga College of Arts & Science, Kumta and **Dr. Gopal Nagesh Bhat**, Assit. Prof. of Samskrita College, Ummachagi have rendered their valuable service in editing these articles. We are greatful to all these dignitaries for their co-operation and service.

We are greatful to **Kumar Pavan Hegde** for his timely DTP work. Similarly our hearty gratitude to **Shri Girish R. Bhat**, who has designed the cover-page beautifully and our thanks to Pavan Grophecs and Shree Krishna Mudranalaya, Hegde.

Research sgholars and in-service teachers, specially M. Phil and Ph. D. researchers may send their articles to the Academy. Research articls accepted by the Editoeial Board will be published in the journal. Thus, the Veda Samskrita Academy which is funationing in a rural area may be encouraged by sending valuable articles.

**08-02-2021**

**Editor and Publisher**

[On behalf of editorial board]

******



ವಿಭಾಗದ ಪ್ರಾಧ್ಯಾಪಕರಾಗಿರುವ ಡಾ. ಶ್ರೀಧರ ಭಟ್ಟ ಐನಕೈ ರವರ **“भाष्यकारमते तत्त्वमसिवाक्ये शक्त्यैव अभेदान्वयस्य निर्वाहः”** ಎನ್ನುವ ಲೇಖನ ಅದ್ವೈತ ವೇದಾಂತ ಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದು ಔಚಿತ್ಯಪೂರ್ಣವಾಗಿದೆ.

* ತಿರುಪತಿಯ ರಾಷ್ಟ್ರಿಯ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ದ್ವೈತವೇದಾಂತ ವಿಭಾಗದ ಎಸೋಸಿಯೇಟ್ ಪ್ರಾಧ್ಯಾಪಕರಾಗಿರುವ ಮತ್ತು ನಮ್ಮ ಅಕಾಡೆಮಿಯ ಎಡ್ವೈಸರಿ ಬೋರ್ಡಿನ ಸದಸ್ಯರೂ ಆಗಿರುವ ಡಾ. ನಾರಾಯಣ ಪೂಜಾರ್‌ರವರ **“व्यासकृति– परिचयः”** ಎನ್ನುವ ಲೇಖನ ದ್ವೈತವೇದಾಂತಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದು, ಸಂಗ್ರಹಯೋಗ್ಯ ವಾಗಿದೆ. ಈ ಲೇಖನ ಹಿಂದಿನ ಸಂಪುಟದಿಂದ ಮುಂದುವರಿದು ಈ ಸಂಪುಟದಲ್ಲಿ ಸಮಾಪ್ತವಾಗಿದೆ.

* ಬೆಂಗಳೂರಿನ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ಸಂಶೋಧನಾ ಛಾತ್ರರಾಗಿರುವ ವಿದುಷೀ ತೇಜಸ್ವಿನೀ ಡಿ.ಯವರ **“जैनाराधनामण्डलानाम् एकमध्ययनम्”** ಎಂಬ ಲೇಖನ ಜೈನಸಾಹಿತ್ಯಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದು ಚೆನ್ನಾಗಿ ಮೂಡಿ ಬಂದಿದೆ.

* ಬೆಂಗಳೂರಿನ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯದ ನ್ಯಾಯಶಾಸ್ತ್ರದ ಸಹಾಯಕ ಪ್ರಾಧ್ಯಾಪಕರಾಗಿರುವ ಡಾ. ಭಾಸ್ಕರ ಭಟ್ಟ ಜೋಶಿಯವರ **“संशयः”** ಎಂಬ ಲೇಖನ ನ್ಯಾಯಶಾಸ್ತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ್ದು ಪ್ರಬುದ್ಧವಾಗಿದ್ದು ಸಂಗ್ರಹ ಯೋಗ್ಯವಾಗಿದೆ.

ಒಟ್ಟಿನಲ್ಲಿ **19** ಲೇಖನಗಳನ್ನು ಸಂಪಾದಿಸಿ ಪ್ರಕಾಶಿಸಲು ಮತ್ತು ಇವೆಲ್ಲಾ ಲೇಖನಗಳು ಪ್ರಕಾಶನಾರ್ಹತೆಯನ್ನು ಪಡೆದುಕೊಂಡಿವೆ ಎನ್ನಲೂ ಹೆಮ್ಮೆ ಎನಿಸುತ್ತಿದೆ.

ಈ ಲೇಖನಗಳನ್ನು ಪರಿಶೀಲಿಸಲು ಉಡುಪಿಯ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ಪ್ರಾಚಾರ್ಯರಾದ ಪ್ರೊ. ಎನ್. ಲಕ್ಷ್ಮೀನಾರಾಯಣ ಭಟ್ಟರು, ಉಮ್ಮಚಗಿಯ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ನಿವೃತ್ತ ಪ್ರಾಂಶುಪಾಲರಾದ ಪ್ರೊ. ರಾಮಚಂದ್ರ ಭಟ್ಟರು, ಶ್ರೀಸ್ವರ್ಣವಲ್ಲೀ ಮಠದ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ಅದ್ವೈತವೇದಾಂತವಿಭಾಗದ ಮುಖ್ಯಸ್ಥರಾದ ಪ್ರೊ. ಬಾಲಿಗದ್ದೆ ಶಂಕರ ನಾಗೇಶ ಭಟ್ಟರು, ಮೈಸೂರಿನ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ಪ್ರೊ. ವೆಂಕಟರಮಣ ಹೆಗಡೆ ಯವರು ಮತ್ತು ಹೆಗಡೆಯಲ್ಲಿರುವ ಕುಮಟಾದ ಡಾ. ಎ. ವಿ. ಬಾಳಿಗಾ ಕಾಲೇಜಿನ ನಿವೃತ್ತ ಪ್ರಾಚಾರ್ಯರಾದ ಡಾ. ಯು. ಜಿ. ಶಾಸ್ತ್ರಿಯವರು ಮತ್ತು ಡಾ. ಎ. ವಿ. ಬಾಳಿಗಾ ಕಾಲೇಜಿನ ಕನ್ನಡ ವಿಭಾಗದ ನಿವೃತ್ತ ಪ್ರಾಧ್ಯಾಪಕರಾಗಿರುವ ಡಾ. ಜಿ. ಎಲ್. ಹೆಗಡೆಯವರು ಮತ್ತು ಉಮ್ಮಚಗಿಯ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನ ಅಲಂಕಾರ ವಿಭಾಗದ ಸಹಾಯಕ ಪ್ರಾಧ್ಯಾಪಕ ರಾದ ಡಾ. ಗೋಪಾಲ ನಾಗೇಶ ಭಟ್ಟರು ಸಹಕರಿಸಿರುತ್ತಾರೆ.

ಇವರೆಲ್ಲರಿಗೂ ಹೃತ್ಪೂರ್ವಕ ಧನ್ಯವಾದಗಳು. ಸಕಾಲದಲ್ಲಿ ಡಿ.ಟಿ.ಪಿ. ಮಾಡಿಕೊಟ್ಟ ಕುಮಾರ ಪವನ ಹೆಗಡೆಯವರಿಗೂ, ಮುಖಪುಟದ ವರ್ಣವಿನ್ಯಾಸ ಮಾಡಿಕೊಟ್ಟ ಶ್ರೀ ಗಿರೀಶ ಆರ್. ಭಟ್ಟರಿಗೂ, ಅಂದವಾಗಿ ಮುದ್ರಿಸಿಕೊಟ್ಟ ಪವನ್ ಗ್ರಾಫಿಕ್ಸ್ ಮತ್ತು ಪುಸ್ತಕವನ್ನು ಅಂದವಾಗಿ ಮುದ್ರಿಸಿಕೊಟ್ಟ ಪವನ್ ಗ್ರಾಫಿಕ್ಸ್ ಮತ್ತು ಪುಸ್ತಕವನ್ನು ಅಂದವಾಗಿ ಜೋಡಿಸಿ ಸಿದ್ಧಗೊಳಿಸಿಕೊಟ್ಟ ಶ್ರೀಕೃಷ್ಣ ಮುದ್ರಣಾಲಯದ ಮಾಲಕರಿಗೆ ಹೃತ್ಪೂರ್ವಕ ಧನ್ಯವಾದಗಳು.

ದೇಶದ ನಾನಾ ವಿಶ್ವವಿದ್ಯಾಲಯಗಳಲ್ಲಿ ಎಮ್.ಫಿಲ್ ಅಥವಾ ಪಿಎಚ್.ಡಿ. ಸಂಶೋಧಕರು, ವಿದ್ಯಾರ್ಥಿಗಳು ಅಥವಾ ಈಗಾಗಲೇ ಸೇವೆ ಸಲ್ಲಿಸುತ್ತಿರುವ ಉಪನ್ಯಾಸಕರು, ಪ್ರೊಫೆಸರ್‌ಗಳು ತಮ್ಮ ಲೇಖನಗಳನ್ನು ಅಕಾಡೆಮಿಗೆ ಕಳುಹಿಸಿ ಕೊಡಬಹುದು. ಸಂಪಾದಕ ಸಲಹಾಮಂಡಳಿಯಿಂದ ಅಂಗೀಕೃತವಾದ ಲೇಖನಗಳನ್ನು ಸಂಶೋಧನ ಪತ್ರಿಕೆಯಲ್ಲಿ ಪ್ರಕಟಿಸಲಾಗುವುದು.

ಹೀಗೆ ಗ್ರಾಮೀಣ ಪ್ರದೇಶದಲ್ಲಿರುವ ಈ ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿಯ ಸದುಪಯೋಗವನ್ನು ಆಸಕ್ತರು ಪಡೆದುಕೊಳ್ಳಬಹುದು ಎಂದು ವಿನಂತಿಸುತ್ತೇವೆ.

ಹೆಗಡೆಯ ಶ್ರೀಶಾಂತಿಕಾ ಪರಮೇಶ್ವರೀ ದೇವಿಯ
ಮಹಾರಥೋತ್ಸವದ ಶುಭ ದಿನ
**08-02-2021**

ಸಂಪಾದಕರು

[ಸಂಪಾದಕ ಮಂಡಳಿಯ ಪರವಾಗಿ]

*******



## PROLOUGE

As a result of the vision of **Prof. Virupaksha V. Jaddipal**, at the feet of Shree Lord Venkateshwara, Tirupati in 2011, the Veda Samskrita Academy came into existence, and started publishing **“Journal of Veda Samskrita Academy”** since 2013. It a matter of great pleasure that by 2020 this research journal has successfully completed **eight years** and made a mile stone in the field of research. This has been nade possible by the sincere efforts of the Advisory Board and the research scholars who have contributed their valuable articles. We are greatful to all those who have extended their support and co-operation in this regard.

Our **fifteenth volume** was released by His holiness **Shree Shreemad Gangadharendra Saraswati Mahaswamijee** of Shree Swarnavallimatha on the occasion of Shree Shankara Saraswati Saptaha Mangala Mahotsava. In this function, **Prof. K. E. Devanathan,** honourable **Vice Chancellar** of **Karnataka Samskrita University** was also present and he graced the occasion. I consider this to be a great fortune on the part of Academy. It is also a co-insidence that Karnataka Samskrita University has recently granted its approval to our research journal.

His holiness Shree Swamijee blessed the journal with divya Mantrakshata and graced with the word **“वर्धताम् अभिवर्धताम्”** ।

At this juncture I would like to bring to your kind notice that, one of the active member of our executive body **Dr. Ravindra Krishna Bhat, Soori** is awarded with the honour of **“Best Teacher of the District”** as well as **“Best Teacher of the State”** for the academic year 2020. He is also the elected **President** of the **State of the Physical Teacher’s Association** and the **Taluka President of Primary School Teachers Association**. He has achieved all these laurals in a single academic year.

Academy honoured him with love and respect on 27th December, 2020. Ghief Trustee of Shree Siddhivinayaka Temple, Idagunji Shri **Dr. G. G. Sabhahit** presided over the funchion and the well-known **Jyotisha**

जितेन्द्रियश्च भवति । आत्मगुणवान् शीलयुक्तश्च भवति । ज्ञानम् इन्द्रियनिग्रहः, शीलसम्पत्तिः, गुणसम्पत्तिरिति सर्वं साधारणधर्माः । तैश्च यदिब्रह्मचारी तदाश्रमे शीलितो भवति स तैर्धर्मैः वर्तते गार्हस्थ्यादिष्वपि । ततश्च तैर्धर्मैः परेषां जीवनावकाशो भवति । दया क्षमा अनसूया लोभशून्यत्वं दानं दमः शम इत्यादिभिः परोपकारो भवति । परहिंसानिवृत्तिश्च सम्पद्यते । यश्च ब्रह्मचर्ये एव विनीतः गुणैर्युक्तः शीलवांश्च स गार्हस्थ्येऽपि विनयशीलादिना वर्तते, न तु धनयौवनाधिकारादिनिमित्तेन मत्तः परान् हिंसति । इदमेव ब्रह्मगर्याश्रमधर्माणां प्रयोजनम् एवं ब्रह्मचर्याश्रमधर्माणां सृष्टि पोषकत्वं दृश्यते ।

वानप्रस्थस्तु सुतविन्यस्तपत्नीकः तयानुगतो वा वनं गत्वा तत्र तप एवानुतिष्ठेत् मुख्यधर्मत्वेन । तथा तस्य पत्न्या सह वासाधिकारसत्वेऽपि, धनधान्य सङ्ग्र- हावकाशसत्वेऽपि तस्मिन् कामात्मता लोभबुद्धिर्वा यथा नैधते तथा तद्धर्मा उपदिष्टाः । यथाह याज्ञवल्क्यः– अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा । अर्थस्य सङ्ग्रहं कुर्यात् कृतमाश्वयुजे त्यजेत् ॥ इति । तथा ब्रह्मचर्या-प्रतिग्रहादिधर्मानाह वसिष्ठः– वानप्रस्थो जटिलश्चीराजिनवासी, ऊर्ध्वरेताः, क्ष्माशयः, दद्यादेव न प्रतिगृह्णीयात्, त्रिषवणमुदकोपस्पर्शी इत्यादिना । एवं ब्रह्मचर्यं तपः दानम् अप्रतिग्रहः इत्यादयस्तस्य धर्माः । एतैश्च धर्मैः स्वनुष्ठितैः न परहिंसा सृष्टिहिंसा वा जायते, परं तु परोपकारेण सृष्टिपोषणमेव भवति ।

यतिधर्माश्च स्मृतिषूक्ताः । यथा निर्णयसिन्धावत्रिवचनम्– भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् । कर्तव्यानि षडेतानि सर्वथा नृपदण्डवत् ॥ इत्यादि । यथा च बृहत्पाराशरवचनम्– द्विकालं विधिवत् स्नानं भिक्षयाचैकभोजनम् । सदैव प्राणसंरोधं सदैवाध्यात्मचिन्तनम् । अवकर्तृत्वं तथा स्त्रीभिः कृत्यमेतद्यतेः स्मृतम् । इत्यादि । यथा च बृहस्पतिवचनम् । लोहितार्कमुपासीत सन्ध्यामातारकोदयात् । हृत्पद्मकोटरावासं चिन्मात्रज्योतिषं हरिम् ॥ इत्यादि । एते चान्ये च स्मृत्युक्ताः यतिभिरनुष्ठिताः सृष्टिपोषणं कुर्वन्ति । यतयः ऐहिकभोगविरक्ताः । अत एव ते परेषां जीवनं भोगं वा न घातयन्ति, न वारयन्ति । प्राणायामजपतपध्यानसुरार्चनेषु आत्मप्राप्त्युपायेषुरताः ते कथमपि परजीवनबाधां न चरन्ति । इत्थं ब्रह्मचार्यादीनां धर्माः स्वनुष्ठिताः स्वजीवनं सृष्टिं सर्वामपि पोषयन्ति ।

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# आश्रमधर्माणां सृष्टिपोषकत्वचिन्तनम्

प्रो. वेङ्कटरमण हेगडे (मैसूरु)*

**पीठिका–**

"धर्मो विश्वस्य जगतः प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पन्ति, धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्, तस्माद्धर्मं परमं वदन्ति" इति श्रुतिः धर्मस्य महत्वं प्रकाशयति । तथा चाहापस्तम्बः– "सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखं ततः परिवृत्तौ कर्मफलशेषेण जातिं वर्णं रूपं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रपद्यते । तच्चक्रवदुभयोर्लोकयोः सुख एव वर्तते यथौषधि-वनस्पतीनां बीजस्य क्षेत्रकर्मविशेषे फलपरिवृद्धिरेवम्" इति । गौतमश्च– "वर्णाश्चाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेह जातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते विश्वञ्चो विपरीता नश्यन्ति" इत्युवाद । एतैश्च वाक्यैः धर्मानुष्ठानस्यानुषङ्गिकं फलं द्योतते तन्महत्वं च । अत एव श्रुतिस्मृतिपुराणेतिहासादिषु धर्ममनुतिष्ठेदिति विहितं वर्तते । स च धर्मः स्वस्वाश्रमवर्णाश्रयेण विहितो यागादिरूपः । अत एव "यागादिरेव धर्मः" "चोदनालक्षणोऽर्थो धर्मः" "श्रुतिस्मृतिविहितो धर्मः" इत्यादिना तत् स्वरूपं प्रकाशितम् । स धर्मोऽनुष्ठेयः । तस्याभावे लोको विनश्यति । यथा अराजके राष्ट्रे मत्स्यन्यायः प्रवर्तते तथा धर्मरहितलोके मत्स्यन्याय उत्थितो भवति । यथा जले प्रबलाः मत्स्याः दुर्बलान् ग्रसेयुः तथा धर्माभावे परस्परहिंसया लोकोच्छेदो भवति । तदर्थमेव जगत् कर्ता धर्मोऽपि सृष्टः । तेन धर्मेण सृष्टिरियं सुरक्षिता प्रवर्धते । तत् कथं धर्मेण सृष्टिः प्रवर्धते, रक्षिता भवति, के ते धर्माः, सृष्टिविशेषः कः इत्यादीन् अंशान् किञ्चिदिव पश्यामः ।

**सृष्टिविचारः–**

"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशंति, तद्विजिज्ञासस्व, तद् ब्रह्म । प्रजापतिर्विराजमपश्यत् तथा भूतं च भव्यं चासृजत । प्रजापतिः प्रजा असृजत । प्रजापतिः पशूनसृजत । प्रजापतिर्देवासुरानसृजत । प्रजापतिर्यज्ञानसृजत । प्रजापतिरग्निमसृजत ।" इत्यादिश्रुतिवाक्यैः सर्वमिदं जगत् प्रजापतिना ब्रह्मणा एव सृष्टमिति ज्ञायते ।

अयमेव विचारः पुराणेषु मन्वादिस्मृतिषु च वर्णितः । सृष्टेः प्राक् जगदिदं प्रकृतौ लीनमासीत् । प्रकृतिरपि ब्रह्मात्मना व्याकृतासीत् । ततो ब्रह्मा इदं जगत् व्यञ्जयन् स्वेच्छामात्रेण प्रकृत्यादिकं प्रकाशयन् स्वयमेव प्रादुर्बभूव स्वयम्भूस्वरूपेण । तदेवोक्तं गीतायां–"मयाध्यक्षेण प्रकृतिः सूयते स चराचरम्"(९/१०) इत्यादिना । ततश्च प्रजाः सिसृक्षुः आपः सृष्ट्वा तासु तेजोरूपं बीजं ससर्ज । तस्मिंश्च हिरण्यगर्भरूपेण प्रादुर्बभूव । तस्मिन् अण्डे संवत्सरमुषित्वा तपस्तप्त्वा ध्यानमात्रेण तं द्विधा कृत्वा दिवं भूमिं व्योमदिगपांस्थानं च कल्पयामास । ततश्चाहंकार–तन्मात्राणां सूक्ष्मावयवानात्मना संयोज्य सर्वभूतानि स्थावरजङ्गमात्मकानि उद्भिज–स्वेदज–अण्डज–जरायुज रूपाणि जनयामास । तथा देवानां साध्यानां च गणं यज्ञं वेदान् कालं कालविभक्तीः नक्षत्राणि ग्रहान् सरितः सागरान् पर्वतांश्च निर्ममे । एवं च तपः वाचं रतिं कामं क्रोधं च कल्पयित्वा सुखदुःखादिभिः विप्रादीन् ससर्ज । एवं च वेदैरेव स्मृत्वा सर्वेषां कर्माणि नामानि व कल्पयामास । यथा ऋतुकाले ऋतुलिङ्गानि प्राप्नुवन्ति तथा हिंस्राहिंस्रमृदुक्रूरादि कर्माणि कुर्वन्ति प्राणिनः स्वभावतया एव । कर्माणि च गुणत्रयानुगतानि प्रजानां वंशवृद्ध्यर्थं ब्रह्मा स्वदेहं द्विधा कृत्वा अर्धेन नारी अर्धेन पुरुषोऽभवत् । तस्यां विराट् पुरुषं जनयामास । स च विराट् स्वायम्भुवं मनुं जनयामास । मनुश्च प्रजासिसृक्षया मरीच्यादीन् दश प्रजापतीन् जनयामास । ते च पुनः इतरान् मनून् देवान् देवनिकायान् यक्षरक्षःपिशाचान् गन्धर्वाप्सरसोऽसुरान् नागान् सर्पान् सुपर्णान् पितृगणान् विद्युदशनिमेघान् रोहितेन्दधनूंषि उल्कानिर्घातकेतूंश्च उच्चावचानि ज्योतींषि किन्नरवानरमत्स्यविहंगमपशुमृगव्यालकृमिकीटपतङ्गयूकमक्षिकमत्कुणदंशमशकादीन् स्थावरजङ्गमात्मकान् उत्पाद्य आपुः । एवं ब्रह्मसृष्टिः मनुस्मृतौ भविष्ये स्कान्दे च विस्तरेण वर्णिता । सृष्टायाः सृष्टेः प्रजानां च योगक्षेमार्थं नानाविधानिकर्माणि कल्पयामास पितामहः । कर्मणां च विवेकार्थं धर्माधर्मौ च व्यवेचयत् । स च धर्मो वेदेषु स्मृतिषु च विस्तरेणोपदिष्टः । पुराणेतिहासेषु च बृंहितः । तेषां सर्वेषामपि अत्र विवेचनं न साध्यं तथापि प्रबन्धानुगुणं धर्माणां प्रकारभेदान् तेषु आश्रमधर्माणां स्वरूपं भेदं प्रयोजनं च यथावसरं पश्यामः ।

**धर्मभेदाः–**

धर्मः प्राधान्येन द्विविधः । साधारणोऽसाधारणश्चेति । साधारणस्तु–"क्षमा सत्यं दमः



शौचं दानमिन्द्रियसंयमः । अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥" इत्यादिना विष्णुबृहस्पतिमनुयाज्ञवल्क्यशङ्खलिखितापस्तम्बवाल्मीकिव्यासादिप्रणीताः सर्ववर्णा–श्रमिणामपि साधारणत्वेन नित्यत्वेन चोपदिष्टाः । असाधारणाः विशेषेण वर्णाश्रमा–द्याश्रयणेक्ता पञ्चविधा इति भविष्योक्ताः । ते यथा वर्णधर्मा, आश्रमधर्मा, वर्णाश्रमधर्मा, गुणधर्मा, नैमित्तिकधर्मा इति । एते सर्वेऽपि नित्यनैमित्तिककाम्यभेदेन आचारव्यवहारप्रायश्चित्तभेदेन युगभेदेन कालभेदेन पात्रभेदेन च कथ्यन्ते । अथापि एतेषां सर्वेषामपि स्वरूपभेदाभावात् प्रकारभेद एव अभ्यनुज्ञातः शास्त्रविद्भिः । सर्वप्रकारका अप्येते धर्मा ब्रह्मसृष्टेः पोषणमेव कुर्वन्ति । ब्रह्मसृष्टिः चक्रवत् वर्तमाना परस्परसापेक्षा वर्तते । इहपरलोकगतानां चराचराणां स्थावरजङ्गमानां परस्परसापेक्षा वर्तते । यदि परस्परसापेक्षा न पूर्यते तत्र सङ्घर्ष उत्पद्यते । तेन च परस्परघातो विनाशश्च । अत एव सृष्टिपोषणार्थमेव कर्मविवेकार्थं धर्माधर्मौ कल्पितौ ब्रह्मणा । स च धर्मः परस्पराकांक्षापूरको वर्तते । ततश्च सः सृष्टिपोषको भवति । साधारणधर्माः सत्यक्षमादया शमदमाहिंसादयः परेषां कांक्षापूरकाः परिजीव–पोषकाश्च भवन्ति । एवं वर्णधर्मादयोऽपि स्वनुष्ठिताः परेषां जीवानाम् इहपर–लोकगतानामपि जीवनं कल्पयन्ति । अत एव च भारते व्यासेनोक्तम्– "जीवो जीवस्य जीवनम्" इति । तत्र आश्रमधर्मा यथासृष्टिपोषका इति अल्पविस्तरेण चिन्तयामः ।

**आश्रमाः–**

"चत्वार आश्रमाः इति ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकाः" इति उक्तवसिष्ठसूत्रेण आश्रमभेदा उक्ताः । तत्र अशूद्राणाम–दुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि, वसन्ते ब्राह्मणमुपनयीत, उपेतस्याचार्यकुले ब्रह्मचारिवासः, आचार्याधीनस्स्यादन्यत्रपतनीयेभ्यः" इत्यापस्तम्बाद्युक्तधर्मोपदेशानुगुणम् उपनयना –नन्तरं ब्रह्मचार्याश्रमः । तत्र शौचाचाराणां शिक्षा, वेदशास्त्राणामध्ययनं वेदार्थव्रतकरणं च तेषां धर्माः । गुर्वधीनः, आहूताध्यायी, इत्यादिना वसिष्ठः, गुरोः प्रियहिताचरणम्, गुरोः पूर्वोत्थानं चरमं संवेशनम् इत्यादिना विष्णुः, उपनीतो द्विजो नित्यं गुरवे हितमाचरेत्, यानि शास्त्रनिषिद्धानि तानि यत्नेन वर्जयेत् इत्यादिना बृहस्पतिः, अग्नीन्धनभैक्षचरणे, सत्यवचनम्, वाग्बाहूदरसंयुतः इत्यादिना गौतमश्च तद्धर्मानुपदिष्टवन्तः । एतेषां धर्माणामनुष्ठानेन ब्रह्मचारी वेदशास्त्रादिज्ञानी, विनीतो

वृद्धमनुवचनम्– आषाढीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः । काङ्क्षन्ति पितरः क्लिष्टाः अन्नमप्यन्वहं जलम् ॥ इति । तथा तत्रैव ब्राह्मवचनम्– वृश्चिके समतिक्रान्ते पितरो देवतैः सह । निश्वस्य प्रतिगच्छन्ति शापं दत्वा सुदारुणम् ॥ इति । पितृशापादिना वंशविच्छेदादिकं सृष्टिनाशनं स्यात् । तस्मात् पितृयज्ञोऽवश्यमनुष्ठेयः । स च पितृयज्ञः पूर्वोक्तवत् सृष्टिपोषकः ।

**भूतयज्ञः–**

"यद् भूतेभ्यो बलिं हरति स भूतयज्ञ" इति बोधायनेन स उक्तः । "अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयात्, अथातः पञ्चमहायज्ञाः, तानेतान्यज्ञानहरहः कुर्वीत" इति आश्वलायनेन नित्यत्वं कालः प्रयोगश्च दर्शितः । तस्यैव यज्ञस्य विस्तरेणोपपादनं याज्ञवल्क्यमन्वादिस्मृतिषु कृतम् । यथाह याज्ञवल्क्यः– देवेभ्यश्च हुतादन्नात् शेषाद् भूतबलिं हरेत् ।

अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निक्षिपेत् ॥ इति । यथाह मनुः– शुनां च पतितानां च श्वपचां पापरोगिणाम् । वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवि ॥ इति । एवं देवता आरभ्य कृमिपर्यन्तेभ्यो भूतेभ्योऽन्नदानमेव भूतयज्ञः । अयं च साक्षादन्नदानेन भूतानामुपकारको वर्तते । बर्हिर्मुखा देवा अग्नौ हुतान्नेन तृप्ता भवन्ति । भौमा भूताश्च साक्षादन्नभक्षणेन जीवन्तः तृप्ता वर्धन्ते । इत्थं भूतयज्ञः सृष्टिपोषकोऽस्ति ।

**अतिथियज्ञः / मनुष्ययज्ञः–**

तिथिमतिक्रम्य न तिष्ठतीति अतिथिः । स च वसिष्ठेनोक्तः– "अनित्यं हि स्थितो यस्मात् तस्मादतिथिरुच्यते" इति । स च नैकग्रामीणः श्रोत्रियः मुख्यः । इतरो गौणः । सर्वानप्यतिथीन् सम्मानयित्वा अन्नादिप्रदानेन तोषयेत् । रात्रावागतेभ्यो आवसथमुपरिशय्यामुपस्तरणमुपधानं सावस्तरणमभ्यञ्जनमिति यदपेक्षितम् अवश्यकं तद्द्यात् । अन्नार्थिनं न प्रत्याचक्षीत । अतिथीनेवाग्रे भोजयेत् । अग्रं च भिक्षवे दद्यात् इत्यादिना अतिथियज्ञधर्मा आपस्तम्बैरुपदिष्टाः । पितृभ्यो मनुष्येभ्यश्च अन्नं जलं च प्रतिदिनं दद्यात्, नात्मने पचेदन्नम्, बालस्ववासिनीवृद्धगर्भिणातुरकन्यकाः तथा अतिथिभृत्यांश्च सम्भोज्य शेषभोजिनौ स्यातां दम्पती, भिक्षवे सव्रताय च सत्कृत्य भिक्षां दद्यात्, अतिथित्वेनागतानां ब्राह्मणादीनां वर्णानुपूर्व्येण प्रतिदिनं यथाशक्ति देयम्, अतिथिं न प्रत्याचक्षीत,



**गृहस्थधर्माः–**

धर्मशास्त्रोक्ता बहवो धर्मा गृहस्थस्यैवोपदिष्टा दृश्यन्ते । अत एव गृहस्थधर्माणां धर्मशास्त्रे प्राधान्यं महत्वं च दृश्यते । सः प्रत्यक्षतया सर्वाश्रमिणां सर्वभूतानां च आश्रयः पोषकश्च । तस्मात् कारणात् स्मृतिषु गृहस्थाश्रमस्य श्रेष्ठत्वं महत्वं च वर्णितम् । यथोक्तं बृहस्पतिस्मृतौ– आश्रमाणां समुत्पत्तिर्वर्धनं पालनं तथा । गृहस्थाज्जायते सम्यक् तस्मात् सोऽभ्यधिकः स्मृतः ॥ इति । यथाह वसिष्ठः– यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः । एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षुकाः ॥ इति । स च गृहस्थः स्वविहितधर्मानुष्ठानेन स्वेतरसर्वाश्रमिणां मानवानां सर्वभूतानां देवानां पितॄणां च हितमाचरति । ततश्च सृष्टिरियं सन्तुलिता सुरक्षिता च भवति । तस्य तादृशधर्मा यद्यपि अनन्ता विहिताः तथापि तेषां समूहद्वयं पश्यामः । तदुक्तं वीरमित्रोदये परिभाषाप्रकाशे कालिकापुराणे– इष्टापूर्तौ स्मृतौ धर्मौ श्रुतौ तौ शिष्टसम्मतौ । प्रतिष्ठाद्यं तयोः पूर्तमिष्टं यज्ञादिलक्षणम् ॥ इति । तत्र प्रतिष्ठादिकं तु देवप्रतिष्ठा वापीकूपतटाकादीनामुत्सर्गः प्रपारामादिप्रतिष्ठा इत्यादि । इष्टं यज्ञहोमपूजासत्कारदानदिरूपम् । तदुक्तं तत्रैव– एकाग्निकर्महवनं त्रेतायां यच्च हूयते । अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते ॥ वापीकूपतडागानि देवतायतनानि च । अन्नप्रदानमारामाः पूर्तमार्याः प्रचक्षते ॥ इति । तत्रैव नारदवचनमपि– आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते । ग्रहोपरागे यद्दानं तदेतत् पूर्तमुच्यते ॥ इति । तदुभयसमूहगतान् धर्मान् विस्तरेण प्रतिपादयन्ति धर्मशास्त्राणि । तेषां च सृष्टिपोषकत्वं चिन्तयामः ।

**देवयज्ञः / यज्ञधर्माः–**

गृहस्थानां पञ्चमहायज्ञा विहिताः शास्त्रे । यथाह मनुः– पञ्च क्लृप्ताः महायज्ञाः प्रत्यहं गृहमेधिनाम् । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृपयज्ञोऽतिथिपूजनम् ॥ इत्यादिना । एते पञ्च महायज्ञा महामखा इति प्रसिद्धाः । गृहाश्रमिणः स्वपुत्रकलत्रमातृपितृभ्रातृभृत्यादीनां कुटुम्बानां परिवाराणां च अशनादीनां कृते चुल्लीं, पेषणीम्, उपस्करं, कण्डनीम्, उदकुम्भं च उपयोजयन्तः तदाश्रितपापैर्बध्यन्ते । तेषां पापानां निष्कृत्यर्थं प्रतिदिनं गृहस्थैः पञ्च महायज्ञा अनुष्ठेया इति शास्त्रे विहितम् । तैर्यज्ञैः यथा पञ्चसूनादोषाणाम् अदृश्यरूपाणां परिनिवृत्तिरूपं प्रयोजनं तथा नरभूतादिजीवानां तृप्त्यापादनरूपमपि दृष्टप्रयोजनं

सम्भवति एतच्च प्रत्यक्षप्रयोजनम् । देवर्षिपितृतर्पणेन च वृष्ट्यन्नप्रजारूपमप्यप्रत्यक्षं फलं सिद्ध्यति । एवं प्रत्यक्षाप्रत्यक्षफलैर्यज्ञैः सृष्टिपोषणं भवति । तच्च गीतादिषु मन्वादिशास्त्रेषु चाम्नातम् । यथोक्तं गीतायाम्– अन्नाद्भवन्ति भूतानि पर्जन्याद–न्नसम्भवः । यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ इति । एवं भूतानि अन्नं विना न जीवन्ति । तच्चान्नं पर्जन्यं विना न सम्भवति । पर्जन्यो यज्ञं विना न घटते । यज्ञश्च कर्म विना न सिद्ध्यति । तादृशं च यज्ञसाधकं कर्म अक्षरेण ब्रह्मणा कल्पितम् । तमिमं यज्ञं वृष्ट्यन्नोत्पादकं गृहस्थ एव करोति । अनेन प्रकारेण गृहस्थस्य यज्ञधर्मा परोक्षतया सृष्टिपोषका भवन्ति ।
यज्ञैः कथं वृष्टिः अन्नं चेति मनुना उक्तम्– अग्नौ प्रस्ताहुतिः सम्यगादित्यमुप–तिष्ठते । आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ॥ इति । गृहस्थेनाग्नौ समर्पिता घृताद्याहुतिः रसरूपत्वं गता आदित्यस्य रसाहरणशक्त्या आकृष्टा आदित्यमण्डलं गच्छति । ततश्च रसा वृष्टिरूपेण भूमिं प्राप्ता अन्नोत्पत्यनुकूला भवन्ति । अन्नमाश्रित्य जीवा जीवन्ति । इत्थं गृहस्थस्य यज्ञैः सृष्टिपोषणं भवति । तस्मादेव कारणात् देवयज्ञाः सृष्टाः । तदप्युक्तं गीतायाम्– सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ इति । देवोद्देशेन क्रियमाणैः यज्ञैः प्रजानामिष्टभोगा लभन्ते । यज्ञभाविता देवा तान् प्रयच्छन्ति । तैर्दत्तान् भोगान् तेभ्योऽदत्वा यो भुङ्क्ते सः स्तेनो भवति । किन्तु यज्ञरूपेण कर्मणा देवदत्तान् द्रव्यादि भोगान् तेभ्यः समर्प्य यज्ञशिष्टाशनं ये भुञ्जते ते सर्वकिल्बिषैः मुच्यन्ते । ये त्वात्मकारणादेव पचन्ते ते त्वघमात्रं लभन्ते इति शास्त्राभिप्रायः । अत एव आर्याः प्रतिदिनमपि यागदानहोमपूजाव्रतादिरूपेण देवान् यजन्ते । देवतोद्देशेन द्रव्यत्यागो यागः । अग्नौ प्रक्षेपादिको होमः । स्वस्वत्व– निवृत्तिपूर्वकं परस्वत्वापादनं दानम् । उपवासादिनियमानुष्ठानं व्रतम् । अर्चनादिकं पूजा । तदेतेषु सर्वविधेष्वपि देवयज्ञत्वमुपपद्यते । काम्याश्वमेधसोमवाजपे यचित्रादियागा बहवो वेदविहिता देवयज्ञाः सन्ति । तथा नित्यनैमित्तिकाअपि सन्ति श्रौतयागाः । तथा स्मार्तवैश्वदेवादयोऽपि नित्या विहिता देवयज्ञाः । तेषां यथाविध्यनुष्ठानेन प्रीता देवाः सृष्टिमिमां रक्षन्ति । यदि देवयज्ञादिना देवा न प्रीता भवन्ति तदा देवा जीवनावश्यकान् भोगान् द्रव्यादीन् न प्रयच्छन्ति । सृष्टिमिमां रक्षन्ति । यदि देवयज्ञादिना देवा न प्रीता भवन्ति तदा देवा जीवनावश्यकान् भोगान् द्रव्यादीन्



द्रव्यादीन् न प्रयच्छन्ति । एवं देवयज्ञगृहस्थधर्माणां चानुष्ठानेन परम्परया सृष्टि–पोषणं भवति ।

**ऋषियज्ञः–**

ज्ञानेन संसारपारंगता ऋषयः । तपोनिर्धूतपाप्मानो याथातथ्याभिधायिनः । वेदवेदा–ङ्गतत्वज्ञाः ऋषयः परिकीर्तिताः । इति ऋषिपदार्थः उक्तः कोशे । ब्रह्मर्षिप्रमुखाः ते सप्तविधाः । सप्त ब्रह्मर्षि देवर्षि महर्षि परमर्षयः काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमा वराः ॥ इति । ते सर्वेऽपि वेदादिज्ञानप्रदानेन अस्मानुद्धृतवन्तः । काण्डर्षयश्च तत्तत् वेदकाण्डाध्यापनपरम्प–रारम्भकत्वेनास्माकं वेदाध्ययनाध्यापनेन नित्यं स्मरणीयाः । वेदा एव धर्ममूलम् । तस्मात् धर्मज्ञानार्थं वेदज्ञानमावश्यकम् । वेदज्ञानं विना यज्ञानामसिद्धिः । एवं यज्ञसिद्ध्यर्थं वेदाध्ययनमावश्यकमिति ब्रह्मयज्ञो विहितः । ब्रह्मयज्ञो नाम अध्यापनमध्ययनं च । तदुक्तं मनुना– "अध्यापनं ब्रह्मयज्ञः" इति । अध्यापनमध्ययनं च एकमन्य– स्योपलक्षकं परस्परापेक्षं परस्परपूरकं च । एकं विना अन्यन्न प्रवर्तते । अतस्तदुभयं ब्रह्मयज्ञः । उपनीतो गुरुकुले आचार्याधीनो ब्रह्मग्रहणार्थं व्रतमपि कुर्यात् । व्रतग्रहणपूर्वकं ब्रह्मग्रहणं ब्रह्मचारिणो यज्ञः । ब्रह्मचारिणे वेदाध्यापनं आचार्यस्य ब्रह्मयज्ञः । नित्याध्ययनाध्यापने गृहस्थसामान्यस्य यज्ञः । ब्रह्मयज्ञं विना द्विजस्य ऋषिऋणं नापगच्छति । एवमध्यापनरूपब्रह्मयज्ञेन ज्ञानं प्रददन् गृहस्थः सृष्टिपोषको भवति ।

**पितृयज्ञः–**

वसुरुद्रादित्यरूपाणां पितॄणां तृप्त्यर्थं तदुद्देशेन क्रियमाणं ब्राह्मणभोजनाग्नौ–करणपिण्डतिलोदकदानात्मकं कर्म पितृयज्ञवाच्यम् । तदेव श्राद्धमित्यपि कथ्यते । "पितरो देवता" इति पित्रुद्देश्यकत्वात् यागत्वसिद्धिरिति कमलाकरभट्टाः । एवं वस्वादिदेवतारूपाणां पितॄणामुद्देशेन क्रियमाणयागः श्राद्धरूपः पितृयज्ञः । पितरश्च ऋषिभ्यो जाताः । तदुक्तं मनुना– ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः । देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः ॥ इति । इत्थं जगत्कारणरूपाणां पितॄणां श्राद्धरूपं यज्ञमवश्यं सर्वे कुर्युः । श्राद्धभाविताः पितरः वीरप्रदानेन वंशोद्धारका भवन्ति, सृष्टिपोषका भवन्ति । महालयपक्षादिषु श्राद्धं काङ्क्षन्तः पितरः तस्याप्रदानेन हताशाः शापं दत्वा स्वपुरं गच्छन्तीति वचनं महानिबन्धेषु दृश्यते । यथा– पृथ्वीचन्द्रोदये माधवीये हेमाद्रौ निर्णयसिन्धौ

जलस्रोतांसि सामान्यतः द्विविधानि भवन्ति ।

१) भूस्तरीयजलस्रोतांसि  २) भूगतजलस्रोतांसि

भूमेः किञ्चित् खननेन यद् जलं लभ्यते तत् भूस्तरीयं जलमिति । भूमेः गभीरदेशात् जलानयनमेव भूमिगतं जलमिति कथ्यते । भूमौ प्राणिपक्ष्यादयः, मानवाः, वृक्षादयः वसन्ति तत्र प्रमुखं कारणं जलमेव ।

मनुस्मृतौ जलस्य विषये एवमुक्तम्–

ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः ।
अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादिताः ॥ ४

तेजसः परिवर्तनेन जलम् उत्पन्नम् । जलेनैव पृथिवी जाता । अतः भूमौ जलस्य विस्तारः अधिकः विद्यते । अद्भ्यः पृथिवी इति तैत्तिरीयोपनिषदि । पृथिव्यां जीवाः आदौ जले समुत्पन्नः । तस्मादेव भगवतः अवतारेषु कूर्मादीनां वर्णनमस्ति । जलनाशे जीवनाशः भवति । जलजन्तूनां जलमेवावलम्बनम् । मार्कण्डेयपुराणे–

गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापरा ।
यमुनाश्च शतद्रुश्च वितस्तेरावती कुहूः ॥ ५

गङ्गा, सरस्वती, सिन्धुः, चन्द्रभागा तथा यमुना, शतद्रुः, वितस्ता, इरावती अपरा कुहूः इति नदीनां नामानि मार्कण्डेयः क्रौष्टुकीं प्रति अवदत् । भागवते नदीपर्यावरणरक्षणं निरूपयति एषः प्रसङ्गः । यमुनानद्यां कालीयनाम विषसर्पः स्वतीक्ष्णविषेण नदीजलं कलुषितं कृतवान् । नद्युपरि उड्डीयमानाः पक्षिणः विषवायुसेवनेन मृताः । एवं नदीतीरगाः वृक्षाः तत्रत्य पशुपक्षिणः विषयुक्तवायुस्पर्शेण मृताः । क्रीडनेन परिश्रान्ताः गोपबालाः यमुनानद्याः विषजलं पीत्वा नष्टप्राणाः अभवन् । एवं धेनवोऽपि जलपानेन मृताः अभूवन् । कालीयस्य प्रबलविषेणैव एतत् सर्वम् अभवत् इति ज्ञात्वा कृष्णः उन्नतमेकं कदम्बवृक्षमारुह्य विषमयं जलं प्रविष्टवान् । सः विषयः भागवते एवं प्रतिपादितम्–

तं चण्डवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः ।
कृष्णः कदम्बमधिरुह्य ततोऽतितुङ्गम् आस्फोट्यगाढरशनो न्यपतद्विषोदे ॥ ६

---

४. म. स्मृ. १. ७८  ५. मा. पु. ५४. १७  ६. भा. पु. १०. १६. ६



सायमागतेभ्योऽप्यतिथिभ्यो वाग्भूतृणोदकैः तृप्तिं जनयेत् इत्यादिना याज्ञवल्क्य–मन्वादिभिः अतिथियज्ञधर्मा उपदिष्टाः । एवं पथिकेभ्यो ब्राह्मणाद्यतिथिभ्योऽन्नादि प्रदानेन गृहस्थः स्वाश्रमधर्मैः सृष्टिं पोषयति साक्षादपि । गृहस्थस्य आश्रमधर्मा इत्थं प्रत्यक्षतया परोक्षेणापि सृष्टिपोषकाः सन्ति । तस्यैते धर्मा नित्याः । एवं तेन नित्यमपि सृष्टिपोषणं भवति ।

**उपसंहारः–**

यथा गृहस्थस्य नित्यनैमित्तिकधर्माः सृष्टिपोषकास्तथा तस्य काम्यधर्मा अपि सृष्टिपोषकाः सन्ति । तेनानुष्ठीयमानैः पशुफलकचित्रायाग–वृष्टिफलककारीरिष्टि–पुत्रफलकपुत्रकामेष्ट्यादिभिः साक्षात् परम्परया वा सृष्टेः पोषणं भवति । पुत्रफलेन साक्षात् वंसवृद्धिः । वृष्टिफलेन अन्नादिसम्भवेनापि साक्षात् परम्परया च सृष्टिपोषणं भवति । पशुफलेनापिपरम्परया जीवपोषणं ज्ञातमेव । एवमेव गृहस्थधर्मैः वापीकूपारामप्रपादीनां प्रतिष्ठोत्सर्गादिना च साक्षात् परम्परया सृष्टिपोषणं सृष्टिरक्षणं च सर्वेषां विदितमेव । किं बहुना, आश्रमधर्मैः सर्वैरपि सृष्टिपोषणं भवतीत्यत्र नास्ति सन्देहः । तान् सृष्टिपोषकधर्मान् स्वविहितान् सर्वेऽनुतिष्ठन्तु इति आशास्य विरमामि ।

**ग्रन्थर्णम्**


१. मनुस्मृतिः
२. याज्ञवल्क्यस्मृतिः
३. बृहस्पतिस्मृतिः
४. बृहत्पाराशरस्मृतिः
५. विष्णुधर्मसूत्रम्
६. गौतमधर्मसूत्रम्
७. वासिष्ठधर्मशास्त्रम्
८. बोधायनगृह्यसूत्रम्
९ आपस्तम्बधर्मसूत्रम्
१०. निर्णयसिन्धुः
११. तैत्तरीयसंहिता
१२. भविष्यपुराणम्
१३.वीरमित्रोदयस्य परिभाषा प्रकाशः
१४. कालमाधवः
१५. चतुर्वर्गचिन्तामणिः
१६. भगवद्गीता


**प्रो. वेङ्कटरमण हेगडे**
प्राध्यापकः, धर्मशास्त्रविभागः
सर्वकारीय–महाराज–संस्कृत कालेज्,
मैसूरु–२४, कर्नाटक
Mobil : 9480476144
E-mail : vhegde1968@gmail.com

*******

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# भागवतमहापुराणे जलस्रोतसां विचारः

–विघ्नेश शर्मा के. वि. (मङ्गळूरु)*

श्रीमद्भागवतपुराणं वेदोपनिषद्भगवद्गीतादीनां कथारूपं भाष्यमिति वक्तुं शक्यते । श्रीमद्भागवतपुराणंभगवतः स्वरूपमिति लोके प्रसिद्धम् अस्ति । सर्वत्र अस्य पुराणस्य आराधनम् अनुसन्धानञ्च कुर्वन्ति । एवं भारतीय दर्शनेष्वपि अस्य स्थानम् उन्नतमिति विदुषाम् अभिप्रायः । श्रीमद्भागवतपुराणं स्वमहिमया गीता इव ब्रह्मसूत्रमिव प्राधान्यं प्रप्नोति । र्तद् भागवतं परमं ज्योतिः । समग्रेऽपि पुराणसाहित्ये न तथा पावनं मधुरं चेतः प्रसादजनकं विवेकालोकप्रसारकं पुराणमन्यद् वर्तते श्रीमद्भागवतमन्तरा । अस्मान् परितः कूपतटाकादयः, गिरि शिखराः, वृक्षादयः, प्राणिसमूहाः ये सन्ति तेषां पर्यावरणमिति कथ्यते ।

पञ्चभूतेषु जलम् अन्यतमं तत्त्वम् । समस्तजीवलोकस्य जीवनशक्तिः इदमेव । जलेन विना यः कोऽपि जीवितुं न शक्नोति । जलति आच्छादयति भूम्यादीनि इति जलम् इति अस्य व्युत्पत्तिः । सर्वप्रथमं ऋग्वेदस्य नासदीयसूक्ते "इदं आ सर्वं सलिलम् इति मन्त्रे सृष्टिपूर्वावस्थाविषये सङ्केतितम् । वस्तुतः विश्वस्य निखिलसंस्कृतिषु सृष्टिप्रारम्भः जलेनैव । जलशब्दस्य ज–जन्म, ल–लय अर्थात् जन्मप्रभृतिलयपर्यन्तं लोकस्य जीवनं जलमाधारितम् । निरुक्तकारेण आपोवहनात् इति निर्वचनेन जलस्य प्रवाहगुणं, निर्मलत्वञ्च निरूपितम् । लोके पानीयं तु प्राणिनां प्राणा भवति । सर्वेषां जीविनां वृत्तिः जलायत्ता । अन्नेन विना कञ्चित् कालं जीवामः, परन्तु जलाभावे पिपासापीडितः प्राणी क्षणादेव स्व–प्राणं त्यजति । लोकेऽपि अन्नेन मनः, जलेन प्राणः इति प्रसिद्धिः दरीदृश्यते । जीवनाधारकत्वादेव जलस्य जीवनमिति नाम । शैत्यं तथा स्पर्शवत्वं च जले विद्यते इति हेतोः शीतस्पर्शवत्यः आपः इति तस्य लक्षणं तार्किकाः निरूपयन्ति । श्रुतयः आत्मन आकाशः सम्भूतः इति । आत्मा नाम सृष्टेः मूलस्वरूपम् । तद् ब्रह्म इति केचन कथयन्ति । अतः आत्मनः द्वारा आकाशः सम्भूतः । आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधीभ्योऽन्नं, तदन्नेन पुरुषः इति सृष्टेः विकासक्रमः । अतः पुरुषः अन्नरसमयस्वरूपः इति



विवृणोति अयं मन्त्रः । अनेन ज्ञायते यत् पञ्चमहाभूतेषु तृतीयस्थानमलङ्करोति अयं जलस्वरूपभूतः । जलस्य पर्यायपदानि इत्थम् उक्तानि–

आपः स्त्री भूम्नि वार्वारी सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥ १

नदीषु दैवत्वभावनाम् आवहति भारतीया संस्कृतिः । अत्र आचर्यमाणासु नैकासु धार्मिकक्रियासु जलस्य विशिष्टं स्थानम् अस्ति । गङ्गादि सप्तपुण्य– प्रदनदीः आवाहयित्वा सर्वाः नद्यः जले सन्तीति कल्पयित्वा भगवन्तं पूजयामः । तादृशविशिष्टदृष्टिः भारतीयानाम् । सृष्टिकाले विराट् पुरुषः सङ्कल्पशक्त्या जलम् असृजत् । नरेण उत्पन्नोऽभवत् इति हेतोः जलस्य नार इति अपरं नाम । जलस्य महत्वं भागवते एवं प्रतिपादितम्–

क्लेदनं पिण्डनं तृप्तिः प्राणानाप्यायनोन्दनम् ।
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः ॥ २

क्लेदनं नाम आर्द्रीकरणं, पिण्डनं नाम मृत्तिकामिइत्यादीनां स्निग्धीकरणं, तृप्तिर्नाम सन्तोषः, तापनिवारणं, कूपादिभिः निष्कासितं चेदपि मुहुर्मुहुः असकृत् तत्र प्राकव्यम् इत्येते धर्माः जले वर्तन्ते । जलं जीवनामृतं भेषजं रोगनाशकमायुर्वर्धकम् इत्येवं शास्त्रपुराणेषु वर्णितम् । जीवनस्य अनिवार्यतत्वं प्राणवायोः अनन्तरम् अनिवार्यतत्वत्वेन जलमेव परिगण्यते । इदं च तत्वं नदीकूपसरोवरेषु, विभिन्नेषु आकरेषु स्थित्वा जीवजलं पालयति, पोषयति, परिवर्धयति, संरक्षति च । इदं च जलं जीवानां सर्वास्वपि क्रियासु येन केनचिद्रूपेण उपकारकं भवति ।

अन्यदेशापेक्षया भारतदेशो भगवतः अनुग्रहेण बह्व्यः नद्यः प्रवहन्ति । तासु प्रमुखनदीनां नामानि श्लोके एवम् उल्लिखितानि–

गङ्गासिन्धुसरस्वती च यमुना गोदावरी नर्मदा
कृष्णा भीमरथी च फल्गुसरयूः श्रीगण्डकीगोमती ।
कावेरी कपिलाप्रयागविनतानेत्रावतीत्यादयो
नद्यः श्रीहरिपादपङ्कजभवा कुर्वन्तु नो मङ्गलम् ॥ ३

---

१. अ. को. १. ११. २६४   २. भा. पु. ३. २६. ४३   ३. रा. म. श्लो–६

४) नगरात् बहिः गम्यमाननिर्गतं प्रदूषणयुक्तं जलं कमपि ह्रदं, सरोवरं, नदीं वा प्रविशति चेत् तन्नत्य जलमालिन्यं भवति । तथैव कलुषितस्य जलस्य भूप्रवेशनम् अन्तर्जलनाशाय भवति । अतः मालिन्यजलं शुद्धीकृत्य नदीं योजयेत् ।

५) जलस्य महत्वं मालिन्यस्य प्रभावः इति विषयः शिक्षणे योजनीयः

**उपसंहारः**

जलमालिन्यं न करणीयमिति १९७४ अस्मिन् वर्षे जलसंरक्षणशासनं सर्वकारेण कृतमस्ति । जलस्य शुद्धविषये विशेषेण अवधातव्यमिति तैत्तिरीयारण्यके एवमुक्तम्–

नाप्सु मूत्रपुरीषं कुर्यात् । न निष्ठीवेत् । न विवसनः स्नायात् ॥ १०

जले मलमूत्रादिन कुर्यादिति वेदः प्रतिपादयति । एतादृशी प्रज्ञा सर्वेषु भवेत् । महानारायणोपनिषदि एवं उल्लिखितम्–

आपो वा इदं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापः संराडापो विराडापः स्वराडापश्छन्दांस्यापोज्योतींष्यापो यजूंष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवस्सुवराप ओम् ॥ ११

यथा प्रपञ्चेविद्यमानां सर्वमपि वस्तुजातं जलं विना न तिष्ठति । प्राणाः, पशवः, अन्नम् इत्यादीनि उक्तानि सर्वाण्यपि विना जलं न तिष्ठन्तीति अस्य मन्त्रस्य आशयः । एवं ऋग्वेदः अपि प्रार्थनां करोति यत् भोः जलं मम शरीराय संरक्षक औषधयः देहि येनाहं निरोगी भवेयम् । यथा–

आपः पृणीत भेषजं वरूथ तन्वे मम । ज्योक्च सूर्यं दृशे ॥ १२

जलाभावे पर्यावणस्य रक्षणं दुष्करम् । जलप्रदूषणे सर्वाण्यपि तत्त्वानि प्रदूष्यन्ते । विना जलं सृष्टेः कल्पना अपि कर्तुं न सक्नुमः । सकाले वृष्टिः भवति चेत् पृथिवी सस्यशालिनी भवति । तदा सर्वत्र समृद्धिः भवति । पर्यावरणं संरक्षितुं जलं जलस्थानानि च सर्वथा रक्षणीयानि । ऋग्वेदे प्रार्थ्यते यत् हे परमात्मन् प्रदूषणरहितं जलमौषधयः वनानि च प्रयच्छ इति ।

एवं च सर्वेषां सुखजीवनार्थंजलसंरक्षणं नूनं कर्तव्यम् ।

---

१०. तै. आ. १. २६. ७ ११. म. ना. उ. १२. ऋ. वे. १. २३. २



यमुनानद्याः जलं कठोरविषेण पूर्वमेव तपत् आसीत् । तस्य वीचयः रक्तपीतवर्णं भूत्वा भयं जनयन्त्यः उत्पतन्तिस्म । पुरुषोत्तमस्य कृष्णस्य लङ्घनेन जलम् उच्चरत् अभूत् । कालीयस्य विषेण संयुक्तं जलं शतयोजनपर्यन्तं व्याप्तमासीत् । बली बुद्धिमान् च कृष्णः कालीयस्य उपरि सुलीलया नर्तयन् तं मर्दवान् । बहुकालं यावत् मर्दनेन तस्य सम्पूर्णं विषं दूरीकृतवान् । गते काले यमुना पूर्वावस्थां प्राप्तवती । तेन जलेनैव तत्रत्य पर्यावरणं सुस्थिरम् अभवत् । जलस्रोतसां प्रभावश्च अन्यः विषयः भागवते एवं प्रतिपादितः अस्ति । महर्षेः कर्दमस्य आश्रमस्य तीरे सरस्वतीनदीजलेन पूरितः बिन्दुनाम ह्रदः आसीत् । तस्य जलं कर्दमप्रभावेण पवित्रमयं, मङ्गलमयं, अमृततुल्यं च आसीत् । सरः परितः विभिन्नैः शब्दैः कूजन्तः प्राणिपक्षिणः एवं अश्वत्थन्यग्रोदपनसादि पवित्रवृक्षाः लताश्च आसीत् । नदीसरसोः प्रभावेण सर्वऋतुषु फलपुष्पैः सम्पन्नैः वृक्षैः आश्रमस्य सौन्दर्यं द्विगुणम् अभवत् । मदोन्मत्तपक्षिकूजनम् आसीत् । सन्तुष्टाः मयूराः बर्हमाच्छाद्य नृत्यन्तः आसन् । वृक्शोपरि स्थितः कोकिलः मदेन कुहू, कुहू इति धन्विना अन्यान् आह्वयन्ति इव दृश्यतेस्म । एवमेव कदम्बः, चम्पकः, अशोकः, करञ्जः, बकुलः, असनः, कुन्दः, मन्दारः, कुटजः, चूतः इत्यादिभिः वृक्षैः तत्रत्य परिसरः रमणीयमयम् आसीत् । सरोवरे कारण्ड–प्लव–हंस–कुरज–जलकुक्कुटाः पक्षिणः सुमधुरं कूजन्तः आसन् । हरिण–गज–सिंह–वानर–नकुल–कस्तूरिमृगादयः वन्यजीविनः स्वेच्छया सञ्चरन्तिस्म । नदीप्रभावेण सर्वे वृक्षाः समृद्धाः मृगपक्षिणः सन्तुष्टाः आसन् ।

पुरञ्जनोपाख्यान इत्यस्यां कथायां पुरञनः वासयोग्यस्थलम् अन्विष्यन् पृथिव्यां सर्वत्र अटन् आसीत् । एकदा हिमालयस्य दक्षिणे पार्श्वे नवद्वारैः सम्पन्नं नगरं दृष्टवान् । नगरं परितः बृहद् दुर्गाः शोभमानाः आसन् । नगरात् बहिः वृक्षलताभिः आवृतस्य उद्यानवनस्य मध्ये विशालः सरः आसीत् । तत्र नैकाः पक्षिणः भ्रमराः सन्तोषेण कूजन्तः आसन् । सरसः तीरे विद्यमानानां वृक्षाणां शाखाः पर्णाः च तत्रत्य निर्झरजलबिन्दुभिः सुशीतलाः आसन् । तेन परिसरस्य तस्य शोभा अभिवर्धिता आसीत् । उद्यानवने पिकस्य कुहू कुहू कूजनं पथिकेभ्यः उद्यानवनं व्याहृत्य स्वागतवचनमिव भासतेस्म । भागवते भारतवर्षवर्णने बह्वीनां नदीनां नामानि उल्लिखितानि ।

एतासां नदीनां स्मरणेन सर्वेषां जीवनं पावनं भवति । एतासु नदीषु चन्द्रवसा, ताम्रपर्णी, अवटोदा, कृतमाला, वैहायसी, कावेरी, वेणी, पयस्विनी, शर्करावर्ता, तुङ्गभद्रा, कृष्णा, वेण्या, भीमरथी, गोदावरी, निर्विन्ध्या, पयोष्णी, तापी, रेवा, सुरसा, नर्मदा, वेदस्मृती, त्रिसामा, कौशिकी, मन्दाकिनी, सरस्वती, गोमती, सरयू, रोधस्वती, वितस्ता, असिक्नी, विश्वा एताः महानद्यः इति प्रकीर्तिताः ।

सर्वान् लोकान् पापरहितान् कुर्वत्याः पुण्यदात्र्याः कौशिकीनद्याः विचारः भागवतपुराणे एवम् उक्तम्–

सा चाभूत्सुमहापुण्या कौशिकी लोकपावनी ॥ ७

ऋषिपत्नी सत्यवती कौशिकीनदी भूत्वा लोकं पावनी कृतवती इति अस्यार्थः ।

गजेन्द्रमोक्षप्रसङ्गेऽपि नदीसरोवरादीनां विषयः प्रतिपादितः । त्रिकूटपर्वतस्य सानुप्रदेशे विभिन्नवृक्षैः आवृताः देवोद्याने नैकाः नद्यः निर्मलेन जलेन प्रवहन्तिस्म । तीरस्थाः पुलिनः रविकिरणैः शोभन्तेस्म । तत्र पक्षीणां रवः श्रूयतेस्म । देवाङ्गनाः नदीषु सरोवरेषु स्नानं कुर्वन्तिस्म । तेन तत्रत्य जलं सुगन्धमतम् आसीत् । वायवः च सौरभयुताः वहन्तिस्म ।

सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः ।
देवस्त्रीमज्जनामोदसौरम्भाब्वनिलैर्युतः ॥ ८

जलं जगत्पापहारकं माता इति ब्रह्माण्डपुराणे एवम् उक्तम्–

तास्तु नद्यः सरस्वत्यः सर्वा गङ्गासमुद्रगाः ।
विश्वस्य मातरस्सर्वाः जगत्पापहराः स्मृताः ॥ ९

ताः सर्वाः नद्यः तु सरस्वत्यः गङ्गासमुद्रगाः । सर्वाः जगत्पापहराः विश्वस्य मातरः स्मृताः इति सूतमुनिः ऋषीन् प्रति अवदत् । एवं जलस्य वर्णनं पुराणेषु वर्तते । जलम् अन्यत् नयनमिति भगीरथकथायां श्रीमद्रामायणे अस्ति । सः मन्दाकिनीं स्वर्गात् भूमिम् आनीय ततः पातालं नीतवान् इति कथा अस्ति । एवं हलधरः हलेन यमुना नद्यः जलम् उपयोगाय नीतवान् इति वर्णितम् । पुराणेषु नदीसरोवरादीनां वर्णनमिव क्षीरसमुद्रस्य, इक्षुसमुद्रस्य, लवणसमुद्रस्य, मद्यसमुद्र–

---

७. भा. पु. ९. १५. १२ ८. भा. पु. ८. २. ८ ९. ब्र. पु. १६. ३९



स्यापि वर्णनं दृश्यते । वायुः यथा प्राणशक्तिः तथैव जलं जीवशक्तिः । अतः वेदपुराणेषु अस्य बहुधा वर्णनं विद्यते । भारतदेशस्य बहूनि जलमूलानि कलुषितानि वर्तन्ते । अद्य यादृशं जलमालिन्यं पश्येम । त्रिंशत् वर्षेभ्यः पूर्वं तादृशं नासीत् ।

अत्र कारणम् औद्योगिक यान्त्रिकाभिवृद्धिः, जनसङ्ख्याभिवृद्धिः, नगराणाम् अभिवृद्धिः, यन्त्रागाराणां कलुषितजलं, कृषकैः उपयुज्यमानानि रासायनिकवस्तूनि जलमालिन्यकारणानि । भारतदेशस्य मुख्याः चतुर्दशनद्यः गङ्गायमुनागोदावरी नर्मदाकृष्णाद्याः तीव्रतरमालिन्यं प्राप्तवत्यः । तेन तत्रत्याः जलचरजीविनः प्राणिपक्षिणः च नाशं यान्ति । प्रत्येकस्मिन् वर्षे ३५००० मृतदेहानां जलविसर्जनं कुर्वन्तीति संशोधकाः वदन्ति । पुण्यदायिनी पापनिवारिणी गङ्गा अस्ति । परन्तु अद्य एषा एव अन्यनद्यापेक्षया कलुषिता विद्यते । त्याज्यवस्तूनां विसर्जनं अर्धदग्धमानवानां विसर्जनम् इत्यादिभिः कारणैः जलमालिन्यं बहुतरं जायमानम् अस्ति । एतां नदीम् आश्रितैः आग्रा–देहली–मथुरेत्यादिभिः निस्सरतमलिनजलं तस्याः मालिन्यकारणं भवति । प्रतिदिनं द्विशतदशलक्षलीटर् त्याज्यजलं तथा द्विशतदशलक्षलीटर् यन्त्रागारत्याज्य एतां नदीं प्रविशतीति जलज्ञाः वदन्ति ।

अन्यानि जलमालिन्यवस्तूनि एतानि–

१) आहारवस्तुसंस्करणत्याज्यसम्बद्धाः अमोनिया ।
२) यन्त्रागारसम्बद्धानि त्याज्यवस्तूनि ।
३) कृषिभूमिसम्बद्धं तथा वाणिज्यसम्बद्धं एवं गृहोत्पन्नरासायनिक–सम्बद्धञ्च नैट्रेट् फास्पेट् ।
४) बृहत् नगरात् नदीं प्रविश्यमानानि रासायनिकत्याज्यवस्तूनि ।
५) भवननिर्माणकर्मणा समुत्पन्नः रजतसमूहः, पङ्कादयः च ।
६) अभिगव्यवस्तूनां विसर्जनम् ।
७) नौकादीनां त्याज्यवस्तूनि ।

पर्यावरणसंरक्षणार्थम् आदौ जलसंरक्षणम् अस्माभिरेव कर्तव्यम् ।

१) जलं ये धरन्ति– नदी, सरोवरः, कूपः इत्यादयः तेषां संरक्षणम् ।
२) वृक्षारोपणम् अधिकाधिकं करणीयं, तेन अन्तर्जलमपि वर्धते ।
३) अपव्ययात् जलसंरक्षणम् ।

परलिङ्गे विलीनस्य परमानन्दचिन्मये ।
कुतो देहेन सम्बन्धो देहविद्धासनं भ्रमः ॥
देहाभिमानहीनस्य शिवभावे स्थिरात्मनः ।
जगदेतच्छरीरं स्याद्देहेनैकेन का व्यथा ॥
शिवज्ञानैकनिष्ठस्य नाहंकारभवो भ्रमः ।
न चेन्द्रियभवं दुःखं त्यक्त देहाभिमानिनः ॥
न मनुष्यो न देवोऽहं न यक्षो नैव राक्षसः ।
शिवोहमिति यो विद्ध्यात्तस्य किं देहकर्मणा ॥

(सिद्धान्तशिरोमणिः, १६. ४३–४८)

तत् सकायस्थलस्य परयोगी औपचारिदेहित्वात् (देहाभिमानरहितः) सर्वं जगदिदं तम् आत्मा इति भावयन्, तथा च मायासम्बन्धं त्यक्त्वा तदर्थं मायारहितः तस्मात् सः अकायः इति कथयति । परस्य योगेऽपि देहसम्बन्धमस्तीति, सः तं शिवं प्रति योगी अकाय इति कथयति । परमानन्दरूपं, चिन्मयम् एव तस्मात् परलिङ्गे विलीनवान् तं योगिनां प्रति देहसम्बन्धः कथम् एव सम्भवति । सः देही एव प्रदर्शितः (देहधारीति भावयेत्) तादृशभ्रमा एव भवति । देहाभिमानविहीनस्य शिवोऽहं इति भावनया एव स्थितवान् भवति । तं परयोगिं प्रति इदं समस्तं जगत् अपि शरीरं स्यात् इति । परन्तु एकेन अयं देहेन का व्यवस्था एव सम्भवति । देहाभिमानिनः त्यक्तः कृतवन्तः, शिवज्ञानादेव निष्ठः तं परयोगी अहंकार भावभ्रमः एव वा च इन्द्रियभावं दुःखम् अपि न सम्भवति । अहं न मनुष्यो न देहोऽहं, न यक्षो, नैव राक्षसः परन्तु अहं शिवेव इतिबुध्या यः भावयति तादृश देहकर्मणा (देहव्यवहारेण) किं प्रयोजनं न सम्भवति ।

**परकायस्थलम्–**

वशीकृतत्वात् प्रकृतेर्मायामार्गातिवर्तनात् ।
परकायोऽयमाख्यातः सत्यज्ञानसुखात्मकः ॥
परब्रह्मवपुर्यस्य प्रबोधानन्दभादुरम् ।
प्राकृतेन किमेतेन शरीरेणास्य जायते ॥
सम्यग् ज्ञानाग्निसन्दग्ध जन्म बीजकलेवरः ।
शिवतत्त्वावलम्बी यः परकायः स उच्यते ॥



## आकरग्रन्थाः


१) अमरकोषः, कर्तृ– अमरसिंहः, काव्यालयप्रकाशनम्, जयनगर, मैसूरु–२००५
२) भागवतपुराणम्, कर्तृ–वेदव्यासः, गीताप्रेस्, गोरखपुर–२००७ ।
३) राजराजेश्वरयतिविरचितं मङ्गलाष्टकम्, सिद्धलिङ्गेश्वरप्रकाशनम्, कलबुर्गि–२००५ ।
४) मनुस्मृतिः, कर्तृ–मनुः, समाजपुस्तकालय, शिवाजीबीदि, धारवाड–२०१० ।
५) मार्कण्डेयपुराणम्, कर्तृ–वेदव्यासः, खेमराज श्रीकृष्णदासप्रकाशन, मुम्बई–२००१ ।
६) भागवतपुराणम्, कर्तृ–वेदव्यासः, गीताप्रेस्, गोरखपुर–२००७ ।
७) भागवतपुराणम्, कर्तृ–वेदव्यासः, गीताप्रेस्, गोरखपुर–२००७ ।
८) भागवतपुराणम्, कर्तृ–वेदव्यासः, गीताप्रेस्, गोरखपुर–२००७ ।
९) ब्रह्माण्डपुराणम्, कर्तृ–वेदव्यासः, विद्यागणपतिप्रकाशनम्, बेङ्गळूरु–२००५ ।
१०) तैत्तिरीयारण्यकम्, विद्यागणपतिप्रकाशनम्, बेङ्गळूरु–२००२ ।
११) महानारायणोपनिषत्, श्रुतिप्रियवेदभाष्यप्रकाशनसमितिः, बेङ्गळूरु–२००४ ।
१२) ऋग्वेदसंहिता, चौखम्बा संस्कृतप्रतिष्ठानम्, देहली–२०१६ ।



**Vignesha Sharma K. V.**
Research Scholar
Department of Sanskrit
University College
Mangalore-575001, Karnataka
Mobil : 9901375308
E-mail : vighnesha.sharma.11@gmail.com


(**विघ्नेश शर्मा के. वि.** नामकः संशोधनच्छात्रः मङ्गळूरुमहानगरे विराजमाने युनिवर्सिटि कालेज इत्यस्य संस्कृतविभागस्य सहायकप्राध्यापकानां **डा. कुमारसुब्रह्मण्य भट्ट** महाभागानां मार्गदर्शनेन **“श्रीमद्भागवतमहापुराणे प्रकृतिसौन्दर्यम् एकं विमर्शात्मकम् अध्ययनम्”** इत्यस्मिन् विषये मङ्गळूरुविश्वविद्यालये संशोधनकार्ये रतः ।)

*******

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# सिद्धान्तशिखामणिग्रन्थोक्तरीत्या
# सकाय-अकाय-परकायस्थलविषयनिरूपणम्

**विद्वान् डा. के. एम्. महदेवय्यः (मैसूरु)***

**पीठिका–**

श्रीशिवयोगिशिवाचार्यः तस्यविरचितसिद्धान्तशिखामणिग्रन्थे एकोत्तरशत –स्थलविषयं सम्यक् निरूपितवान् । तेषु अङ्गस्थलम्, लिङ्गस्थलम् इति विभागद्वयं विद्यते । चतुःचत्वारिंशत् अङ्गस्थलानि तथा च सप्तपञ्चाशत् लिङ्गस्थलानि तत्र वर्तते । लिङ्गस्थले माहेश्वरस्थलान्तर्गत नवविधलिङ्गस्य प्रसङ्गः अस्ति । तेषां नामानि क्रमशः क्रियागमस्थलम्, भावागमस्थलम्, ज्ञानागमस्थलम्, सकायस्थलम्, अकायस्थलम्, परकायस्थलम्, धर्माचारस्थलम्, भावाचारस्थलम्, ज्ञानाचारस्थलम् च इति । मया निरूपित पूर्वोक्त अस्मिन् लेखने अयं विषयः एवं प्रस्थापितम्–

**सकायस्थलविषयः–**

दीपं विना यथा गेहे नान्धकारो निवर्तते ।
ज्ञानं विना तथा चित्ते मोहोऽपि न निवर्तते ॥
परस्यया तनुज्ञेयाऽदेहकर्माभिमानिनः ।
तया सकायो लोकोऽयं तथात्मत्वनिरूपणात् ॥
कायं विना समस्तानां न क्रिया न च भावना ।
न ज्ञानं यत्ततो योगी कायवानेव सञ्चरेत् ॥
शिवैक्यज्ञानयुक्तस्य योगिनोऽपि महात्मनः ।
काययोगेन सिद्ध्यन्ति भोगमोक्षादयः सदा ॥
काष्ठं विना यथा वह्निर्जायते न प्रकाशवान् ।
मूर्तिं विना यथा योगी नात्मतत्त्वप्रकाशवान् ॥
मूर्त्यात्मनैव देवस्य यथा पूज्यत्वकल्पना ।
तथा देहात्मनैवास्य पूज्यत्वं परयोगिनः ॥
निष्कलो हि महादेवः परिपूर्णः सदाशिवः ।
जगत् सृष्ट्यादिसंसिद्ध्यै मूर्तिमानेव भासते ॥



ब्रह्माद्या देवताः सर्वा मुनयोऽपि मुमुक्षवः ।
कायवन्तो हि कुर्वन्ति तपः सर्वार्थसाधकम् ॥
तपो हि मूलं सर्वासां सिद्धीनां यज्जगत्रये ।
तपस्तत्कायमूलं हि तस्मात्कायं न सन्यजेत् ॥
(सिद्धान्तशिरोमणिः, १६. ३४–४२)

पुंसां (जीविनां) शिवस्य दर्शनादेव जन्मरोग (जननमरणरूपसंसार–बन्धनम्) निवर्तनम् । अयं शिवदर्शनं ज्ञानचक्षुषां सुलभ इति ज्ञानिभिः कथितः । गृहे अन्धकारं दीपं विना यथा निवर्तते, तथा चित्ते मोहोऽपि शिवज्ञानं विना यथा न निवर्तते । एतादृशगुणसम्पन्नः सकायस्थलं क्रमिष्यति । अहं स्थूलः, अहं करिष्यामि इत्यादि देहकर्माभिमानिनः च या परस्य (शिवयोगिभिः) यत् शरीरं तदा एव अयं जगत् 'सकाय' इति कथयति । कारणं तु लोके अयं तं परस्य जनानां तद् आत्मतत्वं इति निरूपणम् । अहं स्थूलः, अहं कृशः इत्यादि देहाभिमानशून्यरहितः तथा च अहं क्रियावान्, अहं पश्यामि इति कर्माभिमानरहितः देहदारिपर एव (परशिवयोगि एव) सकायः सः सर्वात्मा इति तस्य कायवानेव अयं प्रपञ्चः सकाय एव भवति । शिवैकज्ञानयुक्तस्य योगिनः अपि महात्मानाम् अपि कायसम्बन्धात् एव सदा भोगमोक्षादयः सिद्ध्यति । काष्ठं विना अग्निः यथा न प्रकाशवान् भवति, तथा मूर्तिरूपविग्रहं विना देवस्य पूजा यथा न सम्भवति, तथा देहसम्बन्धादेव पर (शिव) योगिनां पूज्यत्वं सम्भवति । परिपूर्णः, सर्वदा मङ्गळमयः एव सः महादेवः निष्कलो हि तदर्थनिराकरयुतः सः जगतः सृष्ट्यादि संसिद्ध्यै मूर्तिमानेन भासते । ब्रह्मादि सर्वाः देवताः, मुमुक्षवः सर्वे मुनयः सर्वसाधकं (सकल–इष्टार्थसिद्धिकरं दत्तवान्) तपः एवं देहधारणद्वारा एव हि कुर्वन्ति । त्रिषु लोकेषु एव सकलसिद्धीनां तपो हि मूलं साधनं इति । तत् तपः प्रति कायमूलं हि । तस्मात् कारणात् ज्ञानिः शरीरं न सन्त्यजेत् ।

**अकायस्थलम्–**

औपचारिकदेहित्वाज्जगदात्मत्वभावनात् ।
मायासम्बन्धराहित्यादकायो हि परः स्मृतः ॥
परस्य देहयोगेऽपि न देहाश्रयविक्रिया ।
शिवस्येव यतस्तस्मादकायोऽयं प्रकीर्तितः ॥

**Journal of Veda Samskrita Academy**
**ISSN 2250-1711**
**Volume XVI : July to December – 2020**

# भरतमुनिकृतम् अष्टरसवर्णनम्

**डा. रेखादेवि एस्. एच्. (बेङ्गळूरु)***

**पीठिका–**

“विभावानुभावसञ्चारिसंयोगात् रसनिष्पत्तिः” इति भरतमुनिना प्रोक्तं प्रख्यातरस– सूत्रम् । तत्र हेतुः विभावः, विभावस्य प्रतिक्रियपरिणामः अनुभावः पुनः पुनः प्रकाश्य अदृश्यन्ते सञ्चारिभावाः । एतेषां त्रयाणां भावानां संयोगे सति रसत्वम् अनुभूयते इति रससूत्रस्य अर्थः ।

रस इति कः पदार्थः? रस्यते आस्वाद्यते इति रसः । अनुभववेद्यः रसः ‘रसो वै सः’ सः एव रसः । यथा हि नानाविधव्यञ्जनौषधिद्रव्यसंयोगात् रसनिष्पत्तिः । तथा नानाभावोपभोगात् रसनिष्पत्तिः । यथा नानाविधव्यञ्जन–द्रव्यादीन् संयुज्य नूतनरुचिः जायते । तथा नानाभावानाम् उपभोगात् स्थायिभावाः रसत्वं स्फुरन्ति । स एव आनन्दानुभूतिसौन्दर्यानुभूतिरेव रसः । यथा सुसंस्कृतजनाः बहुविधव्यजनोपेतभोजनं भुङ्क्त्वा आनन्दम् अनुभवन्ति । तथैव सहृदयप्रेक्षकाः बहुविधव्यजनोपेतस्थायिभावान् अष्टरसादीन् अनुभवं अनुभूय आनन्दम् अनुभवन्ति ।

अतः स एव रसः अष्टौ नाट्ये रसाः इति भरतमुनिना विभागः कृतः । यथा–

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥
रसेषु उत्पाद्य, उत्पादक, उत्पाद्य सम्बन्धः ।
शृङ्गारात् हि भवेत् हास्यो रौद्रात् च करुणो रसः ॥
वीरात् चैव अद्भुतोत्पत्तिः बीभत्सात् च भयानकः ।

शृङ्गारस्य अनुकृतिः हास्यः शृङ्गारात् जायते । रौद्रस्य कर्मणः करुणा रौद्रात् उद्भवा वीरस्य कर्मणः अद्भुतः, वीरात् जायते, बीभत्सात् भयं जायते ।



इन्द्रियाणि मनोवृत्तिर्वासनाः कर्मसम्भवाः ।
यत्र यान्ति लयं तेन सकायोऽयं परात्मना ॥
पराहन्तामनुप्राप्य पश्येद्विश्वं चिदात्मकम् ।
न देहीति भ्रमस्तस्य निश्चिता हि शिवात्मना ॥
स्वस्वरूपं शिवाकारं ज्योतिस्साक्षाद्विचिन्तयन् ।
देहवानपि निर्देहो जीवन्मुक्तो हि साधकः ॥
देहस्तिष्ठतु वा यातु योगिनः स्वात्मबोधिनः ।
जीवन्मुक्तिर्भवेत् सद्यश्चिदानन्दप्रकाशिनी ॥
आत्मज्ञानावसनं हि संसारपरिपीदनम् ।
सूर्योदयेऽपि किं लोकस्तिमिरेणोपरुद्ध्यते ॥
देहाभिमाननिर्मुक्तः कलातीतपदाश्रयः ।
कथं याति परिच्छेदं शरीरेषु महाबिधः ॥

(सिद्धान्तशिरोमणिः, १६. ४९–५७)

प्रकृतेः तस्य वशे कृतत्वात् तथा च मायामार्गं अतिवर्तनात् तिष्ठन् तम् अकाय एव सच्चिदानन्दस्वरूपात्मकम् इति भावयन् तमेव परकाय इति कथयति । सच्चिदानन्दस्वरूपयुतः परशिवब्रह्मैव यस्य शरीरेण भवति, तादृश परकायरूप–योगिनां प्रति इदं प्राकृतं शरीरेण किं हानिः न सम्भवति । सम्यक् ज्ञानेन इति अग्नौ (शिवाद्वैतज्ञानेन अग्नौ) जन्मबीजं कलेवरः, तथा च शिवतत्त्वावलम्बिनः योगी एव परकायः इति कथयति । कर्मपाशेन सम्भवाः, मनो प्रवृत्तिवासनाः, श्रोत्र, त्वक्, नेत्र, जिह्वा, घ्राण, वाक्, पाणि, पाद, पायुउ, उपस्था इति (पञ्च ज्ञानेन्द्रियः, पञ्च कर्मेन्द्यः च) दशेन्द्रियव्यापाराः च यत् परशिवब्रह्मणि लयं प्राप्नोति तं परब्रह्म तस्मै कायेति तमेव परकायः इति ।

परब्रह्म परमात्मा एव अहं इत्येवं परहन्ता स्वरूपं प्राप्यमानं, समस्तविश्वं चिदात्मकं इति दृष्ट्वा अयं परयोगि सदेहि इति उक्त्वा भ्रान्तिः, कारणं तु तस्य देहः एव चिदाकाररूपज्योतिः इति साक्षात् चिन्तितः, अयं परकायस्थलस्य साधकः देहवानपि सह निर्देहि (देहभावनारहितः तथा च पुनः देहान्तरं प्रप्ति करोति) जीवन्मुक्तः आसीत् । स्वस्वरूपज्ञानसम्पन्नः परकाय योगीस्थूलदेही आसीत् अथवा न आसीत् चिदानन्दप्रकाशरूपजीवन्मुक्तिः सद्यः भवेत् । संसारपरिपीडनं (जननमरणरहितसंसारबन्धनम्) आत्मज्ञावसानपर्यन्तम्

आसीत् । सूर्योदयेऽपि लोकः तिमिरोपरुध्यते । सूर्योदयानन्तरं तिमितः सास्ति तदा आत्मज्ञानानन्तरं संसारबाधा न सम्भवति । देहाभिमाननिर्मुक्तः निवृत्त्यादि कलातीतपरब्रह्मपदविसम्पाधितः महाबिधः (महाज्ञानी) परकाययोगी शरीरेषु कथयति परिच्छेदम्? इति तदर्थं न परिच्छेदम् इति ।

**उपसंहारः–**

तस्यैव परकायस्य धर्माचारो य इष्यते ।
स धर्मः सर्वलोकानामुपकाराय कल्पते ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा ।
दानं पूजा जपो ध्यानमिति धर्मस्य सङ्ग्रहः ॥
शिवेन विहितो यस्मादागममैर्धर्मसङ्ग्रहः ।
तस्मात्तमाचरन् विद्वान् तत् प्रसादाय कल्पते ॥
सदाचारप्रियः शम्भुः सदाचारेण पूज्यते ।
सदाचारं विना तस्य प्रसादो नैव जायते ॥

(सिद्धान्तशिरोमणिः, १६. ५८–६०, ६६)

परब्रह्मशरीरिणः तं शिवयोगी यत् धर्माचारः इष्यते । तदेव धर्माचारः समस्तजनानां कल्याणार्थं समर्थं भवति । हिंसा न कुर्यात्, स्तेयं न कुर्यात्, सत्यं वदेत्, ब्रह्मचर्यपरिपालनं कुर्यात्, दया, क्षमा, दानं, शिवपूजा, पञ्चाक्षरमहामन्त्रस्य जपं, शिवध्यानम् एव धर्मसङ्ग्रहः इति सन्ति । शिवेन अहिंसादि धर्मसङ्ग्रहः शिवागमेषु कथ्यते । तादृशधर्मसङ्ग्रहान् आचरितविद्वांसः शिवप्रसादप्राप्तिविषयो समर्थः भवति । शिवः सदाचारप्रियः, सदाचारेण पूजितः, सदाचारं शिवे निवेश्यसकलं कार्याकार्यं विवेकातः । वर्तते यो महाभागः न सङ्गरहितो भवेत् इति श्लोकद्वारा लेखनं समाप्तं भवति ।
इतोऽपि अधिकविषयः जिज्ञासुभिः सिद्धान्तिशिखामणिग्रन्थः द्रष्टव्यः ।

**परामर्शनग्रन्थाः**

१. अनुभवसूत्रम्, श्रीमायिदेवविरचितं विमर्शात्मकपरिष्करणम्,
वि. डा. हेच्. पि. मल्लेदेवरु, प्राच्यविद्या संशोधनालयः, मैसूरु–१९८३
२. क्रियासारः, श्रीनीलकण्ठशिवाचार्यविरचितः, भागत्रयोपेतः, एडिटेड् वि. डा. हेच्. पि. मल्लेदेवरु, प्राच्यविद्या संशोधनालयः, मैसूरु–१९५४



३. कैवल्यसारः, श्रीमरितोण्टदार्यः विरचितः,
एडिटेड् वि. डा. हेच्. पि. मल्लेदेवरु, प्राच्यविद्या संशोधनालयः, मैसूरु–१९८८
४. शिवधारणचन्द्रिका, श्रीनन्दिकेश्वरशिवाचार्यविरचिता,
शिवकुमारव्याख्या सहिता, काशी–१९०५
५. वीरशैवानन्दचन्द्रिका, श्रीमरितोण्टदार्यविरचिता, कन्नडानुवादः,
श्रीसिरसिगुरुशान्तशास्त्री, श्रीनन्दिकेश्वर एलेक्ट्रिक् प्रेस्, मैसूरु–१९६०
६. वीरशैवेन्दुशेखरः, व्याकरणतीर्थेन पं. सदाशिवशास्त्रिणा विरचितः,
श्रीमहालिङ्गस्वामिना काश्यां जङ्गमवाटिकासंस्थाने प्रकाशितः–१८५४
७. श्रीकरभाष्यम्, श्रीपति पण्डिताचार्यविरचितम्, सम्पुटः–०१,
प्राच्यविद्या संशोधनालयः, मैसूरु–१९७७, १९७८
८. श्रीकरभाष्यम्, श्रीपति पण्डिताचार्यविरचितम्, सम्पुटः–०१,
प्राच्यविद्या संशोधनालयः, मैसूरु–१९७७, १९७८
९. सिद्धान्तशिखामणिः, श्रीशिवयोगिशिवाचार्यविरचितः,
विमर्शात्मकपरिष्करणम्, प्राच्यविद्या संशोधनालयः, मैसूरु–१९८२
१०. सिद्धान्तशिखामणिः, श्रीशिवयोगिशिवाचार्यविरचितः,
श्रीकाशीनाथशास्त्रीकृतः, भावप्रकाशव्याख्या, पञ्चाचार्य प्रेस्, मैसूरु–१९८२
११. वीरशैवेन्दुशेखरः, व्याकरणतीर्थेन पं. सदाशिवशास्त्रिणा विरचितः, कन्नडानुवादः,
वि.बि. राजशेखरय्यमहोदयः, श्रीमद्वीरशैव सद्बोधना संस्थानं,
रम्बापुरि संस्थानं, बाळेहोन्नूरु, कर्नाटक
१२. अनादिवीरशैवसारसङ्ग्रहः, (सं) श्री मणूरु मल्लिकार्जुनशास्त्री वीरशैवलिङ्गीब्राह्मण ग्रन्थमाला, सोल्लापुर, प्रथमभागः,–१९०५

**विद्वान् डा. के. एम्. महदेवय्यः,**
प्राध्यापकः, शक्तिविशिष्टाद्वैतवेदान्तविभागः
प्रांशुपालश्च, सर्वकारीय महाराज संस्कृत महाविद्यालयः,
कर्नाटकसंस्कृतविश्वविद्यालयस्य घटकमहाविद्यालयः
न्यू सय्याजिराव् रोड्, मैसूरु–२४, कर्नाटक
चरदूरवाणी– ९९८००५७५६३

*******

**६. भयानकरसः–**

भयानको नाम भय भयस्थायिभावाः, कृष्णवर्ण, कालदेवताः ।
विभावः– विकृतरव, सत्वदर्शन, शिवालूकत्रास, शून्यागर, अरण्यगमन, स्वजनवधबन्धदर्शश्रृतिकथादिभिः विभावैः भयानकरसः उत्पद्यते ।
अनुभावः– नयनचपल, पुलक, वैवर्ण्य, स्वरभेदादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः ।
व्यभिचारिभावः– स्तम्भ, स्वेद, गद्गद, रोमाञ्च, वेपथु, स्वरभेद, वैवर्ण्य, शङ्क, मोह, दैन्य, आवेग, चपलत, त्रास, अपस्मार, मरणादिभिः व्यभिचारिणः
विकृतस्वरः पिशाचादिदर्शनम् अरण्यगमन शून्यगृहगमन गुरुराजनाम् अपराधान् एतैः विषयैः भयानकरसः उत्पद्यते ।

**७. बीभत्सरसः । –**

बीभत्सो नाम जुगुप्सस्थयिभावः, नीलवर्णः, महकाल देवताः ।
विभावः– अहृद्य, अप्रिय, अचोक्षाश्रवणदर्शनकिर्तनादि विभावैः बीभत्सरस जायते ।
अनुभावः– सर्वाङ्गसंहार, मुखविकूणनोल्लेखन, इष्ठीवन, उद्वेजनादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः ।
व्यभिचारिभावः– अपस्मार, उद्वेग, आवेग, मोह, व्याधि, मरणादयः, अनभिमतदर्शनेन, गन्धरसस्पर्शदोषैः बीभत्सरसः समुद्भवति ।

**८. अद्भुतरसः–**

विस्मयस्थाहिभावः, पितवर्णः, ब्रह्मदेवताः ।
विभावः– दिव्यजनदर्शन, उपवन, देवकुलादिगमन, सभा, विमान, माया, इन्द्रजाल प्रदर्शनादि विभावैः अद्भुतरस जायते ।
अनुभावः– नयनविस्तार, अनिमेषप्रेक्षण, रोमाञ्च, अश्रृ, स्वेद, हर्ष, साधुवाद, दान, हाहाकार, बाहुवदनचेलाङ्गुलीभ्रमणादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः ।
व्यभिचारिभावः– स्तम्भ, अश्रृ, स्वेद, रोमाञ्च, आवेग, सम्भ्रम, जडता, प्रलयादयः व्यभिचारिणः ।
एवं अष्टरसस्य वर्णनम् ।



**१. प्रथमः शृङ्गारस्य वर्णनम्–**

"शृङ्गरीयते इति शृङ्गारः" इति स्थायिभाव, श्यामवर्णः,विष्णुः देवता । शृङ्गारो नाम रति स्थायिभाव प्रभवः । उज्ज्वलवेषात्मकः यत्किचित् लोके शुचि उज्ज्वलं दर्शनीयम् वा तत् शृङ्गारेणोपमीयते । यः तावत् उज्जवलवेषः सः शृङ्गारवानित्युच्यते ।

अस्मिन् संसारे यत् किञ्चित् शुद्धः पवित्रः उज्ज्वलः दर्शनियः च ततसर्वं शृङ्गाररसे अन्तर्भवति, यः उज्ज्वलवेषः सः शृङ्गारवान् इत्युच्यते । यथा गोत्रकुलाचारेभ्यः उत्पन्नः तथा आप्तोपदेश सिध्दानि पुरुषाणां नामानि एव । स च स्त्रीपुरुषाहेतुक उत्तम स्त्रीपुरुषाणां भावद्वारा तेषां प्रकृतिद्वारा सबन्धः शृङ्गाररसः ।

शृङ्गाररस्य विभवाः– इष्टजन, विषय, उपभोगः, क्रिड, लिल, उपवनगमन, अनुभवन, श्रवण, दर्शननादिभिः, विभावैः उत्पद्यते ।
अनुभावाः – नयनचातुर्य भ्रूक्षेप ,कटाक्ष, ललितमधुर अङ्गहार, वाक्यादिभिः अनुभावैः अभिनेतव्यः ।
व्यभिचारिभवाः – अत्र निर्वेद, ग्लानि, शङ्क, असूय, मदश्रमा, दैन्यं, चिन्ता, मोह, स्मृति, धृति, व्रिडा, चपलता, हर्ष, आवेग, जडता, गर्व, विषाद, औसुक्य, निद्र, अपस्मार, प्रमोद, आमर्ष, अवहित्थं, मति व्यादि, उन्माद, मरणं, त्रास, वितर्क, व्यभिचारिणः ।
तस्य द्वे अधिष्ठाने सम्भोग विप्रलम्भश्च ।

**१. सम्भोगः –**

सम्भुज्यतेअन्योन्यमुपभुज्यते यत्र स सम्भोगः । कान्तसंयोगः सम्भोगशृङ्गारस्य लक्षणम् । सम्भोगः तावत् ऋतु माल्य अनुलेपन, अलङ्कार, इष्ट्जनविषया, वरभवनमं, उपभोगः, उपवनगमनम, अनुभवन, श्रवण, दर्शन, क्रिडालीलादि विभावैः उत्पद्यते ।

**२. विप्रलम्भः–**

शृङ्गारः विप्रलम्भते मदनेन प्रवर्तते नायकः नायिका च यत्र स विप्र–लम्भः । कान्ताविरहो विप्रलम्भशृङ्गारश्च लक्षणम् । आलस्य, उग्रता जुगुप्सा, विहाय अन्य सर्वे भावाः, निर्वेद, ग्लानि, धुति, क्रिडा, चपलता, हर्ष, आवेग,

जडता, गर्व, विषाद, औत्सुक्य, निद्रा, अपस्मार, प्रभोध, आमर्ष अवहित्थ, मति, व्यादि, उन्माद, मरण, त्रासादिभिः विभावैः जयते विप्रलम्भः ।

**२. हास्यरसः–**

हासस्थायिभावात्मकः श्वेत वर्णः, प्रमथगण देवताः ।

विभावाः – विकृतवेषलङ्कार, धाष्र्य , लैल्य, कुहक. असत्प्रलाप, व्यग्यदर्शन, दोषोदारणादिभिः विभावैरुत्पद्यते ।

अनुभावाः – तस्य ओष्ठ, नास, कपोलस्पदन, दृष्टिव्याकोशाकुञ्चन अनुभावैः अभिनयः प्रयोक्तव्यः ।

व्यभिचरिभावाः – तन्द्र, निद्र, आलस्य, अवहित्थं, स्वप्न, प्रमोधा, आसूयादयः व्यभिचारिणः ।

हास्यरसः द्विविधः आत्मस्थ, परस्थ इति ।

आत्मस्थ– यदा स्वयं हसति तदा आत्मस्थः । विपरित अलङ्कारः विकृत आचरणम् विकृत अभिधान विकृत वेषभूषण विकृतालङ्कार विकारं कृत्व यः हसति सः आत्मस्थः हास्यरसः ।

परस्थ– यदा तु परं हासयति तदा परस्थः । विकृत आचारैः वाक्यैः अङ्गविकारैः विकृत च जानान् हासयति तदा परस्थः हास्यरसः

अयम हास्यरसः स्त्री निचप्रकृतिजनेषु भूयिष्टं दृश्यते ।

**तस्य षड्भेदाः ।**

१. स्मित २. हसित ३. विहसित ४. उपहसित ५. अपहसित ६. अतिहसित एते षड् भेदाः ।

एते पुनः उत्तम, मध्यम, अधम प्रकृति पुरुषेषु क्रमशः द्वे द्वे भेदाः वर्तते ।

उत्तम प्रकृति पुरुषः – स्मित, हसित ।

मद्यम प्रकृति पुरुष – विहसित, उपसित ।

अधम प्रकृति पुरुषः – अपसित, अतिहसित । इति द्वे द्वे भेदाः ।

**३. करुणा रसाः –**

करुणो नाम शोकस्थयिभावप्रभवः । रक्तवर्णः, रुद्रदेवतः । प्रियजनवधवार्ता दर्शनादि कठिण,निन्दा वचनैः करुणा रसो सम्भवति ।



अत्र विभावः– शााप, क्लेश, विनिपात, इष्टजनविप्रयोग, विभवनाश, वध, बन्ध, विद्रव, उपघात, व्यसनादि विभावैः जयाते करुणो रसः ।

अनुभावः– अश्रुपात परिदेवन, मुखशोषण, वैवर्ण्य, निःश्वासः, स्मृतिलोपादि अनुभावैः अभिनयः प्रयोक्तव्यः ।

व्यभिचारिभावाः– र्निवेद, ग्लानि, औसुक्य, आवेग, भ्रम, मोह, श्रम, भयम्, विषाद, दैन्य, व्यादि, जडत, उन्माद, अपस्मार, त्रास आलस्य, मरण, स्तम्भ, वेपथु, वैवर्ण्य, अश्रु, स्वरभेदादि, करुणरस्य व्यभिचारि भावाः ।

**४. रौद्ररसः**

रौद्रो नाम क्रोधस्थायिभावाः रक्त वर्ण, रुद्रः देवता । रक्षोदानवोद्धतमनुष्यप्रकृतिः सङ्ग्रामहेतुकः रौद्रो रसः जयते ।

विभावाः– क्रोध, घर्षण, अधिक्षेप, अनृतवचन, उपघात, वाक्यपारुष, अभिद्रोह, मात्सर्यादिभिः विभवैः उत्पद्यते ।

अनुभावाः– ताडन, पाटन, छेदन, प्रहरण, हरण, शस्त्रसम्पात, सम्प्रहार, रुधिराकर्षण, रक्तनयन, भ्रूकुटिकरण, दन्तोष्ठपिडन, गण्डस्पुरण, हस्ताग्रनिष्पेषणादि अनुभावैः अभिनेतव्यः ।

व्यभिचारिभावाः– सम्मोह, आवेग, अमर्श, चपलत, गर्व, स्वेद, वेपथु, रोमाञ्च, गद्गादि सञ्चारिभावाः ।

युद्धः, प्रहाराघातः, विकृतछेदन, विदरण, सङ्ग्राम, सम्भ्रमाद्यैः रौद्ररसः जायते ।

**५. वीररसः**

उत्सहः स्थायिभावाः, गौरववर्णः, महेन्द्रदेवताः । वीररसो नाम उत्त्म प्रकृतिः उत्साहात्मकः ।

विभावाः– असम्मोह, अद्यवसाय, नयविनय, बल पराक्रम, शक्ति, प्रतापादि ।

अनुभावाः– स्थैर्य, धैर्य, शौर्य, त्यागादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः

व्यभिचारिभवाः– धृति, मति, गर्व, आवेग, अमर्ष, स्मृति, रोमाञ्चादयः उत्साह, अद्यवसाय, विषादराहित्य, अवुस्मय, अमोहादि

विविधार्थविशेषात् वीररसः सम्भवति ।

पञ्चाक्षरीं मम इति, अस्याः परमविद्यायाः स्वरूपमधुनोच्यत इति । उक्तं च वीरमाहेश्वराचारसङ्ग्रहे– आश्रयेत् परमां विद्यां हृद्यां पञ्चाक्षरीं बुध इति । उक्तं चानुभवसूत्रेऽपि पञ्चाक्षरी परा विद्या सतारा तु षडक्षरी इति ।

**गुरुमहत्त्वप्रतिपादनम्–**

गुरोः महत्वं भाष्यकारेण एवं प्रतिपादितम्–

ततः पञ्चाक्षरीं शैवीं संसारभयतारिणी एव ।
तस्य दक्षिणकर्णे तु निगूढमपि कीर्तयेत् ।
छन्दोरूपमृषिं चास्य देवतान्यासपद्धतिम् ॥
(सिद्धान्तशिखामणिः, ६. १२)

अनन्तरं संसारभयं दूरीकरणं कृत्वा, शिवसम्बन्धिनां पञ्चाक्षरमन्त्रं (शिवपञ्चाक्षरीमहामन्त्रं) तं शिष्यस्य दक्षिणकर्णे निगूढतया (गूढं) अपि कीर्तयेत् । तादृशरीत्या तत् मन्त्रस्य छन्दः, रूपं, ऋषिदेवता तथा न्यासपद्धतिं च कीर्तयेत् इति रेणुकभगवत्पादाचार्योक्तप्रकारेण गुरुः उपदिशेत् इत्यर्थः । एतादृशपरविद्योपदेशानन्तरं मन्त्रपूतः शिष्यो गुरुपुत्र इति लोके प्रसिद्धो भवति । उक्तं च क्रियासारे तृतीयोपदेशे–

जिह्वालिङ्गान् मन्त्रशुक्लं कर्णयोनौ निषिच्य वै ।
जातः पुत्रो मन्त्रपूतः पितरं पूजयेद् गुरुम् ॥
निमज्जयति वै पुत्रं संसारे जनकः पिता ।
सन्तारयति संसारात् गुरुर्वै बोधकः पिता ॥
उभयोरन्तरं ज्ञात्वा पितरं सम्प्रपूजयेत् ।
(भाष्यकारेण पृ. सं. १३४, १३५ उल्लिखितम्)

केवलं जनकरूपपितुः पुत्रं संसारे निमज्जयति । परन्तु बोधकः (मन्त्रादि उपदेशकः) रूपपितुः संसारसागरात् तारयेत् । उभयोः साम्यवैषम्यं च ज्ञात्वा द्वारा पुत्रः पितरं प्रपूजयेत् इत्यनन्तरं परविद्यार्थे लिङ्गाङ्गसामरस्यं बोधयेदावार्यः । तदुक्तं क्रियासारे एकोनविंशोपदेशे–

लीनार्थगमकं लिङ्गमन्यदङ्गमुदीरितम् ।
लिङ्गाङ्गयोः सामरस्यं जीवब्रह्मैक्यलक्षणम् ॥
तदपि द्विविधं प्रोक्तं साधनेन समन्वितम् ।



**परामृष्टाः ग्रन्थाः**


१. नाव्यशास्त्र – भरतमुनि ।
२. दशरुपक – धनुंजय ।
३. अभिनवभारति – अभिनवगुप्त ।
४. अभिनवदर्पण – नन्दिकेश्वर ।
५. डा. पारसनाथद्विवेदिकृत नाव्यशास्त्र हिन्दीव्याख्यान ।



**डा. रेखादेवि एस्. एच्.**
सहायकप्राध्यापिका
भाषासाहित्यविभागः
कर्नाटकसंस्कृतविश्वविद्यालयः
चामराजपेटे–५६००१८
बेङ्गळूरु, कर्नाटक
चरदूरवाणी–**9591071457**


**********

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# शक्तिविशिष्टाद्वैतसिद्धान्तानुसारेण मुण्डकोपनिषदुक्तरीत्या गुरुस्वरूपमहत्त्वप्रतिपादनम्

**चन्द्रशेखरय्यः (बेङ्गळूरु)***

**पीठिका–**

वेदोपनिषत्–ब्रह्मसूत्र–भगवद्गीता एव प्रस्थानत्रयम् इति भगवत् शङ्कराचार्येण कथितः । उपनिषत् साहित्यं वेदवाङ्मये अन्तर्गतः भवति ।मुक्तिकोपनिषद् अनुसार १०८ सङ्ख्याका उपनिषत् वर्तते । अयं मुण्डकोपनिषत् दशोपनिषत्सु अन्यतमम् ।

ईश–केन–कठ–प्रश्न–मुण्डक–माण्डूक्य–तैत्तिरीय–ऐतरेय छान्दोग्यं–बृहदारण्यकं तथा च ॥ (मुक्तिकोपनिषत्, ६–१.३०)

१०८ उपनिषत् मानवस्य कल्याणार्थम् उक्तमिति ज्ञातुं शक्यते । तेषाम् उद्देशम् एवं निरूपितम् ।

एवमष्टोत्तरशतं भवानात्रयनाशनम् ।
ज्ञानवैराग्यदं पुंसां वासनात्रयनाशनम् ॥ (मुक्तिकोपनिषत्, १.४०)

मुण्डकोपनिषत् अथर्ववेदस्य मन्त्रभागे अन्तर्गतं भवति । “मुण्डा एव मुण्डकाः” मुण्डकानां = शिरोव्रतवताम् उपनिषत् मुण्डकोपनिषत् । श्रीउम्मचगिशङ्करशास्त्री अयम् उपनिषत् प्रति शक्तिविशिष्टाद्वैतभाष्यं व्यरचयन् । अथर्वशिरसि प्रतिपादितस्य पाशुपताभिधस्य शिरोव्रतस्यात्र निर्दिष्टत्वात् । तथा च उक्तं सूतसंहितायाम्–

व्रतं पाशुपतं चीर्णं यैर्द्विजैरादरेण तु ।
तेषामेवोपदेष्टव्यमिति वेदानुशासनम् ॥

मम लेखनस्य विषयं एवं निरूप्यते ।

**गुरुस्वरूपप्रतिपादनम्–**

गुरोः स्वरूपं मुण्डकोपनिषदि भाष्यकारेण एवं प्रतिपादितम्–

तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥
(मुण्डकोपनिषत्, १. २. १३)



तस्मै स विद्वान् इति । सः भुवनप्रसिद्धरेणुकादिपञ्चाचार्याणां वीरादिगोत्रजातो गुरुस्थलीयत्वेन प्रसिद्ध आचार्यः । कथंभूत इत्यत आह– विद्वानिति । विद्वान् = लिङ्गाङ्गसामरस्यज्ञानवान् । उपसन्नाय–

सेवेत परमाचार्यं शिष्यो भक्तिभयान्वितः ।
षण्मासान् वत्सरं वाऽपि यावदेष प्रसीदति ॥
प्रसन्नपरमाचार्यं भक्त्या मुक्तिप्रदर्शकम् ।
प्रार्थयेदग्रतः शिष्यः प्राञ्जलिर्विनयान्वितः ॥
भो कल्याणमहाभाग शिवज्ञानमहोदधे ।
आचार्यवर्यसम्प्राप्तं रक्ष मां भवरोगिणम् ॥
(सिद्धान्तशिखामणिः, ६. ७–९)

भयभक्त्यामृतः शरणागतस्य शिष्यः षण्मासान्, तत्परं वापि अथवा सः (श्रीगुरु) प्रसन्नो भवति तावत् पर्यन्तं परमाचार्यं सेवेत । तस्य भक्त्या प्रसन्नं, मुक्तिप्रदर्शकं परमाचार्यस्य अग्रतः शिष्यः प्राञ्जलिः (एवं) विनयपूर्वकं प्रार्थयेत् । कल्याणस्वरूपः, महाभागः (श्रेष्ठः) शिवज्ञानमहोदधे भो आचार्यश्रेष्ठाः तव समीपे आगतः भवरोगिणं मां सम्प्राप्तमिति । प्रार्थनाप्रस्सरमुपगताय समिदाद्युपायनपाणये शरणागताय, सम्यक् = सुष्ठु, प्रशान्तचित्ताय = शुद्धचित्ताय, भूतशुद्ध्यादिगर्भगुरुकृतस्वस्तिकारोहणादि दीक्षासंस्कारसंस्कृतं चित्तं प्रशान्तं शुद्धं भवति । शमान्विताय = शमेन शुद्ध्यात्मकेन, अन्विताय = युक्ताय । मन्त्र–मन्त्रेश्वर–मन्त्रमहेश्वरापरपर्यायेष्टादिलिङ्गत्रयानुयोगिकगुरुकृताङ्गत्रयप्रविलापनसम्पन्नः शिष्यः शुद्धात्मा भवति, गुरुकृतदीक्षात्रयनिर्दग्धमलत्रयवत्वात् । तस्मै शुद्धचित्ताय शुद्धात्मने शिष्याय । येन = परविद्यात्मकस्थूलसूक्ष्मपञ्चाक्षरमहामनुरूपम् अक्षरम् अद्रेश्यादिविशेषणम् । पुरुषं = पुरुषपदवाच्यं शिवलिङ्गम्, वेद = जानात्युक्तशिष्यास्तां परां विद्यां तत्त्वतो, ब्रह्मविद्यां = वस्तुतो ब्रह्मविद्यां पञ्चाक्षरीम्, ऋग्वेदादीनां ब्रह्मविद्यात्वेऽपि न ऋअग्वेदादि विद्या तत्त्वतो ब्रह्मविद्या भवितुमर्हति, तस्याः पूर्वकाण्डरूपायाः अपरपशुकर्मपरत्वात्, उत्तरकाण्डस्य परविद्यात्वस्य पूर्वमुक्तत्वात्, पञ्चाक्षरमहामनुरूपायाः परविद्यया एव साक्षान्मोक्षोपयोगित्वात्, तस्या एव लिङ्गाङ्गसामरस्यबोधकत्वात् पञ्चाक्षरी पराविद्यैव तत्त्वतो ब्रह्मविधा । तां प्रोवाच = वातुलतन्त्रादिशिवागमोक्तप्रकारेण प्रब्रू –यात् । उक्तं च क्रियासारे पञ्चाक्षरीविद्यायाः परत्वम् आश्रित्य परमां विद्यां हृद्यां

निष्ठावरणानामपि मोक्षफलकत्वात्, सर्वेषां शिवाश्रमिणां मोक्षाधिकारात् । तस्मात् भस्मजाबालाद्युपनिषदुपदिष्टतारकत्वब्रह्मबिद्यात्मकमहामनुबोधकदीक्षा–शिक्षाज्ञानगुरुरेवत्रिविधवीरशैवैर्वन्द्यः = पूज्यः, कैवल्यप्रापकश्च तेषाम् । स्वगुरुं गच्छेत् यथाविधि, भक्त्या स्वगुरुं प्रणम्य इत्यादि रुद्रहृदयोपनिषत्–कैवल्योपनिषदाद्युक्तप्रकारेण अत्याश्रमशब्दितशिवाश्रमविशिष्टाः सर्वे वीरशैवाः स्वस्वगुरूपसदनं कृत्वा तदनुभवभिगरसिका भवेयुः ।

**उपसंहारः–**

शक्तिविशिष्टाद्वैतसिद्धान्ते शिवभक्तः, पञ्चाचारः, षट्स्थलः, अष्टावरणं च मोक्षसम्पादनार्थं अवलम्बितम् । अष्टावरणानि एतानि– गुरुः, लिङ्गं, जङ्गमः, पादोदकं, प्रसादः, भस्म, रुद्राक्ष, मन्त्राश्च इति । एतेषु गुरुणा दत्तं इष्टलिङ्गं शिवभक्तः यावज्जीवं मन्त्रगन्धपुष्पादिभिः द्वारा प्रपूजयेत् तत् पूजाफलेन प्राप्यमानेन शिवज्ञानेन शिवभक्तः जननमरणरूपभवबन्धनेन विमुक्तं लिङ्गाङ्गसामरस्यरूपशिवयोगं प्राप्नोति । एतदेव शक्तिविशिष्टाद्वैतसिद्धान्तस्य मोक्षस्वरूपम् । सामरस्यस्वरूपं मुण्डकोपनिषदि एवं निरूपितम्–
यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपान् विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥
(मुण्डकोपनिषत्, ३.१.८)
इति मन्त्रद्वारा लेखनं सम्पन्नं भवति ।

**परामृष्टाः ग्रन्थाः**

१. अनुभवसूत्रम्, श्रीमायिदेवविरचितं विमर्शात्मकपरिष्करणम्, वि. डा. हेच्. पि. मल्लेदेवरु, प्राच्यविद्या संशोधनालयः, मैसूर् १९८६
२. क्रियासारः, श्रीनीलकण्ठशिवाचार्यविरचितः भागत्रयोपेतः, प्राच्यविद्या संशोधनालयः, मैसूरविश्वविद्यालयप्रकाशनम्, १९५४
३. कैवल्यसारः, श्रीमरितोण्टदार्यविरचितः, एडिटेड्, वि. डा. हेच्. पि. मल्लेदेवरु, प्राच्यविद्या संशोधनालयः, मैसूर् १९८८
४. मुण्डकोपनिषत्, वीरशैवभाष्यम्, श्रीउमचगिशङ्करशास्त्रिकृतम्, संस्कृतमूलसहितम्, प्रबोधपुस्तकप्रकटना संस्था, मैसूरु



द्वितीयं तद्विनिर्मुक्तमाद्यं गुरुकृतं पुरा ॥
द्वितीयमपि शिष्यस्य गुरुवाक्यस्य पालनात् ।
आद्यं वेधादिदीक्षाभ्यस्त्रिपुण्ड्रस्यापि धारणात् ॥
रुद्राक्षधारणाच्चापि पञ्चाक्षरजपादपि ।
मुख्याल्लिङ्गाधृतेश्चापि दहराकाशमण्डले ॥
बहिर्दहरदेशे च हृदये लिङ्गधारणात् ।
क्रमागतेन मार्गेण कृताङ्गन्यासवान् गुरुः ॥
सकलीकृत्य देहं स्वं प्रविलापनपुरःसरम् ।
तत्तद्बीजाक्षरं न्यस्य तत्तत् स्थानेऽपि बुद्धिमान् ॥
अङ्गतत्वानि यान्याहुर्लिङ्गतत्त्वानि यानि च ।
सामरस्यं तयोर्ज्ञात्वा शास्त्रोक्तेनैव वर्त्मना ॥
पञ्चाक्षरार्थतश्चैममर्थं शिष्यस्य बोधयेत् ।
नमः शब्देनाङ्गतत्त्वं लिङ्गतत्त्वं शिवेति च ॥
आर्यत्यैवार्थबोधः स्यादिति मन्त्रार्थबोधकः ।

इति भाश्यकारेण उल्लिखितम् । जिह्वास्वरूपलिङ्गद्वारा कर्णरूपयोनिं प्रति पञ्चाक्षरमन्त्रस्वरूपशुक्र (वीर्य) निशिच्य वै । सं उत्पन्नमन्त्रजपेन पवित्रशिष्यः गुरुपुत्रो भवति । मन्त्रमातापितरं गुरुस्वरूपपिता इति भावनया विधिवत् पूजयेत् । लीनार्थगमकं प्रदर्शितं लिङ्गम् इति कथयति । लिङ्गं प्रति तस्य भिन्नमर्थं प्रदर्शितं लिङ्गमिति । तयोः ऐक्यं तदर्थं जीवब्रह्मणोः एकत्वं लिङ्गाङ्गसामरस्यं एतदेव शक्तिविशिष्टाद्वैतसिद्धान्ते मोक्षस्वरूपमिति ज्ञानिनः कथयन्ति । जीवब्रह्मैक्यं द्विविधं वर्तते । एकं साधनसहितं, अन्यं साधनमुक्तम् । साधनसहितम् ऐक्यं पुरातनं, गुरुकृतं च भवति । साधनरहितं शिष्यः गुरुवाक्यपालनद्वारा सिद्ध्यति । तथा च साधनसहितलिङ्गं (जीवं) वेदा, मन्त्र, क्रियारूपत्रिविध दीक्षया, त्रिपुण्ड्रधारणं, रुद्राक्षधारणं, पञ्चाक्षरजपं, च कृत्वा दहराकाशमण्डले बहिर्दहरदेशे हृदयप्रदेशे लिङ्गधारणविधिं कृत्वा तद्वारा सिद्ध्यति । क्रमागतरूप मार्गद्वारा लिङ्गन्यासं कृत्वा अनन्तरं गुरुः तस्य शरीरं प्रविलापनसहितेन सकलीकरणं कृत्वा, सम्बन्धीनि बीजाक्षरान् सम्बन्धिस्थानेषु न्यासं कृत्वा लिङ्गतत्त्वानां च द्वयोः अतिसामरस्य तस्य बुद्धिशक्त्या ज्ञात्वा द्वारा शास्त्रोक्तमार्गस्य अनुसारेण शिष्यं प्रति बोधयेत् ।

नमः शब्देन अङ्गतत्त्वं शिवशब्देन लिङ्गतत्त्वं आय इति शब्देन ऐक्यं बोधयति । एतदेव मन्त्रार्थस्य बोधः इति ।
गुरुश्च लिङ्गाङ्गसामरस्यापरपर्यायलिङ्गाङ्गैक्यबोधकप्राणसहितपञ्चाक्षरमन्त्राणां षट्स्थलब्रह्मविद्यापरां प्रणवसहितपञ्चाक्षरीं कया रीत्या बोधयेत् इत्यादी नियमोऽप्याचार्यस्य प्रोवाचेत्यनेनोक्तः । स नियमश्च क्रियासारादिवीरशैवीयशास्त्रे प्रसिद्धः । तथा हि क्रियासारे त्रयोदशोपदेशे– गुरुश्च स्वाश्रये शिष्यं वर्षमेकं परीक्षयेत् इत्यादिना तेषामध्वविशिद्ध्यादि कुर्यान्मातृकुलोचितम् इत्यन्तेनोक्तः । किञ्च तत्रैव–

तस्मिल्लिङ्गानि संवीक्ष्य शक्तिपातस्य भूरिशः ।
ज्ञानेन क्रियया वाथ गुरुः शिष्यं परीक्षयेत् ॥
योन्यथा कुरुते मोहात् स विनश्यति दुर्मतिः ।

इत्यादिनियमोप्युक्तः । गुरुः आश्रितः शिष्यं वर्षमेकं परीक्षयेत्, तदनन्तरं शिष्यस्य शक्तिपातं समालोच्य शिवज्ञानप्राप्तः इति मन्यते, तस्मात् लिङ्गानि संवीक्ष्य गुरुः क्रियारूपेण ज्ञानरूपेण च शिष्यं परीक्षयेत् । लोभमोहेन वर्जितः शिष्यं परीक्षानन्तरं तमुद्दिश्य अनुग्रहं कुरुतः ।

**प्रणवसहितपञ्चाक्षरीमन्त्रमहत्त्वप्रतिपादनम्–**

प्रणवसहितपञ्चाक्षरीमन्त्रस्य महत्त्वं भाष्यकारेण एवं प्रतिपादितम्–
तस्मात् तत्त्वमस्यादि महावाक्यार्थलिङ्गाङ्गसामरस्यबोधिकां परां विद्यां प्राप्य तत्तदनुकूलश्रुतिस्मृत्यादिश्रवणमनन निदिध्यासनविध्वस्तसंशयादि शिष्यस्तदर्थज्ञान दार्ढ्ये मुक्तो भवति । तदुक्तं क्रियासारे त्रयोदशोपदेशे–

पञ्चाक्षरप्रभावेण सर्वकामाः समाहिताः ।
सत्यं सत्यं पुनः सत्यं सर्वसञ्जीवनौषधम् ॥
पञ्चाक्षरामृतं पीत्वा शिवसायुज्यमाप्नुयात् ।
नावर्तते पुनर्मृत्युः पुनर्नावर्तते ध्रुवम् ॥ इति ।

पूर्वोक्तक्रमेण प्रणवस्यापि सूक्ष्मपञ्चाक्षरात्मकत्वात् निर्गुणब्रह्मप्रतिपादकत्वात् रकारादि यकारान्तस्य स्थूलात्मकत्वात्, सुगुणाचारादि पञ्चब्रह्मप्रतिपादकत्वात्, सुगुणनिर्गुणयोर्भिन्नत्वेनोपासनया वीरशैवाचार्यानुमतत्वात्, सिद्धान्तस्तु नीरूपस्यैवाकारविशेषतः साधकानुग्रहार्थं स्वीकर्तव्यत्वेन आरूढप्राप्यस्य निर्गुणस्योपासनानर्हत्वेनारुरुक्षुतावस्थायां सुगुणोपासनस्य विधानात्, सुगुणनिर्गुणोभयसाधारण्येन संसारदावानलपरितप्तानां पाशविच्छेदार्थं षडक्षर्यास्तारकत्व वर्णनात्, सुगुणेऽन्यन्निर्गुणेऽन्यदिति वैयधिकरण्येन तारकत्वानौचित्यात्, निर्गुणोपासनायामशक्तोऽपि सुगुणोपासनावसरे नित्यप्राप्तायाः प्रणवविशिष्टपञ्चाक्षर्या एव वाचकत्वेन सुगुणब्रह्माऽनुशील्योपासनां कुर्यात् । यत्तु सुगुणोपासनायां पञ्चा क्षर्याः षडक्षर्या एव व्च्यवाचकयोरभेदोपासना, निर्गुणोपासनायां तु प्रणवमात्रस्य वाच्यवाचकयोरभेदोपासनेति, तदविचारितरमणीयम्, सुगुणनिर्गुणयोर्भेदाभावात्, साधकानुग्रहर्थमाविर्भूतशक्तेः परमेश्वरस्योभयत्र साधारण्येन षडक्षर्यास्तारकत्वमिति महालिङ्गस्य परब्रह्मण एवोपासनं युक्तमिति नीलकण्ठशिवाचार्योक्तत्वात् । प्रणव सहितपञ्चाक्षर मन्त्रातिरिक्तमन्त्राणां मुक्तिसाधनत्वेनानभुपगमात्, क्रियासारे एकोनविंशोपदेशे पञ्चाक्षरेतरमन्त्राणामनेकेषां साधनत्वप्रतिषेधात् पञ्चाक्षरस्यैव वीरशैवानां मुक्तिसाधनत्वं नान्येषामिति नीलकण्ठशिवाचार्यैः कण्ठतः स्पष्टमुद्दिष्टत्वात्, अस्यैव महामनोः सप्तकोटिमन्त्रोत्पत्तिस्थानत्वात्, लिङ्गाङ्गसामरस्यात्मकषट् स्थलब्रह्मोपदेशे विनियुक्तत्वात् पञ्चाक्षरार्थतश्चेममर्थं शिष्यस्य बोधयेत् इत्युक्तत्वात्, अस्यैव श्रौतप्रकरणपठितत्वात्, अष्टावरणधटकत्वेन श्रीकरभाष्यकारादिभिरप्यादृतत्वाच्च एतन्मन्त्रातिरिक्तमन्त्रस्य वीरशैवैकदेशे मुक्तिसाधनत्वेनाऽनुमतत्वे तस्याऽष्टावरणबाह्यत्वात् वीरशैवानादरणीयत्वमेव स्यात् ।

सानन्दयोगीन्द्रो महामनोरुच्चारमात्रेणाऽष्टाविंशतिनायकनरक स्थितपापिजनानुद्धृतवानिति सानन्दचरितस्य पुराणप्रसिद्धेः, सानन्दशतानन्दोपमन्युवसिष्ठवामदेवादिमुनयोऽप्यनेनैव महामनुना संसिद्धमहातेजस्विनो भूत्वाऽन्ते मोक्षलक्ष्मीमपि प्राप्नुवन्तीति सुप्रसिद्धम् । ये केचिद् वीरशैवगुरूपदिष्टमहा मनुं त्यक्त्वा मन्त्रान्तरं जपन्ति, तदर्थं चानुसन्दधते, तेषां वीरशैवत्वभङ्गः स्यात्, स्याच्चाऽष्टावरणभङ्गः, तद्भङ्गे च कथं वा तेषां लिङ्गपूजाधिकारः, तदभावे कथं वा लिङ्गाङ्गसामरस्यात्मकः शिवयोगः? तदभावे कथं वा तेषां मोक्षाधिकारः? तस्मात् सर्वेऽपि शिवाश्रमिणो वीरशैवाः दीक्षाकाले ब्रह्मविद् गुरूपदिष्टप्रणवविशिष्टपञ्चाक्षरमन्त्रार्थमनुसन्दधानाः तदुपदेशकं गुरुं च श्रद्धधाना मुक्ता भवेयुरित्यस्माकमाशयः । न चाऽऽश्रमवैलक्षण्यादष्टावरणवैलक्षण्यं स्वीकर्तुं शक्यम्, आवरणानां स्वात्रिंशत्वापत्तेः । पूर्वाश्रमत्रये आवरणवैलक्षण्याभावे चतुर्थाश्रमेऽष्टावरणवैलक्षण्यमिति यत्, तत्तुच्छम्, विनिगमनाविरहात्, पूर्वाश्रम त्रय

कथितम् । एतदेव ज्ञानपादं मुक्तिसाधकम् ।
उपरि उक्तविषयः किरणागमे अपि संक्षिप्तरूपेण एवं निरूपितम् ।
गरुडः–
शिवशक्तिप्रभावाच किलानन्तः प्रबुध्यति ।
प्रबोधिका तु सा शक्तिस्सर्वगा परिपद्यते ॥
अन्येषां सन्निकृष्टापि बोधं सा कुरुते न किम् ।
योग्यानां उपकारित्वे रागवान् स्यात् शिवस्तदा ॥
(किरणागमः, विद्यापादः, २.– १, २)

अस्मिन् श्लोके शिवशक्तेः वैभवः प्रकटीक्रियते । शिवशक्तिः यदा प्रबुद्धा भवति तदानीं किं किं भवति इति विवरणं अत्र दृश्यते । शिवस्य अनुग्रहेण शिवशक्तिः प्रबुद्धा भवति । तदा शक्त्या सर्वमपि साधयितुं शक्यम् । यस्य विषये शिवानुग्रहः नास्ति सा शक्तिः सन्निकृष्टा सती अपि न फलकारिणी भवति इति अस्य अभिप्रायः ।
भगवान्–
यथार्करश्मिसंस्पर्शात् पद्मबोधस्समे न किम् ।
कानिचित् प्रतिबुध्यन्ते तथाऽन्यानि न यातुचित् ॥
रागद्वेषो न चार्कस्य तथेशस्य न तौ यतः ।
तत् सामर्थ्यादनन्तस्य सर्वज्ञत्वं भवेत् खग ॥
योगस्याप्यधिकारार्थं नियोगं न विना स्थितिः ।
(किरणागमः, विद्यापादः, २. ३–५)

यथा उदितस्य सूर्यस्य रश्मिभिः कानिचित् कमलानि विकसिता भवन्ति, कानिचित् च कमलानि तथैव अवतिष्ठन्ते तथैव शिवस्य कस्यापि विषये रागद्वेषौ न स्तः ।

**पतिमहत्त्वनिरूपणम्–**

पतिशब्दवाच्यः शिवस्य महत्वं एवं रीत्या पौष्करागमे निरूपितम् ।
शिवस्य समवेताया शक्तिर्ज्ञानात्मिकामला ।
सैवज्ञानं इति प्रोक्तं शाब्दं तदनुमापकम् ॥
पतिः कुण्डलिनी माया पशुः पाशश्च कारकः ।



५. लिङ्गधारणचन्द्रिका, श्रीनन्दिकेश्वरशिवाचार्यविरचितं, शिवकुमारव्याख्यासहितं, काशी–१९०५
६. वीरशैवानन्दचन्द्रिका, श्रीमरितोण्टदार्यविरचिता, कन्नडानुवाद, श्रीसिरसि गुरुशान्तशास्त्री, श्रीनन्दिकेश्वर एलेक्ट्रिक् प्रेस्, मैसूरु–१९६०
७. वीरशैवेन्दुशेखरः, व्याकरणतीर्थेन पं. सदाशिवशास्त्रिणा विरचितः, श्रीमहालिङ्गस्वामिना काश्यां जङ्गमवाटिका संस्थाने पकाशितः–१८५४
८. श्रीकरभाष्यम्, श्रीपतिपण्डिताचार्यविरचितम्. सम्पुटः ०१, ०२, प्राच्यविद्या संशोधनालयः, मैसूर् १९७८
९. श्वेताश्वतरिपनिषत्, वीरशैवभाष्यम्, वि. डा. टि. जि. सिद्धपाराध्यविरचितः, कन्नडानुवादसहितम्, मैसूरु
१०. सिद्धान्तशिखामणिः, श्रीशिवयोगिशिवाचार्यविरचितः, विमर्शात्मकपरिष्करणम्, प्राच्यविद्या संशोधनालयः, मैसूर् १९८२
११. लिङ्गधारणचन्द्रिका, शिरसि गुरुशान्तशास्त्रिगळु, (कन्नडभाषा) मैसूरु–१९५१
१२. सिद्धान्तशिखामणिः, श्रीशिवयोगिशिवाचार्यविरचितः, श्रीकाशीनाथशास्त्रीकृतः, भावप्रकाशव्याख्या, पञ्चाचार्यप्रेस्, मैसूरु–१९८२
१३. चन्द्रज्ञानागमः, (क्रिया–चर्यापादौ) भाषानुवाद–टिप्पणीसहितः, सम्पादकः– पं. व्रजवल्लभद्विवेदः, प्रकाशकः शैवभारती शोधप्रतिष्ठानम्, जङ्गमवाडीमठम्, वाराणसी–२२१००१, १९९५

**चन्द्रशेखरय्यः**
विद्यावारिधी (पिहेच्. डि.) छात्रः,
कर्नाटकसंस्कृतविश्वविद्यालयः,
चामराज पेटे–५६००१८
बेङ्गळूरु, कर्नाटक
चरदूरवाणी–**9008190647**

*******

**Journal of Veda Samskrita Academy**
**ISSN 2250-1711**
**Volume XVI : July to December – 2020**

# पौष्करागमविद्यापादोक्तरीत्या पतिविषयप्रतिपादनम्

एस्. पि. दयानन्दः (मैसूरु)*

**पीठिका–**

**"वेदोऽखिलो धर्ममूलम्"** इति सनातनवाक्यमस्ति । जगदिदं शिवेन सृजति । एतादृशजगदुद्धर्तुं अस्माकं भारतीयऋषयः ज्ञानिनः मन्त्रद्रष्टारश्च स्वीयतपोबलेन ज्ञानचक्षुषा शिवपरमात्मना कृत वेदराशिं चतुर्वेदरूपेण विभाजितः, ते एव ऋग्वेद, यजुर्वेद, सामवेद, अथर्वणवेदश्च इति । तदतिरिक्तः अन्यः आगमः एव पञ्चमवेदरूपेण लोकप्रसिद्धः दृश्यते श्रूयते च । स च आगमः ईश्वरप्रणीतत्वात् अपौरुषेयः इति प्रसिद्धः । आगमेषु अष्टाविंशति शिवागमानि तथा एवं उपागमानि सन्ति । तेषु उपागमेषु पौष्करागमः इत्येकः अस्ति । पौष्करागमः प्रसिद्ध शैव उपागमः, कारणं तु तन्त्रोक्तप्रमुखाः विषयाः । पौष्करागमविद्यापादे दशपटलानि सन्ति । तेषां नामानि एवं वर्तते– पतिपटलः, बिन्दुपटलः, मायापटलः, पशुपटलः, कलादिपाशपटलः, पुंस्त्वपटलः, अहं– कारादि पाशपटलः, तन्मात्रादिपाशपटलः, प्रमाणपटलः, तन्त्रावतारपटलः च इति । पौष्करागमः शिवागमेषु उप–आगमः । अस्मिन् लेखने पतिस्वरूपमधि– कृत्य प्रस्तूयते ।

**पतिस्वरूपनिरूपणम्–**

पौष्करागमे विद्यापादे प्रथमपटलः पतिपटलः इति व्यवह्रियते । तन्त्रोक्त पतिस्वरूपम् एवं निरूपितम् । अयं विषयः अन्यग्रन्थेषु निरूपितविषयाणां प्रतिपादनद्वारा सुसम्पन्नं भवति ।

भगवन् देव देवेश ब्रह्मविष्णीन्द्र नायक ।
आपिङ्गलजटाजूटरोपितार्धेन्दुशेखर ॥
व्याघ्रचर्मपरीधान तदूर्ध्वव्यालबन्धन ।
न्नत्यशतृमृगानीक सेव्यमानदयानिधे ॥
ललाटनेत्रसप्तार्चिर्दग्ध त्रिपुर मन्मथ ।
अम्भोधिमथनोद्भूतविषनीलित कन्धर ॥
क्रियाचर्ये प्रसादेन तवास्माभिश्शृते पुरा ।



अधुना ज्ञानपादं तु श्रोतुमिच्छा गरीयसी ॥
वर्तते तामपकर्तुं अर्हस्यस्माकमीश्वर ।
अधिकारे वयन्वेद नियुक्ता भवता यतः ॥
ज्ञानसाध्योऽधिकारो हि मुक्तिश्च व्यक्तिरीश्वर ।
ईश्वरः–
ज्ञायन्ते येन पत्याद्याः पदार्थाः षड् द्विजोत्तमाः ॥
तत् ज्ञानपादमित्युक्तं साधकं देशिकात्मनाम् ।
(पौष्करागमः, १. १–६)

ज्ञानवैराग्यैश्वर्ययशोवीर्यश्रीनिधे भगवन् भवान् सर्वासामपि देवतानां अग्रगण्योऽसि, (देवदेवेश) सृष्टिकर्तुर्ब्रह्मणः, पालयितुर्विष्णो, देवराजेन्द्रस्य च नियन्तासि, (ब्रह्मविष्ण्वीन्द्र) भवतो जटाजूटः पिङ्गलवर्णेन सुशोभितः (आपिङ्गलजटाजूट), शेखरे अर्धचन्द्रधृतोऽसि (आरोपितार्धेन्दुशेखर) ।
अधोभागे कटिप्रदेशो व्याघ्रचर्मणा आच्छादितः (व्याघ्रचर्मपरीधान) तदुपरि रज्जुवत् नागपाशबन्धनं दृश्यते, (तदूर्ध्वव्यालबन्धन), आजन्मवैरिणो मृगाः तव सान्निध्ये निजवैरं स्नेहभावेन तव सेवायां संलग्नाः, (नित्यशतृमृगानीक सेव्यमान दयानिध) हे करुणाकर ललाटस्थतृतीयनेत्रोत्थिताग्निना, पुरा भवान् त्रीन् लोका दग्ध्वा / दाहयित्वा त्रिपुरारिः सम्पन्नोऽसि, एवमेव तव तपोभङ्गकर्मण्युदकं मन्मथमपि तृतीयनेत्रोत्थितज्वालया दग्धवान् (ललाटनेत्र सप्तार्चिर्दग्ध त्रिपुरमन्मथ), सागरामन्थनावसरे समुद्भूतं हालाहलविषं पीत्वा नीलकण्ठोऽसि (अम्भोधिमथनोद्भूत विषानीलितकन्धर) ।
पुरा तवानुग्रहेण अस्माकं क्रिया–कार्ययोः ज्ञानं सम्पन्नम् । सम्प्रति ज्ञानपादविषयकशुश्रूषा वरीवर्ति । अस्माकम् इमां जिज्ञासाम् उपशमयितुं भवानेव समर्थः ।
हे देव, भवता एव वयम् अस्मिन् अधिकारस्थाने नियोजिताः । इदमधिकारस्थानं शिवतत्त्वज्ञानेनैव प्राप्तुं शक्यते । हे परमेश्वर, विना शिवतत्त्वज्ञानं मुक्तिरपि दुर्लभा इति सर्वविदितविषयः । अतः तादृशं शिवतत्त्वज्ञानम् अस्माकम् अनुगृह्णातु भवान् ।
ईश्वर उवाच–
हे विप्रोत्तमाः, पत्यादयः षट् पदार्थाः येन ज्ञाता भवन्ति तत् 'ज्ञानपादम्' इति

निष्कलशिवः इति कथयति । शिवः यदा स्वयं उद्युक्तस्तु कार्य तदा बिन्दुः भागाह्वयं लभते । एते एव भोगशिवः, सदाशिवः च इति ज्ञायते ।

शिवतत्वं तदेव सादाख्यं न शिवाद्वस्तुतोभिदा तदेव सदासिवतत्वम्, अयं सादाख्यतत्वं शिवात् अभिन्नं परन्तु भोगः तत्पालनात्मैव न अध्यासः व्याप्तं अधिकारम् । अधिकारशिवः एव भोगशिवः तयोः अभेदं न दृश्यते । तथा च अधिकारशिवः लयशिवेव अभिन्नः भवति । ईश्वर एव ईश्वरतत्त्वं भवति । एतादृश शक्तिः शिवे एव अविनाभावेन प्रवृत्तोयं इति । तदर्थं न शिवेन विना शक्तिः न शक्तिरहितः शिवः । पुष्पगन्ध्योरन्यान्यं मारुतांभरयोरिव इति ।

**उपसंहारः–**

पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम् ।
एतद् यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य ! ॥
(मुण्डकोपनिषत्, २.१.१०)

पुरुष एवेदमिति । इदमक्षरात् पुरुषादुत्पन्नं विश्वं स्थूलसूक्ष्मकारणरूपं धरादिमायान्तं सर्वं जगत्, पुरुष एव = परमकारणपरमात्मरूपं लिङ्गमेव ।

यस्मिन् समस्तवस्तूनि कल्लोला इव वारिधौ ।
सम्भूय विलयं यान्ति तद्रूपं परमात्मनः ॥
पीठिका परम शक्तिर्लिङ्गं साक्षात् परः शिवः ।
शिवशक्तिसमायोगात् विश्वं लिङ्गं तदुच्यते ॥
(सिद्धान्तशिखामणिः, १८. ३२, ११. ३२)

इति च रेणुकभगवत्पादोक्तेः, यस्मिन् परतत्त्वे समस्तवस्तूनि तदर्थं शिवादि भूम्यन्त षट् त्रिंशत् तत्त्वानि वारिधौ कल्लोल इव सम्भूय निलयं यान्ति तदेव साक्षात् परशिवस्वरूपम् । पीठिका एव परमशक्तिस्वरूपम् । लिङ्गं एव साक्षात् परशिवस्वरूपम् । एतादृश शिव–शक्तिसमायोगं लिङ्गमेव विश्वं इति कथयति । तदर्थं अखण्डचैतन्यात्मकं शक्तिस्वरूपम् एव इदं विश्वं इति ज्ञातुं शक्यते ।

न वज्रचक्राङ्कसरोरुहाङ्कं लिङ्गाङ्कितं पश्य जगद् भगाङ्कम् ।
ज्ञानकर्मेन्द्रियैर्विश्वं चित्क्रियालिङ्गरूपकम् ॥ इति पुराणोक्तेश्च,
ये ये पदार्था लिङ्गाङ्कास्ते ते शर्वविभूतयः ।
अर्था भगाङ्किता ये ये ते ते गौर्या विभूतयः ॥



इति प्रोक्ता पदार्थाः षट् शैवतन्त्रे समासतः ॥
लयभोगाधिकारात्मा व्यापारत्रय लक्षितः ।
स्वभावादच्युतश्शक्तः पदार्थः पतिसंज्ञितः ॥
लयादि व्यापृतिर्यत्र शुद्धध्वा यतोजनि ।
सा तु कुण्डलिनी शम्भोर्नित्याधिष्ठेयरूपिणी ॥
भोग्यभोक्तृत्व सम्पत्यै या शरीरेन्द्रियाधिकम् ।
उत्पादयति सा माया खचिता कर्मभिर्नृणाम् ॥
पशुः पशुत्वसंरुद्ध दृक् क्रियाप्रसरस्सदा ।
सकलाकलभेदेन त्रिधाबन्धवशात् स्थितः ॥
(पौष्करागमः, १. ७–१२)

शिवस्य समवेता या अमला ज्ञानात्मिका शक्तिः, सा एव ज्ञानं इति प्रोक्तं शाब्दं तदनुमापकम् । पतिः कुण्डलिनी माया पशुः कारकः पाशश्च इति षट् पदार्थाः शैवतन्त्रे समासतः प्रोक्ताः ।

व्यापारत्रयलक्षितः लयभोगाधिकारात्मा स्वभावात् अच्युतः शक्तः पदार्थः पतिसंज्ञितः । यत्र लयादिव्यापृतिः, यतः शुद्धाध्वा अजनि, सा तु शम्भोः नित्याधिष्ठेयरूपिणी कुण्डलिनी ।

या भोग्यभोक्तृत्वसम्पत्यै शरीरेन्द्रियादिकम्, उत्पादयति नृणां कर्मभिः खचिता सा माया । पशुत्वसंरुद्धदृक्क्रियाप्रसरः पशुः सदा सकलाकलभेदेन त्रिधा बन्धवशात् स्थितः ।

कलादिक्षितिपर्यन्ता स्थिता तात्त्विकसंहतिः ।
पाशात्मकः पदार्थोऽयं पञ्चमः परिपठ्यते ॥
भुक्तिमुक्तिव्यक्तिफला क्रियादीक्षाह्वया परा ।
षष्ठोऽभिधीयते तन्त्रे पदार्थो मुनिपुङ्गवाः ॥
षट् स्वेतेषु पदार्थेषु शिवाद्यवनिपश्चिपमम् ।
सर्वमन्तर्गतं यस्मात् परीक्ष्यन्ते त एव ते ॥
लयभोगाधिकाराणां न भेदो वास्तवश्शिवे ।
किन्तु बिन्दोरणूनां च वास्तवा एव ते मताः ॥
यथार्कः पङ्कजं नित्यं बोधसंक्षोभणादिभिः ।
कर्मभिर्बोधकाद्याख्यां लभतेऽत्र तथा शिवः ॥

उपसंहृतकार्यात्मा यदा बिन्दुर्व्यवस्थितः ।
तदा लयाह्वयं तत्त्वं शिवतत्त्वं तदेव हि ॥
विद्यादितत्त्ववन्नेदं सन्नतत्त्वादिलक्षणम् ।
किन्तु स्वदृक् क्रियाशक्तिः किरणात्मकं अव्ययम् ॥
व्यापकं नित्यं अचलं सर्वतोमुखमैश्वरम् ।
रस्मिन् विस्पष्टचिन्मात्रो व्यापकत्वादि धर्मवान् ॥
अनन्योन्यश्च तच्छक्तेस्समवायास्तिथः शिवः ।

(पौष्करागमः, १. १३–२१)

पञ्चमः पदार्थः अयं पाशः इति पौष्करागमे उक्तः । अयं पाशः कलादिक्षितिपर्यन्तं तत्त्वानां समूहम् आवृतः (समागतः) । तेषां नामानि कला–काला–अविद्या–रागकाल–नियति–पुरुष–प्रकृति–चित्त–बुद्धि–अहङ्कार–मनः–श्रोत्र–त्वक्–नेत्र–जिह्वा–प्राण–वाक्–पाण्इ–पाद–पायु–उपस्था–शब्द–स्पर्श–रूप–रस–गन्ध–आकाश–वायु–वह्नि–जल–पृथिवी इति ।

बो मुनिपुङ्गवः ! अयम् आगमः व्यक्तिफला, पराफलाक्रिया दीक्षया द्वारा भुक्तिं–मुक्तिं च प्राप्नोति । तदेव तत्त्वं शिवतत्वम् इति । पौष्करागमे शिवत्वं पदार्थेषु षष्ठः इति अभिधीयते । एतेषु षट् पदार्थेषु सर्वतत्त्वान् शिवतत्वे अन्तर्गतं भवति । शिवतत्वात् आरभ्य पृतिवीतत्वपर्यन्तं षट् त्रिंशत् तत्त्वानि पुञ्जरूपेण सन्ति । एते एव जगत् सृष्टिविषये बीजरूपेण निर्दिशति । पूर्वोक्तकलातत्वादारभ्य पृथिवीतत्त्वपर्यन्तं विना अन्यतत्त्वानां नामनि एवं वर्तते, शिव–शक्ति–सदाशिव–ईश्वर–शुद्धविद्या–माया इति ।

वास्तवः शिवे लयभोगाधिकाराणां न भेदो भवति, परन्तु बिन्दोऽणूनां च ते मताः वास्तवः एव । पङ्कजं यथार्कः नित्यम् । संक्षोभणादिभिः बोधयेत् । तथा शिवः कर्मभिः बोधकाद्याख्यां अत्र लभते ।

यदा बिन्दुः व्यवस्थितः कार्यात्मा उपसंहृत । तदा तत्त्वं लयाह्वयं तदेव बिन्दुतत्त्वं तदेव शिवतत्वं इति उक्तम् ।
शिवतत्वं एव विद्यादि शुद्धा, विद्या, मिश्रतत्वं प्रति लक्षणं न सम्मिलनं भवति । किन्तु स्वदृक् क्रियाशक्तिः किरणात्मकम् अव्यक्तम्, व्यापकम्, नित्यम्, अचलम्, सर्वतोमुखम् च ऐश्वरम् इति । शिवतत्त्वम् एव परतत्वं सर्वज्ञत्वं तत्वम् । अयं शिवतत्वेन जगदिदं सृजति ।



तस्मिन् शिवतत्वे शिवः भेदाभेदरूपेण अस्ति । शिवः चिन्मात्रः, चैतन्ययुतः, शुद्धः च । व्यापकत्वादि धर्मवान् इति मन्यते । तस्यावृतशक्तिः तं अनन्योन्यश्च तदर्थं अविनाभावरूपेण शिवे शक्तिः स्थितः । अयं विषयः सिद्धान्तशिखामणौ एवं निरूपितम् ।
यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी ।
तथा शक्तिर्विमर्शाख्या प्रकाशे ब्रह्मणि स्थिरा ॥

(सिद्धान्तशिखामणिः, २०. ३८)

चन्द्रे स्थिरा ज्योत्स्ना स्वयं एकदेशे (एकस्थानेऽस्ति) विश्ववस्तून् सर्वं अपि यथा प्रकाशिनी तथा परशिवब्रह्मणि स्थिता विमर्शात्मा शक्तिः सकलविश्वं तस्य एकं अंशेन व्याप्य प्रकारे प्रकाशयति ।
उक्तं च पारमेश्वरागमे–
सर्वज्ञतातृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभूर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥

(पारमेश्वरागमः, ६. ३३)

**सर्वशक्तिधरः शिवस्य विषयनिरूपणम्–**

शिवस्य सर्वशक्तिधरः इति विषयः पौष्करागमे एवं निरूपितम् ।
शक्तोऽयं शक्तयो यस्मादुद्योगादि क्रियाच्युताः ।
शिव एवाधितिष्ठन्ते निष्कलश्च स एव तु ॥
उद्युक्तस्तु यदा कार्ये बिन्दुर्भोगाह्वयं तदा ।
लभते शिव उद्युक्तस्स एव च सदाशिवः ॥
तत्त्वं तदेव सादाख्यं न शिवाद्वस्तुतोभिदा ।
भोगस्तत्पालमात्मैव नाध्यासस्तदसम्भवात् ॥
बिन्दुः प्रवृत्तः कार्यस्यात् अधिकारस्तदा यदा ।
शिवस्य न भिदा पूर्वा विशेषस्य मुनीश्वराः ॥
ईश्वरस्य स एव स्यात् तत्त्वं तच्चेश्वराह्वयम् ।
प्रवृत्तोयं इति प्रोक्तः प्रवृत्ताः शक्तयो मताः ॥
शिवतत्त्वे शिवः शक्तः कारणन्तु सर्वशक्तिधरः शिवः एव । शिवतत्वेन सृष्टिः, स्थितिः, लयं च क्रिया करणीयम् । परन्तु शिव एव लयशिवः, लयशिवः एव

राजावल्लभस्य करणकमलमार्तण्डग्रन्थः इष्टशक ९८० काले आरम्भः जातः । तथा कलियुगारम्भस्य कालादारभ्य सिद्धान्तगणित- प्रक्रिया दृश्यते चेत्तन्त्रग्रन्थः भवति । अत्र इष्टशकवर्षः इत्युक्ते कलि- युगस्य आरम्भः एव इष्टशकवर्षः । तन्त्रग्रन्थद्वारा खेटानां स्फुटा- न्भवन्ति चेत्गणितप्रक्रियायां सारल्यमनुभूयते । किमर्थमित्युक्ते सृष्ट्या - दितः क्रियते चेत्तत्रदैर्ध्यविस्तृतिः भवति । तन्त्रेष्वन्यतमं विद्दणाचार्यस्य वार्षिकतन्त्रम् । तन्त्रदर्पणः इतिनाम्ना तस्य व्याख्यानं शङ्करनारायण - जोयिसा कृतवन्तः । तस्यां मातृकायां पाताधिकारविचारः विमृश्यते ।

**"पातयति लोकानां मङ्गलानानीति पातः"**

इति लोके पातस्य व्यवहारः । रवीन्द्वोर्वशादेव पातौ जायेते । तत्र सूर्याचन्द्रमसौ यदि क्रान्तिसाम्यत्वमवाप्य अग्रे वक्ष्यमाणस्थाने दृश्येते चेत्तदा पातौ भवतः । तत्र पातसाधनार्थमुपकरणान्यपेक्षन्ते । तदत्र आदौ न्यरूपि ग्रन्थकारेण –

**पातागमे दिनकृच्छशाङ्कराहून्प्रसाध्यायनभागयुक्तान् ।**
**चन्द्रार्कयोः क्रान्तिलवान्सबिम्बान्विक्षेपभागांश्च निशाकरस्य ॥१**

पातस्यावगमनार्थं तत्र अयनांशसंस्कृतयोः रविचन्द्रयोः योगः चक्रसमो वा चक्रार्धसमो वा भवति तद्दिने अर्कचन्द्रराहूणां स्फुटीकरणं कृत्वा तथा रविचन्द्रयोः क्रान्तिसाधनमपि कुर्यात् । चन्द्रस्य च शर- साधनमपि कुर्यात् । साधितं शरं चन्द्रस्य प्राक्साधिता या मध्यमा क्रान्तिः तया साकं संस्कुर्यात् । तत्तु –

**विक्षेपः शशिनः शरेन्दुविहृतो भागादिकं तेन युक्**
**क्रान्तिः साम्यदिगन्यदिक्चवियुता स्याच्छेषदिक्कास्फुटा ।**

------------------------------------------

१. तन्त्रदर्पणम्, पाताधिकारः - ०१



इति लैङ्गोत्तर्पुराणोक्तेश्च सर्वं विश्वं पुरुष एव, पुरि स्थूलादि शरीरे इष्टलिङ्गरूपेण शयनात् पुरुषसंज्ञकं परशिवलिङ्गमेव । नहि विश्वं नाम परमात्मनो परशिवलिङ्गादत्यन्तभिन्नमस्ति, अतो यत् पृष्टं "कस्मिन्नु भगवो ! विज्ञाते सर्वमिदं विज्ञातं भवति" इति तदुत्तरितम् ।

मया निरूपित एवं लेखनं अग्रे उक्त्वा किरणागमिक्तमन्त्राणं उल्लिखितद्वारा सुसम्पन्नं भवति ।

तथाऽप्येतत् सुसंस्थितं एकस्मिन् वस्तुनि स्फुटम् ।
नानार्थं साधयेत् भिन्नं नरस्य सकलाङ्गवत् ॥
एवमेतत् अनन्तेन सृष्टिं देहानि बन्धनम् ।
न देहेन विना मुक्तिर्न भोगश्चित्क्रिया गुणः ॥
एतच्च कुरुते शम्भुस्स्वतन्त्रवत् विभुत्वतः ।
सर्वानुग्रहकाज्वान्तश्शक्तिपातेन दीक्षया ॥
सर्वानुग्रहिका शक्तिस्तद्वशादखिलं बलम् ।
(किरणागमः, विद्यापादः, १. ५–८)

एतेषु श्लोकेषु अस्य मानवदेहस्य प्राधान्यं प्रकटीक्रियते । देहं विना कोऽपि साधनादिकं कर्तुं प्रभवति । तादृशदेहस्य प्राप्तिरपि शिवस्य अनुग्रहादेव प्रभवति । देहप्राप्त्यनन्तरं शिवस्य कृपया एव शक्तिपातरूपा दीक्षा तस्मात् च मोक्षप्राप्तिश्च भवति इति एतेषु श्लोकेषु उक्तम् ।

### परामशनग्रन्थानां नामानि

१. आगमपरिज्ञानम् / प्रभातिलक, शम्भुलिङ्गशिवाचार्यः, पञ्चाचार्यप्रेस्, मैसूरु–१९८६
२. किरणागमे विद्यापाद, राजरथिन शिवाचारियर् इन्ट्रनेट् डिजिटल् काफि
३. किरणागम, राजरथिन शिवाचारियर् इन्ट्रनेट् डिजिटल् काफि
४. पौष्करागम, पण्डित् के. रामचन्द्रशर्मा, अध्यार् लैब्ररि अण्ड् रिसर्च् सेण्टर् मद्रास–१९९४
५. वातुलशुद्धागम ज्ञानपाद, आगम अकाडेमि, मद्रास्
६. तत्त्वप्रकाशः, भोजराजः
७. श्रीकण्ठभाष्यम्, श्रीकण्ठशिवाचार्यः
८. शैवसिद्धान्तपरिभाषा, कविराजशेखरसूर्यभट्टः

९. चन्द्रज्ञानागम, एम्. शिवकुमारस्वामी
१०. निगमागम संस्कृतिः, व्रजवल्लभ द्विवेदी
११. संस्कृतसाहित्येतिहासः, आचार्यः लोकमणिदहालः
१२. संस्कृतसाहित्यविमर्शः, पण्डित द्विजयेन्द्रनाथः
१३. क्रियासारः, श्रीनीलकण्ठशिवाचार्यविरचितः, भागत्रयोपेतः, प्राच्यविद्यासंशोधनालयः, मैसूरु–१९५४
१४. चन्द्रज्ञानागमः, (क्रियाचर्यपादौ) भाषानुवाद, टिप्पणीसहितः, सम्पादकः– पं व्रजवल्लभद्विवेदिः, प्रकाशकः– शैवभारती, शोधप्रतिष्ठानम्, जङ्गमवाडी मठम्, वाराणसी–२२१००१, १९९४
१५. महानारायणोपनिषत्, वीरशैवभाष्यम्, श्रीउमचगिशङ्करशास्त्री कृत एडिटेड् शैवभाष्यम्, श्रीवृषभदेवपण्डितकृत, काशी
१६. सिद्धान्तशिखामणिः, श्रीशिवयोगी शिवाचार्यविरचितः, श्रीकाशीनाथशास्त्रिकृत भावप्रकाशव्याख्या, (कर्नाटक भाषा) पञ्चाचार्य प्रेस्, मैसूरु–१९८२
१७. शिवाद्वैतमञ्जरी, स्वप्रभानन्दशिवाचार्यविरचितः पञ्चाचार्य एलेक्ट्रिक् प्रेस्, मैसूरु
१८. मुकुटागमः, अनुवादकः डा ॥ सि. शिवकुमारस्वामी, वीरशैवानुसन्धान संस्थान, विजयनगर, २ हन्त, बेङ्गलूरु १९९८
१९. श्रीकण्ठभाष्यम्, चतुस्सूत्री, शिवार्कमणिव्याख्यासहितं, वाराणसी, जङ्गमवाडीमठस्य शैवभारती शोधप्रतिष्ठानम्, वाराणसी
२०. सिद्धान्तशिखामणिः, विचारदीप्तिः, सम्पादकः–डा॥ एम्. शिवकुमारस्वामी, वीरशैवानुसन्धान संस्थान, विजयनगर, २ हन्त, बेङ्गलूरु १९९८
२१. कारणागमः, अनुवादकः, डा॥ मल्लिकार्जुन परड्डि, वीरशैवानुसन्धान संस्थान, विजयनगर, २ हन्त, बेङ्गलूरु १९९९
२२. चन्द्रज्ञानागम, विचाररश्मि, वीरशैवानुसन्धान संस्थान, बेङ्गलूरु

**एस्. पि. दयानन्दः**
शोधच्छात्रः
संस्कृत अध्ययन विभागः,
मानसगङ्गोत्री, मैसूरु विश्वविद्यालयः,
मैसूरु, कर्नाटक
Mobil : **9880642758**

**Journal of Veda Samskrita Academy**
**ISSN 2250-1711**
**Volume XVI : July to December – 2020**

# शङ्करनारायणविरचित-तन्त्रदर्पणाभिधानवार्षिकतन्त्रव्याख्याने पाताः

-राधाकृष्ण बि.*

**"वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते"** इति शास्त्रमिदं ज्योतिषं नेत्रस्वरूपमिति भास्कराद्यैः आचार्यैः उपस्थापितम् । इनादीनां ग्रहाणामश्विन्यादिनक्षत्राणां धूमकेत्वादि ज्योतिःपदार्थानां स्वरूपम्, सञ्चारः, परिभ्रमणकालः, ग्रहणं, स्थितिः इत्यादयः यस्मिन् शास्त्रे निरूप्यते तच्छास्त्रं ज्योतिषम् इति । भूत-भविष्यत्-वर्तमाननिर्णायकत्वेन सिद्धान्त-संहिता-होरा इति स्कन्धत्रयमत्र वर्तते । स्कन्धत्रयेष्वन्तर्गत गणित स्कन्धे मध्यगतिः, पञ्चाङ्गगणितं, त्रिप्रश्नः , कालभेदः, ग्रहणं, श्रृङ्गोन्नतिः इत्यादीनि निर्वर्णितानि । तन्त्रशब्देन स्कन्धस्यास्य व्यवहारः विद्यते ।

त्रुट्यादितः प्रलयान्तकालपर्यन्तं यत्परिमाणं वर्तते तत्सर्वमत्र सिद्धान्तस्कन्धे दृश्यते । सिद्धान्ते यत्सर्वं स्फुटीकरणं कुर्वन्ति तत्सर्वं

**"यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेवफलस्फुटत्वम्"**

इत्युक्तप्रकारेण फलस्फुटीकरणार्थं प्रवृत्तमिदं स्कन्धम् ।

सिद्धान्तस्कन्धेसिद्धान्तग्रन्थाः–करणग्रन्थाः–तन्त्रग्रन्थाः इतिभेदाः विद्यन्ते । सिद्धान्तग्रन्थे जगतः सृष्ट्यादिकालतः गणितप्रक्रिया दृश्यते । सृष्ट्यादिः इत्युक्ते ब्रह्मणः दिनस्यारम्भः यदा भविष्यति तदा विधाता जगतः चराचराणां सर्जनस्यारम्भं करोति । स एव सृष्टिकालः । तस्मादारभ्य गणितप्रक्रियायाः प्रारम्भः यस्मिन्ग्रन्थे दृश्यते स एव ग्रन्थः सिद्धान्तग्रन्थः । उदा :- सूर्यसिद्धान्तः । एवम् इष्टशककालादारभ्य गणितप्रक्रिया यस्मिन्ग्रन्थे दृश्यते स ग्रन्थः करणग्रन्थः ।

शाकरैः (1528) एभिर्विभक्ते सति लब्धं विक्षेपगतिः स्यात् ।
एवं रवीन्द्वोः क्रान्तिगतिः तथा चन्द्रस्य विक्षेपगतिश्च साध्या ।

$$\frac{\text{सायनार्कस्यकोटिज्या} \times \text{रविगतिः}}{300} = \text{रवेः क्रान्तिगतिः ।}$$

$$\frac{\text{सायनचन्द्रस्यकोटिज्या} \times \text{चन्द्रस्यगतिः}}{300} = \text{चन्द्रस्यक्रान्तिगतिः ।}$$

$$\frac{\text{पातोनचन्द्रकोटिज्या} \times \text{चन्द्रस्यगतिः}}{1528} = \text{चन्द्रस्यविक्षेपगतिः ।}$$

**क्रान्तिविक्षेपयोश्च संस्कारक्रमस्तु-**

**याम्योत्तराशाभिमुखाकुलीरमृगादिकेन्द्रेगतयः क्रमेण ।**
**विक्षेपगत्यायुतिरन्यथेन्दोः स्वक्रान्तिभुक्त्योः समभिन्नदिश्योः ॥७**

चन्द्रस्य स्पष्टक्रान्तिसाधनार्थं विक्षेपकान्त्योः समदिक्के सति योगः अन्यथा वियोगः कार्यः । सायनचन्द्रकेन्द्रवशात् राहुरहितचन्द्र-केन्द्रवशात् च क्रान्तिविक्षेपगत्योः एकदिशियोगः तथा भिन्नदिश्यन्तरं कार्यम् इति । अत्र ग्रहस्य गतिविचारः अपि कथितः वर्तते । ग्रहस्य गतिः कर्क्यादौ दक्षिणाभिमुखी तथा मकरादौ उत्तराभिमुखीति ।

**गतैष्यज्ञानविचारःअधुनाकथ्यते ।**

**क्रान्तिश्चन्द्रमसो यदोजपदगस्योनारवेः क्रान्तितः**
**पातेभ्यप्यधिकागतः समपदेतद्व्यत्यतो गृह्यते ।**
**विक्षेपाच्छशिनो विशुध्यति यदा क्रान्तिस्तदा कल्पयेत्**
**पादान्यत्वमपक्रमौ यदि समौ पातस्य मध्यस्तदा ॥ ८**

---

७. तन्त्रदर्पणम्, पाताधिकारः - ०५ । ८. तन्त्रदर्पणम्, पाताधिकारः - ०६



**भिन्नैकायनगौ दिनेशशशिनौ चक्रार्धचक्रे तयोः**
**योगे क्रान्तिकलासमौ यदि महापातो महावैधृतिः ॥२**

चन्द्रस्य विक्षेपः शरेन्दुविहृतः (15 संख्ययाविभजेत्) कार्यः । तदा यत्फलं लभ्यते तत्फलं भागादिकं फलं भवति । साधितभागादिफलं चन्द्रस्य क्रान्त्यंशैः सह दिक्साम्ये युक्तः दिग्भेदे वियुक्तश्च कार्यः । शर-क्रान्त्योः संस्कारेण स्पष्टा क्रान्तिः सिध्यति । सा च अवशिष्टदिग्ग-तास्यात् ।

$$\frac{\text{चन्द्रशरः}}{15} = \text{भागादिकं फलम् ।}$$

चन्द्रस्यक्रान्त्यंशाः ± भागादिकं फलम् = चन्द्रस्यस्पष्टाक्रान्तिः ।
(दिक्साम्ये धनं, दिग्भेदे ऋणं कार्यम् ।)

सायनार्कचन्द्रौ भिन्नायनगतौ तथा अनयोः अर्केन्द्वोः योगे चक्रार्धसमौ , क्रान्तिकलाभिश्च समौ भवतः चेत्व्यतीपातः भवति । मङ्गलं विशेषेणाति-शयञ्च पातयतीति व्युत्पत्या व्यतीपातः भवति । पातस्य स्वरूपं यथा-

**स कृष्णो दारुणवपुः लोहिताक्षो महोदरः ।**
**सर्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते ॥१-**सू. सि. पाताधिकारः ।

अग्निपुरुषः पातः कृष्णवर्णः,दारुणवपुः, रक्तनेत्रः, महोदरः, अत्युग्रः, सर्वेषां चराचराणामनिष्टकारकः प्रतिमासं वारद्वयं जायते ।

एकानयनगतौ तथा अनयोः योगस्फुटः चक्रसमौ तथा क्रान्तिकलाभिश्च समौ भवतः तदा वैधृतिः पातः स्यात् । मङ्गलं विध्रियते, विशेषेण अवरुध्यते अनेन इति विधृतः । स एव वैधृतः नाम पातः । भास्करः इतोऽपि स्पष्टतया निरूपयति–

**व्यतीपातोऽयनभेदे गोलैकत्वे अर्कचन्द्रयोः क्रान्त्योः ।**
**साम्ये वैधृत एकायनेऽन्यदिगवपक्रसमत्वे ॥३**

---

२. तन्त्रदर्पणम्, पाताधिकारः - ०२ ३. सिद्धान्तशिरोमणिः ।

## अधुना पातस्य आद्यन्तकालौ कथ्येते ।

**प्रवेशनिर्गमौ क्रमात्भविष्यतः स्वसाधने ।**
**अतीतपातसम्भवे वदेदिमौ विपर्ययात् ॥ १०**

प्रागुक्तप्रकारेण गणिते कृते सति पातस्यारम्भकालः तथा मोक्ष-कालः लभ्यते । मानैक्यार्धक्रान्तिवियोगलिप्तिकाः हीने क्रान्तिगतिप्रयोग-भक्ते दिनादिफलं लभ्यते यत्तत्फलं तत्र हीनादागतः प्रवेशकालः भवति । युक्तादागतः मोक्षकालश्च । पातः अग्रे भविष्यति चेदियं प्रक्रिया । पाते गते सति इमौ साधितकालौ विपर्ययाद्वदेत् । हीनादागतः कालः निर्गम-कालः तथा युक्तादागतः प्रवेश इति । तावपि षष्ट्यां विशु द्धौ पूर्वदिने शुध्यतः । नामदिवसघटिकाः षष्टिघटिकाः तस्मात् ।

## यदि गतैष्यकाले दिनादिके भवतः चेत्-

**गतैष्यकं फलं यदा दिनादिकं समागतम् ।**
**तदा पुनः समानयेत्तदेवनाडिकादिकम् ॥ ११**

गते वा ऐष्ये पाते यदि दिनादिकं फलमागच्छति तर्हि प्रक्रियेयं विधीयते । प्रवेशनिर्गमौ कालौ दिनादिपरिमाणेन भवतः चेत्तदा गतदिनस्य वा ऐष्यदिनस्य वा पूर्ववत्सर्वं समानीयपातकालः नाड्यादिकः ज्ञेयः ।

## पातदिनात्पुनः पातोद्भवदिनम् ।

**यस्मिन्समुद्भवः पातो दिने तस्मात्त्रयोदशे ।**
**पुनश्चन्द्रार्कयोः क्रान्त्योः साम्ये पातस्य सम्भवः ॥ १२**

पूर्वं यद्दिने पातः आगतः तस्मादारभ्य त्रयोदशदिनादनन्तरं चन्द्रार्कयोः पातसाम्यं भवति तथैव पातसम्भवः स्यात् ।

---

१०. तन्त्रदर्पणम्, पाताधिकारः - ०७ । ११. तन्त्रदर्पणम्, पाताधिकारः - ०८
१२. तन्त्रदर्पणम्, पाताधिकारः - ०९



तथा सूर्यसिद्धान्ते पाताधिकारे पातयोः सम्पूर्णविवरणमुपपत्तौ दृश्यते । ४

## व्यतीपातः

चन्द्रार्कौ विपरीतायनगतौ स्याताम् । एकः उत्तरे अयने अपरः दक्षिणे अयने च । अयनपरिकल्पना तु मकरादितः षड्राशयः उत्तराः तथा कर्क्यादि षड्राशयः दक्षिणाः । तथैव अनयोः योगस्फुटः राशिषट्के सति क्रान्तिलिप्तिकाः तुल्याः तदा व्यतीपातः । अत्र "एकायनगोलयोः क्रान्तिसाम्येऽपि पातः न सम्भवति" अतः अत्र विपरीतायनगतौ तथा एकगोलगतौ इत्यप्यन्वयः । (मेषादिषड्राशयः उत्तरगोलः, तुलादि षड्राशयः दक्षिणगोलः ।)

## वैधृतः

चन्द्रार्कौ एकायनगतौ स्याताम् । भिन्नगोलगतौ स्याताम् । तयोः योगस्फुटः मण्डलसमो भवेत् । एवं क्रान्तिसाम्ये सति वैधृतः नाम पातः जायते । ५

## क्रान्तिविक्षेपयोः गतिज्ञानम्

**युक्तायनभागभानुशशिनोः कोटिज्यया सङ्गुणे**
**भुक्ती स्वेवियदभ्ररामविहृते स्यातां गती क्रान्तिजे ।**
**राहूनेन्दुसमुत्थकोटिगुणकेनाभ्यस्तभुक्तिर्विधो-**
**र्नागाक्षीषुनिशाकरैरपहृतो विक्षेपभुक्तिर्भवेत् ॥ ६**

सायनार्कस्य तथा चन्द्रस्य च अंशादिफलस्य कोटिज्यया सह स्वभुक्तिपरिमाणेन सङ्गुण्य वियदभ्ररामविहृते (300) सति तयोः क्रान्ती गती भवतः । तथा राहुरहितचन्द्रकोटिज्यया चन्द्रगतिं हत्वा नागाक्षीषुनि-

---

४. सूर्यसिद्धान्तः, पाताधिकारः- ०१, ०२, ०३, ०४, ०५ ।
५. तन्त्रदर्पणम्, पाताधिकारः - ०३ । ६. तन्त्रदर्पणम्, पाताधिकारः - ०४

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# ಪಾಣಿನೀಯ ವ್ಯಾಕರಣದಲ್ಲಿ ಸುಬರ್ಥಗಳು

ಪ್ರೊ. ಸುಬ್ರಾಯ ನಾಗಪ್ಪ ಭಟ್ಟ (ಧಾರವಾಡ)*

'ಏಕತಿಙ್ ವಾಕ್ಯಂ' ಎಂದು ವ್ಯಾಕರಣಶಾಸ್ತ್ರವು ವಾಕ್ಯದ ಲಕ್ಷಣವನ್ನು ಹೇಳಿದೆ. ಒಂದು ಕ್ರಿಯಾಪದದಿಂದ ಕೂಡಿರುವುದು ವಾಕ್ಯವೆನಿಸುತ್ತದೆ. ಕ್ರಿಯೆಗೆ ಸಂಬಂಧಿ– ಸಿದ್ಧೇ ಕಾರಕ. ಈ ಸಂಬಂಧವು ಬಗೆ ಬಗೆಯಾಗಿರುತ್ತವೆ. ಕ್ರಿಯಾಕಾರಕ ಸಂಬಂಧಗಳನ್ನು ಸರಿಯಾಗಿ ತಿಳಿದುಕೊಡರೆ ಮಾತ್ರ ಯೋಗ್ಯವಾದ ವಿಭಕ್ತಿ ಪ್ರತ್ಯಯಗಳನ್ನು ಸೇರಿಸಲು ಸಾಧ್ಯವಾಗುತ್ತದೆ. ಆದ್ದರಿಂದ ಸುಬರ್ಥಪ್ರಕರಣವು ವ್ಯಾಕರಣದಲ್ಲಿ ಮುಖ್ಯವಾದ ಭಾಗವಾಗಿದೆ. ಕಾರಕವೆಂಬುದು ಒಂದು ಸಂಜ್ಞೆ. ಕರ್ತೃ, ಕರ್ಮ, ಕರಣ, ಸಂಪ್ರದಾನ, ಅಪಾದಾನ, ಅಧಿಕರಣ ಈ ಆರಕ್ಕೆ ಕಾರಕವೆಂದು ಹೆಸರು.

ಒಂದು ಪ್ರಾಚೀನಶ್ಲೋಕ ಹೀಗಿದೆ–

> ಕರ್ತಾ ಕರ್ಮ ಚ ಕರಣಂ ಸಂಪ್ರದಾನಂ ತಥೈವ ಚ ।
> ಅಪಾದಾನಾಧಿಕರಣೇ ಕಾರಕಾಣಿ ಷಡೇವಹಿ ॥

'ಕ್ರಿಯಾಜನಕಂ ಕಾರಕಂ' ಕ್ರಿಯೆಯನ್ನು ಉತ್ಪಾದಿಸುವುದು ಕಾರಕ. ಅಥವಾ ಕ್ರಿಯಾನಿರ್ವರ್ತಕತ್ವವು ಕಾರಕದ ಲಕ್ಷಣ. ಆದ್ದರಿಂದ ಕಾರಕಗಳಿಗೆ ಕ್ರಿಯೆಯಲ್ಲಿ ಯೇ ಅನ್ವಯ ಇರುತ್ತದೆ. ವಾಸ್ತವಸಂಗತಿಯೇನೆಂದರೆ ಕರ್ತೃವೇ ಮುಖ್ಯಕಾರಕ. ಧಾತ್ವರ್ಥಕ್ರಿಯೆಯನ್ನು ಕರ್ತೃವೇ ನೆರವೇರುಸುವವನು. ಹಾಗಿದ್ದರೂ ಕರ್ಮ ಕರಣಾದಿಗಳಿಲ್ಲದೆ ಕರ್ತೃವಿನ ಕ್ರಿಯೆಯು ನಡೆಯುವುದಿಲ್ಲ. ಅವೆಲ್ಲವೂ ಸಹ ತಮ್ಮ ತಮ್ಮ ಅಪ್ರಧಾನಕ್ರಿಯೆಗಳಿಂದ ಪ್ರಧಾನಕ್ರಿಯೆಗೆ ಉಪಕರಿಸುತ್ತವೆ. ಆದ್ದರಿಂದ ಅವುಗಳನ್ನೂ ಕಾರಕಗಳೆಂದು ಕರೆದಿದ್ದಾರೆ. ಒಟ್ಟಿನಲ್ಲಿ ಕರ್ಮಾದಿಗಳೂ ಕ್ರಿಯಾ–ಜನಕಗಳೆಂದು ತಿಳಿಯಬೇಕು.

ಸಂಸ್ಕೃತದಲ್ಲಿ ಆರು ಕಾರಕಗಳು. ಏಳು ವಿಭಕ್ತಿಗಳು. ಮತ್ತು ಕಾರಕವಿಭಕ್ತಿ, ಉಪಪದವಿಭಕ್ತಿ ಎಂದು ಎರಡು ವಿಧ. ಕರ್ತೃಕರ್ಮಾದಿ ಸಂಜ್ಞೆಗಳನ್ನು ಹೇಳಿ ವಿಧಿಸಿದ ವಿಭಕ್ತಿಗಳು ಕಾರಕವಿಭಕ್ತಿಗಳು. ಕಾರಕಗಳನ್ನುಳಿದು ಇತರ ಪದಗಳ ಯೋಗದಲ್ಲಿ ವಿಧಿಸಿದ ವಿಭಕ್ತಿಗಳು ಉಪಪದವಿಭಕ್ತಿಗಳು.



पातः अभवद्वा भविष्यति वा इत्यवगमनार्थमत्र ओजयुग्मगतचन्द्रवशात् ज्ञातुं शक्यते । एवं मध्यमाधिकारे ओजयुग्मपदयोः परिचयप्रकरणं दृश्यते । ओजगः चन्द्रः प्रागुक्तप्रकारेण विक्षेपसंस्कृतः तस्य या स्पष्टा क्रान्तिः यदि अर्कक्रान्तिवशादूना तदा अग्रे पातः भविष्यतीति चिन्त्यम् । चन्द्रस्य स्पष्टाक्रान्तिः भानुक्रान्तिवशादधिका चेत्तदा पातो गत इत्य - वगन्तव्यम् ।

युग्मे तु विक्षेपसंस्कृता चन्द्रस्य स्पष्टा क्रान्तिः , रविक्रान्ति - वशादधिका तदा पातो गम्यः तथैव न्यूना क्रान्तिः चेत्पातः अभवदिति ज्ञानं भवति । ओजाद्विपरीतप्रकारेण युग्मे गतैष्यज्ञानं भवति । यदा विक्षेपाच्चन्द्रक्रान्तिः शुध्यति तर्हि ओजपदगतः चन्द्रः युग्मपदगतः भवति । युग्मपदगतः चन्द्रः ओजपदगतः भवति । पदान्यत्वकल्पनां दत्तवन्तः । तथा पातसमकालः पातमध्यकालः भवति । चन्द्रार्कयोः क्रान्तिसाम्ये सति पातमध्यकालः ।

## पाते गते गम्ये वा कालपरिज्ञानम् ।

चन्द्रक्रान्तिः तथा रविक्रान्तिः अनयोः साम्ये सति पातः इति पातमध्यकालः तथैव पातस्य गतगम्यत्वमपि प्रागुक्तश्लोके विदितम् । अधुना कालज्ञानं निरूपयति ग्रन्थकारः ।

> **इन्द्वर्कयोः क्रान्तिवियोगलिप्ताबिम्बाङ्गुलैक्याद्द्विगुणेनहीना ।**
> **युक्तापृथक्क्रान्तिगतिप्रयोगभक्ताभवेतां दिवसादिकालौ ॥ ९**

रवीद्वोः क्रान्तिवैषम्ये सति तयोः विवरलिप्तिकाः कार्याः । रवि-चन्द्रयोः बिम्बमानयोगार्धं कृत्वा (मानैक्यार्धं) ते पृथक्पृथ क् र विचन्द्रयोः पूर्वोक्तवत्मकरादकर्क्यादिकेन्द्रवशात्क्रान्तिगत्योः योगेन वियोगेन वा विभाजिते सति लब्धं पातस्य गतैष्यकालं भवति ।

---

९. तन्त्रदर्पणम्, पाताधिकारः - ०६

अर्कचन्द्रयोः प्रत्येकं बिम्बैकदेशरूपं यावत्कालपर्यन्तं तयोः बिम्बैकदेश-क्रान्त्यन्तरं यावत्तयोः मानैक्यार्धसमं भवति तावदेवास्य पातकालस्य सम्भवः ।

**स्वरूपतः पातानयनम् ।**

**पातस्यानयनं कथं वद यदा मेषे शरांशाः रवेः**
**भागाः पञ्चकृतिर्झषेहिमरुचस्तद्वच्चराहोर्मृगे ।**
**अप्येवं घटकन्ययोः इनविधू व्यत्यस्तभागोदयौ**
**राहोः पञ्चलवास्तदा मृगमुखे विद्वन्विलोक्याशुमे ॥ १३**

रविः मेषराशौ पञ्चभागः तथा चन्द्रः मीनराशौ पञ्चविंशति भागः तदा राहुः मकरे पञ्चविंशति भागे विद्यते चेत्तदा पातः सम्भवति । सायनरविः 00-05-00, चन्द्रः 11-25-00, राहुः 09-25-00 रवेः उत्तरक्रान्तिः 2।2 चन्द्रस्य दक्षिणक्रान्त्यंशः 2।2 उत्तरविक्षेपांशाश्च 3।54 । अत्र स्पष्टक्रान्ति-साधनार्थं क्रान्तिविक्षेपयोः दिग्भेदात्विक्षेपे क्रान्तिं विशोध्य 01।52 अव-शिष्यते । अत्र समीकरणार्थं चन्द्रः 11।25।20 तथा रविः 00।52 तस्य क्रान्त्यंशः 2।3 करणीयः भवति । अस्मिन्समये पातानयनं कथं सि द्धम् एवमन्यत्रापि युक्त्या विलोक्य मम अन्यस्य वा शीघ्रं वदेत् इति श्लोकस्याशयः । अत्र पदान्यत्वमपि प्रदर्शितम् । घटकन्ययोः अपि एवं विचिन्त्यम् । तुलायां पञ्चांशे इनः , कन्यायां पञ्चविंशांशे चन्द्रः । राहुः मकरे पञ्चविंशांशे भवेत्तदा पातः । तथैव उक्तस्थानातः विपरीतस्थाने रवीन्दू भवतः चेत्तदा पातः भवति । रविः मीने कन्यायां वा पञ्चविंशांशे, चन्द्रस्तु मेषे तुलायां वा पञ्चांशे, राहुः सिंहे पञ्चांशे विद्यते चेत्तदा पातः सिध्यति इति कथयन्ति । अत्र अस्मिन्स्फुटे पातः सम्भवति किमर्थमित्युक्ते पातस्य लक्षणं यद्यवलोक्यते चेत्तर्हि अवगन्तुं शक्यते ।

---

१३. तन्त्रदर्पणम्, पाताधिकारः - १० ।



“भिन्नैकायनगौ दिनेशशशिनौ चक्रार्धचक्रेतयो....” १४ इति पातस्य लक्षण-मुक्तम् । अत्रोक्तप्रकरणे रवीन्द्वोः योगस्फुटः चक्रमितया भवति । “क्रान्ति- कलासमौ” १५ इत्युक्तवत्क्रान्तिकलाः अपि समानाः भवेयुः । क्रान्तिः इत्युक्ते रवेः क्रान्तिः चन्द्रस्य विक्षेपसंस्कृतस्पष्टक्रान्तितुल्या भवति तदा पातः इतिपातस्य निरूपणमत्रकृतं शङ्करनारायणैः । लल्ला-चार्यविरचितग्रन्थः शिष्यधी वृद्धिदम् । श्रीमद्भास्कराचार्यकृतविवरसंवलित-व्याख्याने महापाताधिकारः इति पाताधिकारश्लोकानां सङ्ग्रहः कृतवन्तः । मातृकायाः अन्ते अस्पष्टरूपेण दृश्यते इति प्रकाशितपुस्तके विद्यते । श्लोकाः भिन्नाः आशयस्तु एक एव । पाताधिकारे गतिसाधनावसरे लल्लाचार्यः मार्गान्तरं करोतीति श्लोकैः पठित्वा अवगन्तुं शक्यते ।१६ पातकाले विहितकर्माणि कानि इत्यादयः वृद्धवासिष्ठसिद्धान्ते तथा सोम -सिद्धान्ते एवं धर्मशास्त्रादिष्वपि विस्तरेण कथितवन्तः मुनयः । पातकाल-स्यापि ग्रहणवत्प्राधान्यं दत्वा प्राक्तनाः तस्य महत्त्वं प्रतिपादितवन्तः।

**राधाकृष्ण बि.**
शोधच्छात्रः, राष्ट्रिय संस्कृत विश्वविद्यालयः
तिरुपतिः- 517507, आन्ध्रप्रदेशः
**Mobil : 8904045292**
**E-mail : rk.rakhi09@gmail.com**

(**राधाकृष्ण बि.** महोदयः तिरुपतिस्थे राष्ट्रियसंस्कृतविश्वविद्यालयस्य ज्योतिषविभागस्य प्राध्यापकानां **प्रो.ए.श्रीपादभट्ट** महाभागानां मार्गदर्शनेन **“शङ्कर-नारायणविरचिततन्त्रदर्पणाभिधानवार्षिकतन्त्रव्याख्यानस्य ग्रन्थसम्पादनम् अध्ययनञ्च“** इत्यस्मिन्विषये तिरुपतौ संशोधनकर्मणि रतः ।)

---

१४. तन्त्रदर्पणम्, पाताधिकारः - ०२ । १५. तन्त्रदर्पणम्, पाताधिकारः - ०२
१६. श्रीलल्लाचार्यविरचितं शिष्यधीवृद्धिदम् ।

*******

ಉದಾ : 'ಕೃಷ್ಣಃ ಹಸತಿ' ಮುಖವಿಕಸನಾನುಕೂಲವ್ಯಾಪಾರವು 'ಹಸ್' ಧಾತುವಿನ ಅರ್ಥ. ಮುಖವಿಕಸನ ಮತ್ತು ತದನುಕೂಲವ್ಯಾಪಾರ ಇವೆರಡೂ ಕರ್ತೃವಾದ ಕೃಷ್ಣನಲ್ಲಿಯೇ ಇವೆ. ಆದ್ದರಿಂದ 'ಹಸ್' ಧಾತು ಅಕರ್ಮಕ. ಹೀಗೆ ಉಳಿದ ಧಾತುಗಳಲ್ಲಿಯೂ ಊಹಿಸಿಕೊಳ್ಳಬೇಕು.

## ಕರಣ

"ಸಾಧಕತಮಂಕರಣಮ್" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 1-4-42)

ಕ್ರಿಯಾಸಿದ್ಧೌ ಪ್ರಕೃಷ್ಟೋಪಕಾರಕಂ ಕಾರಕಂ ಕರಣಸಂಜ್ಞಂ ಸ್ಯಾತ್ ।

ಕ್ರಿಯೆಯು ನೆರವೇರುವುದಕ್ಕೆ ಅತಿಶಯವಾಗಿ ಉಪಕರಿಸುವ ಕಾರಕವು ಕರಣ-ಸಂಜ್ಞೆಯನ್ನು ಪಡೆಯುತ್ತದೆ. "ಕರ್ತೃಕರಣಯೋಸ್ತೃತೀಯಾ" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 2-3-18) ಸೂತ್ರದಿಂದ ಕರಣವಾಚಕದ ಮೇಲೆ ತೃತೀಯಾವಿಭಕ್ತಿ ಬರುತ್ತದೆ. ಉದಾ : ರಾಮೇಣ ಬಾಣೇನ ಹತೋ ವಾಲೀ ।

## ಸಂಪ್ರದಾನ

"ಕರ್ಮಣಾಯಮಭಿಪ್ರೈತಿ ಸ ಸಂಪ್ರದಾನಮ್" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 1-4-32)

ದಾನಸ್ಯ ಕರ್ಮಣಾ ಯಮಭಿಪ್ರೈತಿ ಸ ಸಂಪ್ರದಾನಸಂಜ್ಞಃ ಸ್ಯಾತ್ ।

ಕೊಡುವ ಕ್ರಿಯೆಗೆ ಯಾವುದು ಕರ್ಮವೋ ಅದನ್ನು ಕರ್ತನು ಯಾರಿಗೆ ಕೊಡ-ಬೇಕೆಂದು ಉದ್ದೇಶಿಸಿರುತ್ತಾನೋ ಅವನಿಗೆ ಸಂಪ್ರದಾನವೆಂಬ ಸಂಜ್ಞೆ ಬರುತ್ತದೆ. "ಚತುರ್ಥೀ ಸಂಪ್ರದಾನೇ"(ಅಷ್ಟಾ. ಸೂ. ಸಂ. 2-3-13) ಸೂತ್ರದಿಂದ ಸಂಪ್ರ-ದಾನಕ್ಕೆ ಚತುರ್ಥೀವಿಭಕ್ತಿ ಬರುತ್ತದೆ.

ಉದಾ : ವಿಪ್ರಾಯ ಗಾಂ ದದಾತಿ । ಇಲ್ಲಿ ಗಮನಿಸಬೇಕಾದ ಅಂಶವೇನೆಂದರೆ, ಇನ್ನೊಬ್ಬನಿಗೆ ಸಂಬಂಧಿಸಲೆಂದು ಮಾಡುವ ಎಲ್ಲ ಬಗೆಯ ಕ್ರಿಯೆಯೂ 'ಕೊಡುವುದು' ಎಂಬುದರಲ್ಲಿ ಸೇರುತ್ತದೆ. ಕೊಡುವುದಕ್ಕೆ ಮೂರ್ತದ್ರವ್ಯವೇ ಆಗಬೇಕಾಗಿಲ್ಲ. ಮತ್ತು ಅದು ಕರ್ತನನ್ನು ತ್ಯಜಿಸಿ ಹೋಗಬೇಕಾಗಿಲ್ಲ. ಆ ಕರ್ಮವು ಗುಣಕ್ರಿಯಾರೂಪವೂ ಆಗಿರಬಹುದು.

ಉದಾ : ಗುರುಃ ಶಿಷ್ಯಾಯ ವಿದ್ಯಾಂ ದದಾತಿ ।

## ಅಪಾದಾನ

"ಧ್ರುವಮಪಾಯೇಽಪಾದಾನಮ್" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 1-4-24)



ಉದಾ : "ಸಹಯುಕ್ತೇಽಪ್ರಧಾನೇ" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 2-3-19) ಸಹಾರ್ಥೇನ-ಯುಕ್ತೇಽಪ್ರಧಾನೇ ತೃತೀಯಾ ಸ್ಯಾತ್ । ಸಹಾರ್ಥಕಶಬ್ದಗಳ ಯೋಗವಿರುವಾಗ ತೃತೀಯಾ ವಿಭಕ್ತಿಯು ಬರುತ್ತದೆ. 'ಪುತ್ರೇಣ ಸಹ ಆಗತಃ ಪಿತಾ' ಮಗನೊಡನೆ ತಂದೆ ಬಂದನು ಎಂದರ್ಥ.

ಷಷ್ಠೀ ವಿಭಕ್ತಿಯು ಕರ್ತೃಕರ್ಮ ಮುಂತಾದ ಕಾರಕಾರ್ಥದಲ್ಲಿ ಬಂದಾಗ ಕಾರಕವಿಭಕ್ತಿಯೆನಿಸುತ್ತದೆ. ಅದು ಸಂಬಂಧಾರ್ಥದಲ್ಲಿ ಬಂದಾಗ ಸಂಬಂಧ-ಸಾಮಾನ್ಯಷಷ್ಠೀ ಎನಿಸುತ್ತದೆ. ಹಿಗೆ ಷಷ್ಠೀ ವಿಭಕ್ತಿಯು ಕಾರಕವಿಭಕ್ತಿಯು, ಕಾರಕೇತರವಿಭಕ್ತಿಯೂ ಆಗುತ್ತದೆ.

## ಕರ್ತೃ

"ಸ್ವತಂತ್ರಃಕರ್ತಾ" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 1-4-54)

ಕ್ರಿಯಾಯಾಂ ಸ್ವಾತಂತ್ರ್ಯೇಣ ವಿವಕ್ಷಿತೋಽರ್ಥಃ ಕರ್ತಾ ಸ್ಯಾತ್ । ಕ್ರಿಯೆಯನ್ನು ನಡೆಸುವುದರಲ್ಲಿ ಸ್ವತಂತ್ರವಾದ ಕಾರಕವು ಕರ್ತೃ ಸಂಜ್ಞೆಯನ್ನು ಪಡೆಯುತ್ತದೆ. ರಾಮಃ ಶಾಲಾಂ ಗಚ್ಛತಿ । ಬಾಲಕಃ ಪಾಠಂ ಪಠತಿ । ಮುಂತಾದ ಉದಾಹರಣೆ ಗಳಲ್ಲಿ ವ್ಯಾಪಾರಕ್ಕೆ ಆಶ್ರಯನಾದವನು ಕರ್ತೃವೆಂದು ಸ್ಪಷ್ಟವಾಗುತ್ತದೆ. 'ಸೂತ್ರೇ ಲಿಂಗವಚನಮತಂತ್ರಮ್' ಸೂತ್ರದಲ್ಲಿ ಬಳಸಿದ ಲಿಂಗ ಮತ್ತು ವಚನಗಳು ವಿವಕ್ಷಿತವಲ್ಲ. ಸ್ತ್ರೀಯೂ ಕರ್ತೃವಾಗಬಹುದು, ನಪುಂಸಕವೂ ಕರ್ತೃವಾಗಬಹುದು. ಮತ್ತು ಕರ್ತೃಗಳು ಬಹುಮಂದಿ ಇರಬಹುದು.

ಕರ್ತರಿಪ್ರಯೋಗ :-'ರಾಮಃ ಶ್ಲೋಕಂ ಪಠತಿ' ಇಲ್ಲಿ ಕ್ರಿಯಾಪದದಲ್ಲಿರುವ ಆಖ್ಯಾತಪ್ರತ್ಯಯವು ಕರ್ತ್ರರ್ಥದಲ್ಲಿ ವಿಹಿತವಾಗಿದೆ. ರಾಮನಲ್ಲಿರುವ ಕರ್ತೃತ್ವವನ್ನು ಆಖ್ಯಾತಪ್ರತ್ಯಯವೇ ಹೇಳಿರುವುದರಿಂದ ರಾಮಶಬ್ದದಕ್ಕೆ ಕರ್ತರಿತೃತೀಯಾ ಬರಲಿಲ್ಲ. ಬದಲಾಗಿ ಪ್ರಥಮಾ ವಿಭಕ್ತಿ ಬಂದಿದೆ. ಹೀಗೆ ಶ್ಲೋಕದಲ್ಲಿರುವ ಕರ್ಮತ್ವವು ಉಕ್ತವಾಗದೇ ಇರುವುದರಿಂದ ಕರ್ಮಣಿ ದ್ವಿತೀಯಾ ಬಂದಿದೆ.

ಕರ್ಮಣಿಪ್ರಯೋಗ:- 'ರಾಮೇಣ ಶ್ಲೋಕಃ ಪಠ್ಯತೇ' ಇಲ್ಲಿ ಆಖ್ಯಾತಪ್ರತ್ಯಯವು ಕರ್ಮಾರ್ಥದಲ್ಲಿ ಬಂದಿದೆ. ರಾಮನಲ್ಲಿರುವು ಕರ್ತೃತ್ವವನ್ನು ಅದು ಹೇಳುವುದಿಲ್ಲ. ಆದ್ದರಿಂದ ರಾಮಶಬ್ದಕ್ಕೆ ಕರ್ತರಿತೃತೀಯಾ ಬಂದಿದೆ. ಆಖ್ಯಾತದಿಂದ ಶ್ಲೋಕ- ದಲ್ಲಿರುವ ಕರ್ಮತ್ವವು ಉಕ್ತವಾಗಿದ್ದರಿಂದ ಕರ್ಮಣಿ ದ್ವಿತೀಯಾ ಬರಲಿಲ್ಲ.

ಪರಿಶೇಷದಿಂದ ಪ್ರಥಮಾ ವಿಭಕ್ತಿ ಬಂದಿದೆ. ಈ ರೀತಿಯಾದ ವ್ಯವಸ್ಥೆಯನ್ನು ಮಾಡಲು ಪಾಣಿನಿಯು "ಅನಭಿಹಿತೇ" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 2-3-1) ಎಂಬ ಅಧಿಕಾರದಲ್ಲಿ ದ್ವಿತೀಯಾ ಮುಂತಾದ ಕಾರಕವಿಭಕ್ತಿಗಳನ್ನು ವಿಧಿಸಿದ್ದಾನೆ.

## ಸಂಬೋಧನ

"ಸಂಬೋಧನೇ ಚ" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 2-3-47)

ಇಹ ಪ್ರಥಮಾ ಸ್ಯಾತ್ । ಸಂಬೋಧನಾರ್ಥದಲ್ಲಿರುವ ಪ್ರಾತಿಪದಿಕದ ಮೇಲೂ ಪ್ರಥಮಾವಿಭಕ್ತಿಯು ಬರುತ್ತದೆ. ಸಂಬೋಧನೆಯೆಂದರೆ, ಕಾರ್ಯಾಂತರದಲ್ಲಿ ತೊಡಗಿದ ವ್ಯಕ್ತಿಯನ್ನು ತನಗೆ ಅಭಿಮುಖವಾಗಿ ಮಾಡಿಕೊಳ್ಳುವುದು ಎಂಬುದಾಗಿ ಅರ್ಥ.
ಉದಾ : ಹೇ ರಾಮ ಮಾಂ ಪಾಹಿ । ಸಂಬೋಧನವೂ ಕೂಡ ಕ್ರಿಯೆಯಲ್ಲಿಯೇ ಅನ್ವಿತವಾಗುತ್ತದೆ.ಆಖ್ಯಾತಪ್ರತ್ಯಯಾರ್ಥದಲ್ಲಿ ಸಂಬೋಧನಪ್ರತ್ಯಯಾಂತಕ್ಕೆ ಅಭೇ - ದಾನ್ವಯ ಇರುತ್ತದೆ. ಆದ್ದರಿಂದಲೇ ಇದನ್ನು ಸಂಬೋಧನಪ್ರಥಮಾವಿಭಕ್ತಿ ಎಂದು ಕರೆಯುತ್ತಾರೆ.

## ಕರ್ಮ

"ಕರ್ತುರೀಪ್ಸಿತತಮಂಕರ್ಮ" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 1-4-49)

ಕರ್ತುಃ ಕ್ರಿಯಯಾ ಆಪ್ತುಂ ಇಷ್ಟತಮಂ ಕಾರಕಂ ಕರ್ಮಸಂಜ್ಞಂ ಸ್ಯಾತ್ । ಕರ್ತನು ತನ್ನಲ್ಲಿರುವ ವ್ಯಾಪಾರದಿಂದ ಹುಟ್ಟುವ ಫಲದೊಡನೆ ಸಂಬಂಧಿಸಲೆಂದು ಯಾವುದನ್ನು ಇಚ್ಛಿಸುತ್ತಾನೋ ಆ ಕಾರಕವು ಕರ್ಮಸಂಜ್ಞೆಯನ್ನು ಪಡೆಯುತ್ತದೆ. ಧಾತ್ವರ್ಥಫಲಕ್ಕೆ ಆಶ್ರಯವಾದದ್ದು ಕರ್ಮವೆಂದರ್ಥ.
ಉದಾ : ಚೈತ್ರಃ ತಂಡುಲಂ ಪಚತಿ । ಧಾತ್ವರ್ಥವ್ಯಾಪಾರಾಶ್ರಯನಾದ ಚೈತ್ರನು ಕರ್ತ. ಅವನು ತನ್ನ ವ್ಯಾಪಾರದಿಂದಾಗುವ ವಿಕ್ಲಿತ್ತಿಯೆಂಬ ಫಲವು ತಂಡುಲ- ದಲ್ಲಾಗಲೆಂದು ಇಚ್ಛಿಸಿದ್ದಾನೆ. ಆದ್ದರಿಂದ ತಂಡುಲವು ಕರ್ಮವಾಗುತ್ತದೆ. "ಕರ್ಮಣಿ ದ್ವಿತೀಯಾ" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 2-3-2) ಸೂತ್ರದಿಂದ ತಂಡುಲಕ್ಕೆ ದ್ವಿತೀಯಾವಿಭಕ್ತಿ ಬಂದಿದೆ. ವ್ಯಾಪಾರಜನ್ಯ ಫಲವು ಕರ್ಮದಲ್ಲಿರುವಂತೆ ಕರ್ತೃವಿನಲ್ಲಿಯೂ ಇರುವುದುಂಟು.
ಉದಾ: ಚೈತ್ರಃ ಗ್ರಾಮಂ ಗಚ್ಛತಿ ।



ಈ ವಾಕ್ಯದಲ್ಲಿ ಉತ್ತರದೇಶಸಂಯೋಗಾನುಕೂಲವ್ಯಾಪಾರವು ಧಾತುವಿನ ಅರ್ಥ. ಸಂಯೋಗವು ಯಾವಾಗಲೂ ದ್ವಿನಿಷ್ಠ. ಪ್ರಕೃತ, ಚೈತ್ರನು ಗ್ರಾಮಕ್ಕೆ ಹೋದಾಗ ಚೈತ್ರನಿಗೂ ಗಾಮಕ್ಕೂ ಸಂಯೋಗವಾಗುತ್ತದೆ. ಈ ಸಂಯೋಗವು ಗ್ರಾಮದಲ್ಲಿರುವಂತೆ ಕರ್ತೃವಾದ ಚೈತ್ರನಲ್ಲಿಯೂ ಇದೆ. ಏವಂ ಚ ಉಭಯವೂ ಫಲಾಶ್ರಯವಾಗಿರುವುದರಿಂದ ಚೈತ್ರನಿಗೂ ಗ್ರಾಮಕ್ಕೂ ಕರ್ಮಸಂಜ್ಞೆಯು ಪ್ರಾಪ್ತವಾಗುತ್ತದೆ. ಹೀಗೆ ಚೈತ್ರನು ವ್ಯಾಪಾರಾಶ್ರಯವಾಗಿರುವುದರಿಂದ ಕರ್ತೃ- ಸಂಜ್ಞೆಯನ್ನೂ ಫಲಾಶ್ರಯವೂ ಕೂಡ ಆಗಿರುವುದರಿಂದ ಕರ್ಮಸಂಜ್ಞೆಯನ್ನೂ ಪಡೆದುಕೊಳ್ಳುತ್ತಾನೆ. ಚೈತ್ರನಿಗೆ ಕರ್ತೃಸಜ್ಞೆ ಬರಬೇಕೆ ಕರ್ಮಸಂಜ್ಞೆ ಬರಬೇಕೆ? ಈ ರಿತಿಯಲ್ಲಿ ವಿಪ್ರತಿಷೇಧ ಉಂಟಾದಾಗ "ವಿಪ್ರತಿಷೇಧೇ ಪರಂಕಾರ್ಯಮ್" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 1-4-2) ಸೂತ್ರದಿಂದ ಅಷ್ಟಾಧ್ಯಾಯಿಯಲ್ಲಿ ಪರದಲ್ಲಿರುವ ಕರ್ತೃಸಂಜ್ಞೆ ಬರುತ್ತದೆಯೇ ಹೊರತು ಪೂರ್ವದಲ್ಲಿರುವ ಕರ್ಮಸಂಜ್ಞೆ ಬರು- ವುದಿಲ್ಲ. ಅಷ್ಟಾಧ್ಯಾಯಿಯಲ್ಲಿ ಮೊದಲು ಕರ್ಮಸಂಜ್ಞಾ ಸೂತ್ರವಿದೆ. ನಂತರದಲ್ಲಿ ಕರ್ತೃಸಂಜ್ಞಾ ಸೂತ್ರವಿದೆ. ಪೂರ್ವಕ್ಕಿಂತ ಪರಸೂತ್ರವು ಪ್ರಬಲವೆಂದು ಪ್ರಕೃತ ಸೂತ್ರದ ಅರ್ಥ. ಆದ್ದರಿಂದ ಚೈತ್ರನಿಗೆ ಕರ್ಮಸಂಜ್ಞೆ ಬರುವುದಿಲ್ಲ. ಇದು ವ್ಯಾಕರಣಶಾಸ್ತ್ರದ ನಿಯಮ.

## ಸಕರ್ಮಕ-ಅಕರ್ಮಕಧಾತುಗಳ ಲಕ್ಷಣ

'ಫಲವ್ಯಧಿಕರಣವ್ಯಾಪಾರವಾಚಕತ್ವಂ ಸಕರ್ಮಕತ್ವಮ್' ಎಂದು ಸಕರ್ಮಕ- ಧಾತುವಿನ ಲಕ್ಷಣ. ಫಲವ್ಯಾಪಾರಗಳು ಧಾತ್ವರ್ಥಗಳು. ಫಲಕ್ಕೆ ಯಾವುದು ಆಶ್ರಯವೋ ಅದಕ್ಕೆ ಭಿನ್ನವಾದ ಆಶ್ರಯದಲ್ಲಿರುವ ವ್ಯಾಪಾರವನ್ನು ಬೋಧಿ- ಸುವುದು ಸಕರ್ಮಕ ಧಾತುವಿನ ಲಕ್ಷಣ.
ಉದಾ : 'ಚೈತ್ರಃ ತಂಡುಲಂ ಪಚತಿ' ಇಲ್ಲಿ ವಿಕ್ಲಿತ್ಯನುಕೂಲವ್ಯಾಪಾರ 'ಪಚ್' ಧಾತುವಿನ ಅರ್ಥ. ಫಲವಾದ ವಿಕ್ಲಿತ್ತಿ (ಮೃದುತ್ವ) ತಂಡುಲದಲ್ಲಿದೆ. ಈ ಫಲವನ್ನು ಉಂಟುಮಾಡುವ ಕ್ರಿಯೆ (ವ್ಯಾಪಾರ) ಫಲಾಶ್ರಯಕ್ಕೆ ಭಿನ್ನವಾದ ಚೈತ್ರನಲ್ಲಿದೆ. ಆದ್ದರಿಂದ 'ಪಚ್' ಧಾತುವು ಸಕರ್ಮಕ. 'ಫಲಸಮಾನಾಧಿಕರಣವ್ಯಾಪಾರ- ವಾಚಕತ್ವಂ ಅಕರ್ಮಕತ್ವಮ್' ಇದು ಅಕರ್ಮಕಧಾತುವಿನ ಲಕ್ಷಣ. ಅಂದರೆ ಫಲವು ಯಾವುದರಲ್ಲಿದೆಯೋ ಅದರಲ್ಲಿಯೇ ಇರುವ ವ್ಯಾಪಾರವನ್ನು ಬೋಧಿ- ಸುವುದು ಅಕರ್ಮಕ ಧಾತುವಿನ ಲಕ್ಷಣ.

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# व्याकरणे शब्दवृत्तयः

डा. अनुपमा बि. (बेङ्गळूरु)*

**शब्दशक्तिः**

शब्दस्य शक्तिः शब्दशक्तिः । तया शक्त्या एव शब्दः अभीष्टार्थं प्रकाशते । न स्यात्शब्देषु शक्तिर्यादि, तर्हि कृतोऽपि प्रयत्ने अर्थबोधो न स्यात् यथोक्तं वाक्यपदीयकारेण भर्तृहरिणा–

**विषयत्वमापन्नैः शब्दैर्नार्थः प्रकाशते ।**
**न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः ।**

अपि च–

तस्य प्राणे च या शक्तिः या च बुद्धौ व्यवस्थिता विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते ।

अत्र अर्थाभिव्यक्तौ प्राण–बुद्ध्योः महत्वं प्रतिपादयन् वाक्यपदीयकारः भर्तृहरिः आह, यत् द्वयोः साहाय्येन एव शब्दशक्तिर्विवर्तते । अर्थात् शब्दः प्राणाधि–ष्ठानौबुद्ध्यधिष्ठानश्च । द्वाभ्यां प्राणं बुद्धिशक्तिभ्यां अभिव्यक्तः अर्थः प्रतााययति । का नाम शक्तिरिति जिज्ञासायां नागेशेन उच्यते–

**“शब्दार्थयोस्तादात्म्यमेव शक्तिः ।”**

तदेव शक्तिः संस्कृतव्याकरणशास्त्रे वृत्ति इति व्यवहारः

**वृत्तिस्वरूपम्**–

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः संस्कृत व्याकरणे प्रसिद्धाः ।
“ **परार्थाभिधानं वृत्तिः**” इति वृत्तेः लक्षणम् । अर्थात् प्रत्ययान्तर्भावेन अन्यपदार्थान्तर्भावेन वा यो विशिष्टः अर्थः सः परार्थः । परार्थः अभिधीयते येन इत्यर्थे करणे ल्युटि परार्थाभिधानम् इति शब्दस्य व्युत्पत्तिः। इदम् लक्षणं “समर्थः पदविधिः” इति सूत्रे भाष्ये दृश्यते ।

**तत्र कैयटः परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः ।**



ಅಪಾಯೋ ವಿಶ್ಲೇಷಃ, ತಸ್ಮಿನ್ ಸಾಧ್ಯೇ ಧ್ರುವಂ ಅವಧಿಭೂತಂ ಕಾರಕಂ ಅಪಾದಾನಂ ಸ್ಯಾತ್ । ಅಪಾಯವೆಂದರೆ ವಿಶ್ಲೇಷ. ವಿಯೋಗಎಂದು ಅರ್ಥ. ಒಂದು ವಸ್ತುವಿನಿಂದ ವಿಯೋಗವಾಗುವಾಗ ಅವಧಿಭೂತವಾದ ಕಾರಕಕ್ಕೆ ಅಪಾದಾನವೆಂದು ಹೆಸರು. ಈ ಅಪಾದಾನವಾಚಕದ ಮೇಲೆ “ಅಪಾದಾನೇ ಪಂಚಮೀ” (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 2–3–28) ಸೂತ್ರದಿಂದ ಪಂಚಮೀವಿಭಕ್ತಿ ಬರುತ್ತದೆ.
ಉದಾ : ವೃಕ್ಷಾತ್ ಪರ್ಣಂ ಪತತಿ ।
“ಭೀತ್ರಾರ್ಥಾನಾಂ ಭಯಹೇತುಃ” (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 1–4–25)
ಭಯಾರ್ಥಾನಾಂ ತ್ರಾಣಾರ್ಥಾನಾಂ ಚ ಪ್ರಯೋಗೇ ಭಯಹೇತುಃ ಅಪಾದಾನಂ ಸ್ಯಾತ್ । ಭಯಾರ್ಥಕಧಾತುವಿನ ಯೋಗವಿದ್ದಾಗಲೂ ರಕ್ಷಣಾರ್ಥಕಧಾತುವಿನ ಯೋಗವಿದ್ದಾಗಲೂ ಭೀತಿಗೆ ಹೇತುವಾದುದಕ್ಕೆ ಅಪಾದಾನಸಂಜ್ಞೆ ಬರುತ್ತದೆ. ಉದಾ : ಚೋರಾತ್ ಬಿಭೇತಿ । ಚೋರಾತ್ ತ್ರಾಯತೇ ।

**ಅಧಿಕರಣ**

**“ಆಧಾರೋಽಧಿಕರಣಮ್” (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 1–4–45)**

**ಕರ್ತೃಕರ್ಮದ್ವಾರಾತನ್ನಿಷ್ಠಕ್ರಿಯಾಯಾಃ ಆಧಾರಃ ಕಾರಕಂ ಅಧಿಕರಣಸಂಜ್ಞಃ ಸ್ಯಾತ್ । ಕರ್ತೃಕರ್ಮಗಳ ಮೂಲಕ ಕ್ರಿಯೆಗೆ ಆಧಾರವಾದದ್ದು ಅಧಿಕರಣಸಂಜ್ಞೆಯನ್ನು ಪಡೆಯುತ್ತದೆ. ಔಪಶ್ಲೇಷಿಕ, ವೈಷಯಿಕ, ಅಭಿವ್ಯಾಪಕ ಎಂದು ಅಧಿಕರಣವು ಮೂರುವಿಧ. ಉಪಶ್ಲೇಷವೆಂದರೆ ಏಕದೇಶಸಂಬಂಧ ಮತ್ತು ಸಾಮೀಪ್ಯ– ಸಂಬಂಧ.**

**ಉದಾ : ದೇವದತ್ತಃ ಗೃಹೇ ವಸತಿ । ದೇವದತ್ತಃ ಕಟೇ ಆಸ್ತೇ । ಸ್ಥಾಲ್ಯಾಂ ತಂಡುಲಾನ್ ಪಚತಿ । ವಿಷಯತಾಸಂಬಂಧದಿಂದ ಆಧಾರವಾದರೆ ವೈಷಯಿಕ ಅಧಿಕರಣ.**

**ಉದಾ : ಮೋಕ್ಷೇ ಇಚ್ಛಾ ಅಸ್ತಿ । ಸರ್ವಾವಯವ ವ್ಯಾಪ್ತಿಯುಳ್ಳ ಆಧಾರವು ಅಭಿವ್ಯಾಪಕಅಧಿಕರಣ.**
**ಉದಾ : ತಿಲೇಷು ತೈಲಮ್ ।**

## ಷಷ್ಠೀವಿಭಕ್ತಿ

"ಷಷ್ಠೀ ಶೇಷೇ" (ಅಷ್ಟಾ. ಸೂ. ಸಂ. 2-3-50)

ಕಾರಕಪ್ರಾತಿಪದಿಕಾರ್ಥವ್ಯತಿರಿಕ್ತಃ ಸ್ವಸ್ವಾಮಿಭಾವಾದಿಸಂಬಂಧಃ ಶೇಷಃ, ತತ್ರ ಷಷ್ಠೀ ಸ್ಯಾತ್ । ಶೇಷಶಬ್ದಕ್ಕೆ ಹೇಳಿ ಉಳಿದದ್ದು ಎಂಬುದಾಗಿ ಅರ್ಥ. ಈ ಸೂತ್ರಕ್ಕಿಂತ ಹಿಂದೆ ವಿಭಕ್ತಿಗಳನ್ನು ಯಾವ ಯಾವ ಅರ್ಥಗಳಲ್ಲಿ ಹೇಳಲಾಗಿ- ದೆಯೋ ಅವನ್ನು ಬಿಟ್ಟು ಉಳಿದ ಅರ್ಥವು ಶೇಷ. ಜನ್ಯಜನಕಭಾವ ಮುಂತಾದ ಸಂಬಂಧಸಾಮಾನ್ಯವನ್ನು ತಿಳಿಸುವಾಗ ಷಷ್ಠೀವಿಭಕ್ತಿಯು ಬರುತ್ತದೆ.

ಉದಾ : ರಾಜ್ಞಃ ಪುರುಷಃ । ರಾಮಃ ದಶರಥಸ್ಯ ಪುತ್ರಃ ।

ಇಲ್ಲೊಂದು ಶಂಕೆ ಹುಟ್ಟುತ್ತದೆ. ಅದೇನೆಂದರೆ, ಸಂಬಂಧವು ಉಭಯನಿಷ್ಠ- ವಾದದ್ದು. ಎರಡು ವಸ್ತುಗಳಿಲ್ಲದೆ ಸಂಬಂಧವೇ ಉಂಟಾಗುವುದಿಲ್ಲ. ರಾಜ್ಞಃ ಪುರುಷಃ ಎಂಬಲ್ಲಿ ರಾಜನು ಸ್ವಾಮಿ, ಪುರುಷನು ಅವನ ಸೇವಕ. ಇಲ್ಲಿ ಇಬ್ಬರಲ್ಲಿಯೂ ಸಂಬಂಧವಿದೆ. ಹೀಗಿರುವಾಗ ಸಂಬಂಧಾರ್ಥದಲ್ಲಿ ಬರುವ ಷಷ್ಠಿಯು ಯಾವ ಶಬ್ದದ ಮೇಲೆ ಬರಬೇಕು? ರಾಜಶಬ್ದದ ಮೇಲೋ? ಪುರುಷಶಬ್ದದ ಮೇಲೋ? ಇದಕ್ಕೆ ಸಮಾಧಾನವೇನೆಂದರೆ, ಎರಡು ವಸ್ತುಗಳಿಗೆ ಸಂಬಂಧವನ್ನು ಹೇಳುವಾಗ ಒಂದು ವಿಶೇಷಣವಾಗಿಯೂ, ಇನ್ನೊಂದು ವಿಶೇಷ್ಯವಾಗಿಯೂ ಇರುತ್ತದೆ. ವಿಶೇಷಣವು ವಿಶೇಷ್ಯವನ್ನು ಯಾವಾಗಲು ನಿಯತವಾಗಿ ಬಯಸುತ್ತದೆ. ಸಂಬಂಧದ ಆಕಾಂಕ್ಷೆ ವಿಶೇಷಣದಲ್ಲಿ ಸ್ಫುಟವಾಗಿ ಬರುವುದರಿಂದ ಅದನ್ನು ಪೂರೈಸುವುದಕ್ಕಾಗಿ ವಿಷೇಷಣವಾಚಕದ ಮೇಲೆ ಷಷ್ಠೀವಿಭಕ್ತಿ ಬರುತ್ತದೆ. ವಿಶೇಷಣವೆಂದರೆ ವ್ಯಾವರ್ತಕ. ಇನ್ನೊಂದರ ಸಂಬಂಧವನ್ನು ವ್ಯಾವರ್ತಿಸಿ ತನ್ನ ಸಂಬಂಧವನ್ನು ಉಳಿಸಿಕೊಳ್ಳುವುದು ವ್ಯಾವರ್ತಕ. ಅದೇ ವಿಶೇಷಣ. ಪ್ರಕೃತ, ರಾಜ ಶಬ್ದವು ಬೇರೆಯವರ ಸಂಬಂಧವನ್ನು ವ್ಯಾವರ್ತಿಸಿ ತನ್ನ ಸಂಬಂಧವನ್ನು ಮಾತ್ರ ಪುರುಷನಲ್ಲಿ ಉಳಿಸಿಕೊಳ್ಳುವುದರಿಂದ ರಾಜಶಬ್ದ ವಿಶೇಷಣ. ಆದ್ದರಿಂದ ರಾಜಶಬ್ದಕ್ಕೆ ಷಷ್ಠೀವಿಭಕ್ತಿ ಬರುತ್ತದೆ.

*****



## ಆಧಾರಗ್ರಂಥಗಳು :-


1. ಅಷ್ಟಾಧ್ಯಾಯೀಸೂತ್ರಪಾಠ, ಆಚಾರ್ಯಧರ್ಮೇಶ ಭಾರದ್ವಾಜ, ಶ್ರೀ ಪರಮಹಂಸ ಸ್ವಾಮೀ ಶಿವಾನಂದ ಸರಸ್ವತೀ ಸಂಸ್ಕೃತ ಸಂಸ್ಕೃತಿ ಶೋಧ ಶಿಕ್ಷಣ ಪ್ರಶಿಕ್ಷಣ ಸಂಸ್ಥಾನ ನಾಸಿಕ ಮಹಾರಾಷ್ಟ್ರ, 2006
2. ಸಿದ್ಧಾಂತಕೌಮುದೀ, ಭಟ್ಟೋಜಿದೀಕ್ಷಿತ, ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ಗಿರಿಧರಶರ್ಮಾ ಮತ್ತು ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ಪರಮೇಸ್ವರಾನಂದ ಶರ್ಮಾ ಮೋತೀಲಾಲ ಬನಾರಸೀದಾಸ ವಾರಾಣಸೀ, 2014
3. ವ್ಯಾಕರಣಶಾಸ್ತ್ರದ ಪರಿವಾರ, ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥ ಶರ್ಮಾ, ರಾಷ್ಟ್ರಕವಿ ಗೋವಿಂದ ಪೈ ಸಂಶೋಧನ ಕೇಂದ್ರ ಉಡುಪಿ, 2002
4. ಕಾರಕಮ್, ಜಿ. ಮಹಬಲೇಶ್ವರಭಟ್ಟಃ, ಸಂಸ್ಕೃತಭಾರತೀ ಬೆಂಗಳೂರು, 1999



ಪ್ರೊ. ಸುಬ್ರಾಯ ಎನ್. ಭಟ್ಟ,
ಪ್ರಾಧ್ಯಾಪಕರು,
ಸಿ.ಎಲ್.ವೈ. ಸಂಸ್ಕೃತಕಾಲೇಜು,
ಧಾರವಾಡ -580008
ಕರ್ನಾಟಕ
**Mobil : 9480028403**
**E-mail : subraynb@gmail.com**


(प्रो. सुब्राय एन्. भट्ट नामकः संशोधनच्छात्रः धारवाडमहानगरे विराजमाने कर्नाटक आर्ट्स कालेज, धारवाड इत्यस्य संस्कृतविभागस्य मुख्यस्थानां सहायकप्राध्यापकानां डा. रजनि हेच्. महाभागानां मार्गदर्शनेन "ಶ್ರೀಭಟ್ಟೋಜಿ ದೀಕ್ಷಿತವಿರಚಿತ ವೈಯಾಕರಣ ಸಿದ್ಧಾಂತಕಾರಿಕೆಗಳಲ್ಲಿ ಬರುವ ದಾರ್ಶನಿಕ ಅಂಶಗಳ ಅಧ್ಯಯನ" इत्यस्मिन् विषये धारवाडस्थे कर्नाटक विश्वविद्यालये स्नातकोत्तरसंस्कृत-अध्ययनविभागे संशोधनकार्ये रतः ।)

*******

| प्रत्ययाः | रूपाणि | अर्थः |
|---|---|---|
| क्विप् | कृष्णाति | कृष्णमिव आचरति (प्रत्ययस्य स्वरलोपः) |
| णिच् | उपवीणयति | वीणया उपगायति । |
| यङ् | दरीदृश्यते | पुनःपुनः (भृशं वा) दृश्यते । |
| यक् | कण्डूयति/महीयते | स्वार्थे |
| आय | गोपायति | स्वार्थे |
| ईयङ् | ऋतीयते | स्वार्थे |
| णिङ् | कामयते | स्वार्थे |

सनाद्यन्तधातुवृत्तिः पञ्चवृत्तिषु अन्यतमा भवति ।
कृत्तद्धितसमासैकशेषसनाद्यन्त– धातुरूपाः पञ्चवृत्तयः ।
पठितः (कर्म) – पठ् प्रकृतिः . खाद्यम्

३. भाव (क्रिया)– कृतिः, बुभुक्षा भोक्तुम् इच्छा ।

**परामर्शन ग्रन्थसूची**


१. पणिनीय अष्टाध्यायी ।
२. वाक्यपदीयम् ।
३. लघुमञ्जूषा ।
४. वैयाकरणसिद्धान्तकौमुदी ।
५. समासः ।



**डा. अनुपमा बि.**
सहायक प्राध्यापिका,
व्याकरणशास्त्रविभागः
कर्नाटकसंस्कृत विश्वविद्यालयः
चामराजपेटे–560018
बेङ्गळूरु, कर्नाटक
Mobil : **9379779278**
Email-anupamamys04@gmail.com




**पदरचना –**

भाषायाः वाक्यं, पदम् इति अवयवद्वयमस्ति । वस्तुतः वक्यादेव अर्थबोधः भवति । वाक्ये पदानि सन्ति । पदानाम् अर्थद्वारा वाक्यस्य अर्थावगमनं भवति अतः पदानि ज्ञातव्यानि । यत् किमपि पदं भवतु पदे भागद्वयं भवति एका प्रकृतिः अपरः प्रत्ययः । उभयोः प्रकृतेः कश्चिदर्थ भवति, प्रत्ययस्य कश्चिदर्थः द्योत्यते प्रायेण सर्वेषु पदेषु अयं विभागः दृष्टुं शक्यते । प्रकृति प्रत्ययज्ञानं व्याकरणादेव भवति । उदाहरणरूपेण सस्कृतम् इति पदं पश्यामः ।

**अत्र संस्कृत(प्रकृतिः) + सु (प्रत्ययः)**
**सम् (प्रकृति) सु (प्रत्ययः) कृत (प्रकृति) सु (प्रत्ययः) पुनः**
**कृ (प्रकृतिः) क्त (प्रत्ययः) इति बहूनां प्रत्ययानां योजनेन संस्कृतम् इति रूपसिद्धि भवति ।**

अत्र पदं इत्युक्ते द्विविधमेव भवति सुबन्तं तिङन्तम् इति सुबन्ते प्रातिपदिकं प्रकृतिः सुप् इति प्रत्ययः, तिङन्तस्य प्रकृतिः “धातु” “तिङ” प्रत्ययः ।

**कृद्वृति** – धातोः कृत् प्रत्यय योगेन कृदन्त इति प्रातिपदिकं भवति ।
कृत् इति प्रत्ययाः ।
कृत् अन्ते यस्य सः कृदन्ताः ।
कृदन्तेभ्यः सुप् प्रत्यययोजनेन सुबन्ताः भवन्ति ।
प्रायः १४० प्रत्ययाः सन्ति । भिन्नेषु अर्थेषु भवन्ति ।
कर्तरि– ण्वुल्, तृच्, शतृ /शानच्, क्विप्
उदा – १. पाचकः (कर्ता) –पच् धातुः अक इति प्रत्यय यः पाककार्यं करोति सः पाचकः इत्यर्थः । वक्ता, गतवान् इत्यादय :,

२.भावे– ल्युट्, क्तिन्, अ, घञ्, अच्, इत्यादयः
उदा– ल्युट् प्रत्ययः (अन)
उदाः

**पूर्वं रामतपोवन<u>गमनं</u> हत्वा मृगं काञ्चनम्**
**वैदेही<u>हरणं</u> जटायु<u>मरणं</u> सुग्रीव<u>सम्भाषणम्</u>**

**वालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं**
**पश्चाद्रावणकुम्भकर्णहननम् एतद्धिरामायणम् ॥**

अयं श्लोकः एकेन श्लोकेनैव सम्पूर्ण रामायणस्य प्रमुखानां घटनानां संग्रहः अस्मिन् श्लोके दृश्यते ।

आदौ रामः वनं गतवान्, तत्र काञ्चन मृगम् हतवान्, सीतायाः अपहरणम् आसीत्, जटायु मरणं प्राप्तवान्, अनन्तरं सुग्रीवेण सह सखम् प्राप्तम्, हनुमान् समुद्रं तारितवान् ल‘का दग्धम् अन्ते रावण कुम्भकर्ण हननम् । अत्र क्रियाबिधकानि पदानि सर्वे ल्युड् प्रत्ययान्त कृदन्तानि ।

**तद्धितवृत्तिः** – तद्धितमपि सुबन्तप्रातिपदिकम् अत्रापि एकेनैव पदेन सम्पूर्ण वाक्यस्य अर्थावगमनं भवति ।
यथा – दाशरथिः रामः इत्यर्थः किन्तु अत्र रामः केवल रामः न, सः दशरथस्य पुत्रः ।

तद्धित प्रत्ययाः २८१ भिन्नेषु अर्थेषु भवन्ति ।
१. अपत्यार्थः– राघवः. सौमित्रिः
२. मतुबर्थः– धनम् अस्य अस्तीति धनवत् धनवान् ।
३. भावार्थः – पटोः भावः पटुत्वम् । चतुरस्य भावः चातुर्यम् ।
४. पूरणार्थः – पञ्चमः, नवमः ।
५. अतिशयार्थः– बलवत्तरः. पुरुषोत्तमः ।
६. नासिकायै हितम् नस्यम् ।
७. व्याकरणम् अधीते वेद वा वैयाकरणः।

**समासवृत्तिः** –

समासस्वरूपं तृतीया वृत्तिः । समास इति प्रक्रिया संस्कृतभाषायां महत्वपूर्ण –स्थानम् आवहति । लोके स्वातन्त्र्येण प्रयोगार्हाणां स्वार्थे परिपूर्णानाञ्च पदानां सङ्गातशक्त्या विशिष्टैकार्थबोधकत्वं समासत्वम् । अर्थात् परस्पर अर्थावलम्ब्य भिन्नार्थसम्पादनाय पदानां मेलनम् ।



**अव्ययीभाव समासः–**

उपकृष्णम् (कृष्णस्य समीपम्) शाकप्रति( शाकस्य लिशः)
**तत्पुरुषः–**

राजस्य पुरुषः. उमायाः पतिः, नीलोत्पलम्, पद्मनाभः. नीलकण्ठः ।

**एकशेषः**–

बहूनां पदानां प्रयोगे एकेनैवपदेन अर्थावबोधनं यत्र सम्भवति तदेव एकं शिष्यति यत्र तद् एकशेषः । सरूपाणामेकसेष एकविभक्तौ” (१.२.६४) इति सूत्रतः एकविभक्तौ यानि सरूपाण्येव दृष्टानि तानि एक एव शिष्यते ।
उदा – रामश्च रामश्च रामश्च रामाः ।

**सनाद्यन्तधातवः** –

सन् आदिः येषां ते सनादयः । ते अन्ते येषां ते सनाद्यन्ताः ।
गुप्तिज्कि द्भ्य सन् (पा. सू ३.९.०५) इत्यारभ्य कमेर्णिङ् (३.१.१०) इति पर्यन्तं सूत्रैः विहिताः प्रत्ययाः सनादयः इत्युच्यते । सनाद्यन्तानां शब्दानां धातुसंज्ञा विधीयते “ सनाद्यन्ताः धातवः” (३.१.३२) इति सूत्रेण । सनादिप्रत्ययाः एवम्–

**सन्क्यच्काम्यच्क्यङ् क्यषोऽथाचारक्विब्णिज्यङौ तथा।**
**यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः ॥**

सनादि इति द्वादशप्रत्ययानां योजनेन पृथगर्थकथनं भवति ।

| प्रत्ययाः | रूपाणि | अर्थः |
|---|---|---|
| सन् | पिपठिषति | पठितुम् इच्छति । |
| क्यच् | पुत्रीयति | पुत्रम् आत्मनः इच्छति । |
| काम्यच् | पुत्रकाम्यति | पुत्रं कामयते । |
| क्यङ् | यमायते | यममिव आचरति । |
| क्यष् | निद्रायते | अनिद्रावान् निद्रावान् भवति । |

एवं च प्रकृति–पुरुषयोरविवेकज्ञानमेव संसारकारणम् । विवेकज्ञानं तु मोक्ष कारणमिति । तादृश प्रकृति–पुरुषयोःविवेकज्ञानादात्यन्तिकं दुःखनिवृत्तिं सम्पाद्य स्वस्वरूपेण पुरुषसतिष्ठति । अयमेव खलु साख्यानां मोक्षः ।

एवं साङ्ख्यदर्शने मोक्षस्वरूपविषये स्वसिद्धान्तमनुसृत्य तत्त्वं निरूप्य तत्र प्रमाण्यतया श्रुत्यागमानुपदिशन्ति । दृढतरं च साधयन्ति ।

मुक्तिसाधनविषये तत् स्वरूप विषये अन्यस्मिन्श्च (विवदमानापि) मुक्तिरूपं कञ्चनपदार्थमङ्गीकुर्वन्त्येव । तैरुपदिष्टः मार्गोऽपि किञ्चिदिव विलक्षणः । तथापि दुःखराहित्यं जन्मान्तरराहित्यं च समानमेव सर्वेषां तीर्थङ्कराणाम् ।

अतः सर्वेपि भावुकाः रसिकाः आचार्यैः प्राक्तनैर्युक्तेषु मार्गेषु कञ्चन पन्थानमवलम्ब्य मुक्तास्युः ।

इति शम्

॥ सर्वे जनाः सुखिनो भवन्तु ॥

## BIBLIOGRAPHY


1. **"षडदर्शनसमुच्चयः"**
   डा॥ कामेश्वरनाथमिश्रः, Chowkamba Sanskrit series office Varanasi. 1979.

2. **History of Sankskrit Literature** :
   M. Krishnamachar, Printed at Motilal Banarasidad 2010.

3. जयतीर्थभिक्षुविरचिता **'प्रमाणपद्धतिः',**
   सम्पादकः डा॥ ए.वि. नागसम्पिगे, प्रकाशनम् पूर्णप्रज्ञसंशोधनमंन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु –२७. प्रथम मुद्रणम् २०१०.

4. गङ्गासहायशर्मप्रणीतः, **'न्यायप्रदीपः'**
   सम्पादकः डा॥ ए.वि. नागसम्पिगे, प्रकाशनम् पूर्णप्रज्ञसंशोधनमंन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु –२७. प्रथम मुद्रणम् २०१२.


Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# साङ्ख्यदर्शने मोक्षस्वरूपम्

**डा. एस्. एस्. निरञ्जनमूर्ति (तुमकूरु)***

"अदुःखमितरत् सर्वं जीवा एव तु दुःखिनः तेषां दुःख प्रहाणाय श्रुतिरेषा प्रवर्तते" इत्येवं सहस्रं वचांसि तत्र तत्र श्रूयन्ते । तत्रचास्मिन् प्रपञ्चे ईश्वर–व्यतिरिक्ता सर्वेऽपि चेतन पदार्थाः दुःखिनः । तत्रापि अस्मदादि चेतन पदार्थाः जीवाः दुःखवन्तः इति "अहं दुःखी" इति प्रमाण सहस्रैः अधिगतोऽस्ति । तादृश दुःखानां प्रहणनं नास्ति संसारे न भविष्यति न भूता च । वस्तुतस्तु संसार एव दुःखतरः दुःखग्रामश्च । मनुष्यस्य जीवने दुःखानि सुखानि च चक्रवत् परिभ्रमन्ति । अतः एतादृश संसार निवारणोपायः अवश्यं करणीयः एव । तन्निवारणार्थं अनन्ता अपौरुषेया वाणी श्रुतिरिति परिगीता, सा आप्तबन्धुरिव अस्माकं पुरस्तादेव परिवर्तते । परंत्वनिषं परिवर्तमानायाः श्रुतिकुमार्याः आन्तरिकं भावं अभिप्रायं वाभिगन्तुं अस्मत् सदृशाः चेतनाः न शक्ताः । तामेतां श्रुतिकुमार्याः हार्दमान्तरिकं आविर्भावयितुं व्यास–जैमिनि–गौतम–कणाद–पतञ्जलिप्रभृतयः, शङ्कर–रामानुज–मध्व प्रभृत्याचार्याः अस्यां देव भूमौ वेद भूमौ च प्राप्यजन्मानि सूत्रभाष्य वृत्यादि पुष्पगुम्पित मल्लिकामालया श्रुतिकुमार्याः कण्ठं भूषायाञ्चक्रुः ।

यद्यपि आपाततः आलोचने तेषां वचस्सु प्रतिभात्यपि विरोधः जिज्ञासूनां मनसि पस्फुरति । न हि इक्षुदण्डलेहेन इक्षुरसास्वादो भविष्यति ? अपि तु इक्षुदण्डमर्दनेनैव । अतः बहवो ज्ञानिवरेण्याः एतादृश श्रुतीक्षुदण्डं विमृद्य तदीय रस पानेन नः तोषयामासुः । अतः तेषां अभिप्रायं यत्किञ्चिदेव आविष्कर्तुं मनः मोमोदिति परम् ।

तत्र भारतीय दर्शनेषु वेदार्थं आविष्कर्तुं प्रवृत्तेषु भारतीय दार्शनिकेषु प्रमेय विषये, प्रमाण विषये, तेषां सख्या विषये, मोक्ष स्वरूपे, तत्रचान्यत्रच विरोधः अस्ति इति भाति ।

तत्र केचित् प्रमाणमेकं इति वदन्तः अन्यान् दूषयन्ति । प्रमाणद्वयवादिनः केचिदतीव दृढतरं परसिद्धान्त अपाकरणपूर्वकं स्वराद्धान्तं प्रकटीचक्रुः । केचित् प्रमाणत्रयः, प्रमाणचतुष्टयः, प्रमाणषट्कवादिनोऽपि सन्ति । तत्र लोकायतः प्रत्यक्षमात्रमङ्गीकृत्य तस्यैव प्रामाण्यमिति । चारुतरवाग्भिः स्वसिद्धान्तस्य प्रतिष्ठां चक्रे । शौद्धोदनि प्रभृतयः प्रत्यक्षमनुमानं द्वयमेव प्रमाणमिति, साङ्ख्य-योग-वैशेषिकाः अन्येपि केचित् प्रत्यक्षं, अनुमानं, आगमश्चेति त्रयमिति प्रमाण समघोषयन् ।

जैमिनिमतमवलम्ब्य प्रवृत्ताः जैमिनीयाः प्रमाण षट्कमिति । वेदान्तिनः वैयाकरणाश्च प्रत्यक्षादि प्रमाणत्रयमिति अङ्गीकृत्य चैतत् तेन साकं ऐतिह्यमपि प्रमाणमित्यङ्गीकृत्य तस्य चान्तर्भावम् आगम एव चक्रुः ।

वेदान्तिनां, साङ्ख्यानां, वैयाकरणनां, जैमिनियानां च । वेदः परमं प्रमाणं अपौरुषेयं च । वैशेषिक-नैयायिकानां तु प्रमाणमपि वेदः नापौरुषेयतया, किन्तु पौरुषेयतया, तत्रापि केषांचिन्मते प्रमाणमपि श्रुतिसन्दर्भः अनुमानमुद्रयेत्येवं सन्त्यत्र बह्वः विप्रतिपत्तयः । सत्स्वपि विप्रतिपत्तिषु, तेषां इयं चिन्ता संसारे खलु दह्यमानस्य दुःखग्राममनुभवतः मानवकुलस्य उद्धारो कथं भवेदिति । तदर्थं तैरुपदिष्टः सन्दृष्टः सन्दिष्टः मार्गः मोक्षमार्गः ।

आस्तिक दर्शनेषु साख्यदर्शनं शिरस्थाने तिष्ठति । तन्मते तत्त्वानि पञ्च विंशति । तानि चैवं वर्तन्ते :- पुरुषः, प्रकृतिः, महत्तत्त्वं, अहङ्कारतत्त्वं, एकादशेन्द्रियाणि (ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, मनः=११), पञ्चतन्मात्राणि । एवं रीत्या पञ्चविंशति तत्त्वानि परिगणितानि । महाभारते च कापिलेयानां साख्य इति नामकरणे कारणमिदमुक्तम् ।

सङ्ख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते । तत्त्वानि च चतुर्विंशत् तेन साङ्ख्याः प्रकीर्तिताः ॥ साङ्ख्यकारिका भूमिकायाम्, डा रविकान्तमणिसूरिभिः महाभाभारतात् साखानां साङ्ख्य इति नामकरणे श्लोकमिदं उद्धृत्य कारणमुपदर्शितम् ।



अस्यायमर्थः- परिणामशीलप्रकृतेः वर्णनात्, चतुर्विंशति तत्त्वानां साङ्ख्यानां परिगणनाद्वारा साङ्ख्य इति तेषाम् इदं नामधेयं प्रतिथम् । परत्वत्र पुरुषस्यापरिगणनात् चतुर्विंशति तत्त्वानीति कैश्चिदुक्तम् । एतन्मते वेदः प्रमाणमपि न पुरुष वाक्यमुद्र्या । किन्त्वपौरुषेयत्वेन ।

अत्र साङ्ख्यैः वेदस्या अपौरुषेयत्वेन कारणमिदमुक्तम् :- यदि च कञ्चन पुरुषं वेदानां कर्तारमिति वदामश्चेत् पुरुषेषु करणानां अपटुतायाः वञ्चकत्वस्य अनृतादि दोषाणां च सद्भावेन पुरुषः न वेदकर्ता । अत एवैते निरीश्वरसाङ्ख्या इति दार्शनिकैः परिगणिताः । परन्तु वेदप्रामाण्याङ्गीकारात् आस्तिक दर्शनेषु एतेषां विद्वद्भिः परिगणनं कृतमस्ति ।

एतेऽपि स्वशास्त्रस्य प्रयोजनं मुक्तिरेवेति वदन्ति । मुक्तिश्च दुःखनिवृत्तिरेव । दुःखनिवृत्तिंविना सुखस्य न कदापि अनुभूयमानत्वं सम्भवति । संसारस्य सुख-दुःखोभयात्मकत्वात् न तस्य च आत्यन्तिक दुःखनिवृत्यात्मकत्वम् । दुखं च प्रकृति-पुरुषयोरविवेकाद्भवति । तथाहि :- प्रकृतौ च सत्त्वं रजः-तमश्चेति गुणत्रयं स्वभावतो वर्तन्ते । तादृश गुणत्रयसंमेलनेन दुःखं पुरुषस्य भवति ।

यद्यपि पुरुषः असङ्गः । यथा स्पटिकमणेः शुद्धस्वभावस्यापि जपाकुसुम-सर्म्पाकात् रक्तिमा भासते, तद्वत् पुरुषस्य स्वाभावतोऽसङ्गस्यापि, त्रिगुणानां आकर-भूतायाः प्रधाननाम्न्याः प्रकृतेः सम्सर्गात् सुखं वा दुखं वा भवति । अर्थात् प्रकृति-पुरुष संयोगादेव सर्वोऽपि सृष्टिः इति तेषां वादः ।

तत्र पुरुषस्य दर्शनार्थं कैवल्यार्थं प्रधानेन संयोगः भवति । तदपि पङ्ग्वन्धवत् । प्रधानः पुरुषं दर्शनार्थं अपेक्षते । पुरुषोपि प्रधानं कैवल्यार्थमपेक्षते । अर्थात् मोक्षप्राप्यर्थं परस्परं पुरुष-प्रकृत्योयोः संयोगः भवतीति ।

अयं च संयोगः, अनादिकालतः विपर्यय ज्ञानवासनया भवतीत्यस्मादेव कारणात् अनादिरेव । परन्तु नायं अनन्तः, यदि च तादृश संयोगः यदा दूरीभवति तदा पुरुषस्य सर्वोऽपि प्राकृतिकानि दुःखान्यपि दूरीभवन्ति । सः तदानीं स्वस्वरूपेणावतिष्टते । इदमेव खलु साख्यानां मोक्ष स्वरूपम् ।

पुनग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ॥१३॥

चञ्चले परिसरे अतीव जागरूकतया व्रताचरणस्य सङ्कल्पः कृतवती पार्वती तस्याः समीपे यानि आभरणानि आसन् तान् आभरणान् अपि रक्षतु इति मृदु लतायै ,हरिणैः दत्वा तपाचरणं कर्तुं सन्नद्धा अभवत् ।

कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृध्देषु वयः समीक्ष्यते ॥१६ ॥

पार्वती स्नानानन्तरम् अग्निं प्रज्वाल्य होमहवनादिकं करोति स्म । एतत् द्रष्टुं ऋषिमुनयोपि आगच्छन्ति स्म। अत्र तापसाः वयस्य भेदं गणनां न कुर्वन्ति । सा उन्नता ज्ञानसम्पन्ना आसीत् इति ज्ञायते ।

विरोधिसत्वो ज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवाचितातिथि ।
नवोटजाभ्यन्तरसम्भृतानलं तपोवनं तच्च बभूव पावनम् ॥१७॥

जीवजन्तूनां मध्ये विरोध-प्रतिरोधः यत् आसीत् तद् सर्वं निवारितम् । शत्रुत्वं त्यक्त्वा मित्रत्वम् अभवत् । एतादृश तपाचरणेन इदं तपोवनं पवित्रम् अभवत् । पर्णकुटीरस्य अन्तः यज्ञकुण्डे अग्निः सदा ज्वलन् आसीत् ।

यदा फलं पूर्वतपः समाधिना न तावता लभ्यममंस्त काङ्क्षितम्
तदानपेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्रचक्रमे ॥ १८॥

इदानीम् आचर्यमाणया तपसा सा यावत् फलामपेक्षितवती तावत् नैव लभ्यते इति मत्वा तस्याः सुकोमलायाः शरीरं मनसि संस्थाप्य कठोरः तपः कर्तुम् आरब्धवती ।

क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाहृयत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च॥ १९॥



5. अन्नम्भट्ट विरचितः **'तर्कसंग्रहः',**
सम्पादकः डा॥ ए.वि. नागसम्पिगे, प्रकाशनम् पूर्णप्रज्ञसंशोधनमंन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु –२७. प्रथम मुद्रणम् २०१२.

6. **'षड्दर्शनसारः',**
सम्पादकः डा॥ ए.वि. नागसम्पिगे, प्रकाशनम् पूर्णप्रज्ञसंशोधनमंन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु – २७. प्रथम मुद्रणम् २०१२.

7. श्रीसायणमाधवाचार्यकृतः – **'सर्वदर्शनसंग्रहः'**
हिन्दी व्याख्यानः,भाष्यकारः डा॥ उमाशङ्कर शर्मा ऋषि, चौखम्बा विद्याभवन, वाराणसी, १९९८.

8. ईश्वरकृष्ण विरचिता साख्यकारिका,
डा. रविकान्त मणि. हंसा प्रकाशन, जयपुर, २००८.

**Dr. S.S.Niranjanamurthy**
Principal,
Sri Siddalingeswara Sanskrit College,
Sri Siddaganga Math,
Tumkur 572 104, Karnataka
Phone : 9964241882
Email: niranjanmurthyss2013@gmail.com

************

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# कुमारसम्भवस्य पञ्चमाध्याये पार्वती

**विदुषी सावित्री पूजारि (बेङ्गळूरु)***

कविकालिदासविरचितं कुमारसम्भवं महाकाव्येषु अन्यतमम् । पार्वती-परमेश्वरयोः परिणयः तथा कुमारस्य जननं काव्यस्य विषयः । लोक-कल्याणार्थं शिवपार्वत्योः विवाहो अभूत् । नो चेत् विश्वमेव तारकासुरेण नष्टो भवति स्म । पार्वती घोरतपं कृत्वा परमेश्वरं परिणीता । तदनन्तरं इन्द्रः पार्वत्याः समीपं गत्वा कुमारं तारकासुरस्य संहाराय प्रेषणीयम् इति वदति । तदा पार्वती शिवं प्रतिरोधं कृतवति । अनन्तरं मातृवात्सल्यं विस्मृत्य देवतानां सुखाय वीरमातुः इव हर्षेण पुत्रं युद्धाय प्रेषितवती ।

पर्वतराजस्य पुत्री पार्वती । कदाचित् नारदेन तस्याः पतिः शिवः भवितुं शक्नोति इति ज्ञात्वा शिवसेवां प्रतिदिनं करोति स्म। शिवेन कृतं मन्मथदहनं साक्षात् पार्वत्या दृष्टम् । पार्वती चिन्तयति यत् शिवं वरयितुं मम रूपलावण्यं सहाय्यं न करोति इति । तपोमार्गेण सा शिवं प्राप्तुं निश्चितवति । सा तस्याः गृहं सर्वं त्यक्त्वा श्मशानवासीं कथं विवाहं कृतवति इत्येतदेव पञ्चमाध्यायपर्यन्तं वर्णितम् ।

तपसा एव शिवः प्राप्तव्यः न केनापि मार्गान्तरेण इति पार्वती चिन्तयति । तदुक्तं कुमारसम्भवे -

इयेषा सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथामन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः॥इति ।
(कु.सं २)

तपः आचरन्ती पार्वती समाधिं गत्वा तस्याः रूपस्य सफल-तायै एतादृशं महत्क्लिष्टं निर्णयं स्वीकृतवती । किमर्थम् इत्युक्ते अन्येन उपायेन शिवस्य उत्कृष्टप्रेमः दुर्लभः ।



तथैव शिवसदृशः मृत्युञ्जयः न प्राप्नोति । एवं शिवमेव वोढुं निश्चयं कृतवती । स्वयं तपः करणे तस्याः मातुःविरोधं दुर्लक्ष्य तपसे पर्वतं गतवति ।माता आचरणस्य अनिवार्यतां निवारयन्ती वदति -

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४॥

पार्वत्याः माता वदति पुत्री ! भवत्याः मनोभिलाषं पूर्णं सफलं कर्तुं गृहे एव सन्ति देवताः। भवती तं आराधनं करोतु । तपः आचरणं कष्टसाध्यम् । त्वं सुकोमला अस्ति । अतः त्वं तपाचरणं न कुरु इति आह ।

इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ॥५॥

इति कालिदासः अवदत् । पार्वत्याः मनः परिवर्तनं कर्तुं माता मेना अपि न शक्तवती । तस्याः मनोभिष्टानि वस्तूनी प्राप्तुं तस्याः दृढसङ्कल्पेन शिवं प्राप्नोति इति निश्चयस्य परिवर्तनं कर्तुं केन साध्यम्? । पार्वत्याः तपः -

पार्वती पितुः हिमवतः सम्मतिं स्वीकृत्य हिमालय शिखरं प्रति गतवती । सन्तोषेण मयूरादि पक्षिसन्कुलाः यत्र सन्ति तदेव हिमालय शिखरः। तत्र सा गत्वा तपः करोति। तदेव गौरिशिखरं इति प्रसिद्धः अभवत् । सा तावत् प्रीत्या भक्त्या च तपं कृतवती ।

दृढनिर्धारं कृतवती पार्वती व्रतपरिपालनार्थं तस्याः आभरणं सर्वं निष्कासितवति। प्रकृतिमध्ये किं लभ्यते तदेव आभरणम् इति मत्वा तपाचरणं करोति ।अत्र ज्ञायते तपः कर्तुं तस्याः मनः कीयती सिद्दा स्यात् इति । तस्याः अग्ङुल्यः तृणं निष्कास्य रूढः अभवत् । तथापि तस्य मनसि एकः एव सक्ङल्पः यत् मया शिवः वरणीयः इति ।

अपेक्ष्यते साधुजनेन वैदिकी स्मशानशूलस्य न यूपसत्क्रिया ॥७३॥

शिवस्य ध्यानं कृत्वा तं प्राप्नोमि इति भवत्याः महतीं आशां त्यजतु । अशुभैः गुणैः युक्तः शिवः कुत्र ? सर्वैः उत्तमैः गुणालङ्कृता भवति कुत्र ? एवं शिवः पार्वत्याः पुरतः शिवं तर्जयति निन्दति च । तस्याः मनसी या भावना आसीत् सा भावना सर्वं गच्छेत् तथा निन्दयति सः । अतः पार्वत्यै महान् कोपः आगतः। प्रकटयति च शिवस्य उपरि दुर्विचारं यदा वदति तदा अनुक्षणं पार्वत्याः अधरः अकम्पयत्। कुपिता पार्वति ब्रह्मचारीं रक्तनेत्रेण अपश्यत् । तथापि सावधानेन तं वदति- भवान् शङ्करं सम्यक् न अवगतवान्। अतः मम समीपे एतादृशः सम्भाषयन् आसीत् ।

अकिञ्चनः सन्न प्रभवः स सम्पदां त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपो शिव इत्युदीर्यते न सन्ति यथार्थविदः पिनाकिनः ॥७७॥

शङ्करः दरिद्रः चेतपि सकलार्थानां जन्मदातारः । स्मशानवासी चेदपि त्रिलोकपतिः। भयङ्करस्वरूपी । तथापि तस्य सत्यस्वरूपं ज्ञातः कोपि नास्ति । तस्य शरीर स्पर्शेण चिता भस्मः अपि पवित्रतां प्राप्नोति । एवं बहु विधेन तस्याः क्रोधं प्रकटयत । शिवे अनुरक्ता एषा न भीता ।

**शिवस्य नैज दर्शनम्** :

पार्वती शिवस्योपरि एतादृशं क्रोधं प्रकटयित्वा एतस्य विषये अन्यदेकं वाक्यम् अपि न उक्तवती । यदि वाक्यम् आगच्छति तर्हि मया एव गम्यते इति वदति । तदा तस्याः आच्छादितं वस्त्रम् अधः पतितम् ।

तदा शिवः **स्वरूपं दर्शयत् ।** शङ्करं द्रष्ट्वा पार्वत्याः शरीरं अकम्पयत् । तदा सा लज्जया ततः गन्तुम् उद्युक्ता । परन्तु तया गन्तुम्, न स्थातुम् अपि अशक्ता । तस्याः स्थितिः तादृशी आसीत् ।

अये सुन्दराङ्गी ! अद्यारभ्य अहं तपस्विनिना क्रीतः एकः दासः इत्यादि । तदा तस्य मुखात् एतादृशानि वचनानि श्रुत्वा एतावत् पर्यन्तं यानि कष्टानि



केवलं कन्दुकेन क्रीडति चेत् श्रान्ता भवति स्म । परन्तु इदानीम् कठोरतपाचरणं करोति इत्युक्ते तस्याः शरीरं स्वर्णकमलमिव अभवत् इति कवेः कल्पना । तस्याः शरीरं कोमलं अस्ति चेदपि तप करणार्थं कियत् वा कष्टं भवति चेदपि सा सोढुं शक्तवती । समये कोमलतया, कठोरतया अपि जीवनं करणीयम् इत्यपि सूचयति ।

शुचो चतुर्णां ज्वलतां हविर्भुजां सुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ॥२०॥

ग्रीष्मकाले सर्वत्र प्रज्वाल्यमानम् अग्निरिव आतपे नेत्रं उन्मील्य तदेकचित्तेन सूर्यं पश्यन्ती उपविशति। तस्याः सङ्कल्पः कथं स्यात् ?

अयाचितोपस्थितमम्बुकेवलं रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः॥२२॥

केन साधनेन वृक्षाः जीवन्ति तथा निर्वहणं भवति तथैव पार्वति अपि जीवनार्थं वृष्टिः जलं, चन्द्रस्य किरणाः च तस्याः भोजनम् आसीत् । अन्यत् किमपि न स्वीकरोतिस्म ।

शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवात वृष्टिषु ।
व्यलोक यन्नुन्मिषितैस्तडिन्मयैर्महातपः साक्ष्य इव स्थिताः क्षपाः॥२५॥

महती वृष्टिः, वायुः वाति चेदपि गृहं न गतवती । केवलं अरण्यवासं करोति स्म । शिलातले निद्रां अकरोत् ।

मुखेन सा पद्मसुगन्दिना निशि प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां सरोजसन्धानमिवाकरोदपाम् ॥२७॥

तस्याः मुखं पद्मपुष्पमिव आसीत् कान्त्या । निशि प्रवेपमानाधराः कमलपुष्पस्य पत्रमिव शोभते । तुषारपातेन क्षताः कमलपत्राणि यथा भासन्ते तथा तपकरणानन्तरं तस्याः मुखं भाति स्म ।

स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्टा तपस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः ॥२८॥

वृक्षैः स्वयं पतितं पर्ण खादित्वा जीवनयापनम् तपसः अन्तिमघट्टः । परन्तु पार्वती पर्णखादनमपि त्यक्तवति। अतः ज्ञानिनः पार्वतीम् “अपर्णा” इति आहूतवन्तः ।

मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गग्लपयन्त्यहर्निषम् ।
तपः शरिरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ॥२९॥

एवं व्रताचरणमुखेन सुकोमला इव तस्याः शरीरं रात्रिंदिव स्वयं दण्डयित्वा कठोरतपाचरणेन तपस्विनां तपः अपि पार्वती पराजयं कृतवति । अनेन स्त्रीणां तपकरणसामर्थ्यमपि निवेदितो भवति । वटुरूपी शिवः पार्वत्याः तपाचरणस्य कारणं पृच्छति-

तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्यदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः॥३०॥

शिवः वटुरूपं धृत्वा पार्वत्याः तपोवनं आगत्य दर्शनभाग्यं दत्तवान् । तं ब्रह्मचारिं हृदयपूर्वकं स्वागतं कृतवती पार्वती । समानवयस्काः चेदपि अतिथिसत्कारंकरणं योग्यम् । अतः “अतिथिदेवो भव” इति वाक्यं पार्वत्या कृते युज्यते ।

एवं सति पार्वतीशिवयोः मध्ये सम्भाषणं प्रचलति ।

“त्वं अत्यन्तगौरवेण अतिथिसत्कारं कृतवती ।अतः माम् अन्यः इति न चिन्तयतु” इति वदति शिवः। अहं केचन प्रश्नान् पृच्छामि । यदि शक्यते चेत् उत्तरं दीयताम् । भवत्याः कृते सर्वाणि सुखानि सन्ति चेदपि भवति किं फलमुद्दिश्य एतादृशतपकरणे उद्युक्ता । यौवनावस्थायां आभरणं सर्वं त्यक्त्वा काषायवस्त्रं धृत्वा एतावत् कष्ठं अनुभवन्ति अस्ति । अनुरूपपत्युः अन्वेषणं भवति करोति चेत् व्यर्थः प्रयत्नः इत्यवदत् ।



यतो हि रत्नानि अन्विष्यन्ते न तु स्वयं रत्नं न अन्विष्यति । एवं बहुविधप्रश्नेन गिरिजा लज्जया उत्तरं दातुं अशक्ता अभवत् । पार्वत्याः मनसि किं अस्ति ? इति ज्ञातवती सखी पार्वत्याः तपश्चरणस्य कारणं सर्वं ब्रह्मचारिं उक्तवती। तदा ब्रह्मचारी किमपि सन्तोषं न अभिव्यक्ता तां पार्वतीं भवत्याः सख्याः वचनं सत्यं वा किं हास्यार्थं वा इति अपृच्छत् ।तदा सा मन्दस्वरेण लज्जया एकैकं वाक्यं वक्तुं आरब्धवति ।

अथाह वार्णि विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृतिं न च कर्तुमुत्सहे॥६५॥

सः शङ्करः भवत्याः आशां न पूरयति । तथापि भवति तं प्राप्तुं एवं कष्टेन तपः करोति । भवत्याः कठोरतां पश्यामः भवत्याः अभिलाषं पूर्णं कर्तुम् एतादृशतपं करणं व्यर्थम् इति भाति ।

अवस्तुनिर्बन्धपरे ! कथं नु ते कारोऽयमामुक्तविवाहकौतुकः।
करणं शम्भोर्वलयीकृताहिना सहिव्यते तत्प्रथमालम्बनम्॥६६॥

लघु विषयस्य कृते भवत्याः कठोरता । भवती आभरणेन अलङ्कृता भवति परन्तु महदेवस्य हस्ते कङ्गणस्य अपेक्षया सर्पः भवति । तं भवति विवादं भवति वा?

वपुर्विरुपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि ! मृग्यते तदस्ति कि व्यस्तमपि त्रिलोचने ॥७२॥

महादेवः त्रिनेत्रधारि । तस्य कृते बान्धवाः न सन्ति ।धनकनकं नास्ति । वस्त्रस्य अभावतः विना वस्त्रेण अटति । विवाहं करणीयं चेत् रुप, गुण, धनं च पश्यन्ति । एतादृशं किमपि एकं तस्य समीपे अस्ति वा इत्यवदत् ।

शिवस्य निन्दाः-

निवर्तयास्मादसदीप्सितात्मनः क्व तद्विधसत्वं क्व च पुण्यलक्षणा ।

अत्र उपलब्धम् । आनन्दकन्दचम्पूव्याख्यानस्य गूडार्थदीपिकाटीका इति व्याख्यानम् अष्ट उल्लासाः वर्तन्ते । अयं चम्पूकाव्यम् प्रथमोल्लासतः अष्टमोल्लासपर्यन्तं अस्ति । रामायण महाभारतमधिकृत्य गद्यपद्यमिश्रितं आनन्दकन्दचम्पूकाव्यम् इति प्रख्यातं वर्तते । अस्याः मातृकायाः छाया (स्वरूपं) एवं वर्तते ।



अस्याः मातृकायाः प्रारम्भिकभागे-

(१) श्रीमद्रामपदाब्जा



(२) अस्याः मातृकायाः चरमभागे- (विवरणं अग्रिमपृष्ठे उल्लिखितम्)

---

१. अस्याः मातृकायाः हस्तप्रतिः देवनागरीलिप्यां वर्तते । इयं हस्तप्रतिः श्रीमन्मित्र-मिश्रविरचितायाः आनन्दकन्दचम्पूव्याख्यायाः गूडार्थदीपिकाटीकायाः प्रथमोल्लासे अस्ति ।



अनुभूतानि तया तत् सर्वं विस्मृतम् । फलप्राप्त्यानन्तरं कष्टं सर्वं विस्मरणं भवति । नवनीतम् इव मृदु भविष्यति । एवं पार्वत्याः त्यागाय सुखं प्राप्तम् ।

अद्य प्रभुत्यवनताङ्गि ! तवास्मि दासः ।
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ॥
अह्नाय सा नियमजं क्लममुससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥८६॥

लोककल्याणार्थं शिव पार्वत्याः विवाहः अभवत् ।नो चेत् विश्वमेव तारकासुराय गच्छतिस्म । घोरतपः कृत्वा स्वयमेव पतितं पर्णम् अपि न खादित्वा अपर्णा इति अभवत् । इन्द्रः पार्वत्याः समीपं गत्वा कुमारं तारकासुरस्य संहाराय प्रेषणीयम् इति यदा अभवत् तदा पार्वति शिवं प्रतिरोधं कृतवति । मातृवात्सल्यं विस्मृत्य देवतानां सुमङ्गलं भवितव्यम् इति हर्षेण वीरमातुः इव पुत्रं युद्धाय प्रेषयति ।**एतादृशः** सन्दर्भैः सर्वासु महिलासु दुःखदायक प्रसङ्गः । परन्तु पार्वती बहु सन्तोषेण स्वीकृतवती । अस्मिन् काले नारीणां आदर्शप्रायः अभवत् । पतिव्रता, वीरमाता , त्यागमयी च एषा पार्वती मनुकुलस्य अभिवृध्यर्थं शिवेन सह विवाहिता वीरमाता जगद्रक्षकी च अभवत् ।

## परामृष्टाः ग्रन्थाः


१ . कुमार सम्भव महाकाव्यम् - अनुवाद्:-डा.एस् शिवराजप्पः

२ . शैवपुराण ।

३ . कथाभारत- त,सु.रामराय ।

४ . Hstory of Sanskrit poetics. P.V Kane, motilal banarasidas publication, new delhi, 1961 ।

5. कुमारसम्भवम्–मल्लिनाथस्य स्न्जीविनी व्याख्या सहितः एम्.आर्. काले मुद्रणं मोतिलाल् बनारसिदास् प्रकाशनं, १९६७

६. कुमार सम्भवः कालिदासः, चौखम्बा विद्याभवनं, वाराणसी,
७. Sanskrit poetics, Krishna chaitanya, Bombay, Asia publishing House, 1965

**विदुषी सावित्री पूजारि**
संशोधना सहायकाः
कर्नाटक संस्कृत विश्वविद्यालयः
चामराज पेटे–560018
बेङ्गळूरु, कर्नाटक
चरदूरवाणी–**9972835365**
E-mail : savithripoojari@gmail.com

*********

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

## श्रीमन्मित्रमिश्रविरचितायाः आनन्दकन्दचम्पूकाव्यस्य व्याख्यायाः गूडार्थदीपिकाटीकायाः मातृकापरिचयः

**श्री नारायणस्वामि एम्.एस्. (बेङ्गळूरु)***

### * पीठिका -

अत्र चतुर्थे पादे पञ्चमहाभूतानि पृथिव्यादीनि, सूर्याचन्द्रमसौ, यागदीक्षितो यजमान इत्येताभिरष्टाभिस्तनुभिः प्रसन्नो भगवान् वरिवर्त्ति, सर्वं जगत् पालयतीति वर्णयन् कालिदासः परमशिवस्य अष्टमूर्तिरिति संज्ञाम्अन्वर्थयन्न औपनिषदं प्रमेयं शिक्षयंश्च विशिष्यते। महाकविरयं चतुर्मुखब्रह्माणम् आहोस्विद् विष्णुं शिवं वाऽधिकृत्य यद् यद् आख्याति, तत् सर्वं परब्रह्मवाचकम् एवेत्यवधारयामः। यतोऽयं मूर्तीनां तिसृणाम् अपि ऐक्यम् अभिप्रैति `एकैव मूर्तिर्बिभिदे त्रिधा सा' इति। भगवतः प्रत्यक्षाणां तनूनां प्रदर्शनेन विशिष्य तेजः-पुञ्जयोः सूर्याचन्द्रमसोः संकीर्तनेन चाऽयं कालिदासो भगवच्छरीरभूतं कृत्स्नं जगत् चतेनाऽचेतनात्मकम् इति सिद्धान्तम् उपनिषद्-निष्पन्नम् आपण्डितपामरं प्रत्याययन्न इव विभाति। तेजःपुञ्जौ दिवाकरनिशाकरावपि भगवतो नियमनाऽधीनप्रवृत्तिकौ व्यसनोदयाभ्याम् आकृष्टौ कर्मवश्यावोदितः, अस्तं यात इति वदन् लोको नियम्यते भगवतेति सुस्पष्टं कालिदासः समीरयति शाकुन्तल एवैवम्-

**यात्येकतोऽस्तशिखरं पतिरोषधीनाम्**
**आविष्कृतोऽरुणपुरस्सर एकतोऽर्कः।**
**तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां**
**लोको नियम्यत इवात्मदशान्तरेषु ।। ३** इति।

अत्र `लोको नियम्यते' इति वदतः कालिदासस्याऽयम् आशयः-यल् लोकस्य चेतनाऽचेतनाऽऽत्मकस्य नियन्त्रा धारयित्रा केनचिद् भाव्यं यस्य नियमनेन धारणेन च लोको विना प्रमादं प्रवर्तत इति । सूर्याचन्द्रमसोर् यथाकालम् उदयाऽस्तमययोः प्रदर्शनेन `भीषास्माद्वातः पवते, भीषोदेति सूर्यः, भीषास्मादग्निश्चेन्द्रश्च' इति तैत्तिरीया श्रुतिर् मनसि कालिदासस्य विपरिवर्तत इव ।

एतानि तत्त्वानि यानि प्रकाशितानि तानि बृहदारण्यके श्रुतानां पुनः पुन-

---

३. अभिज्ञानशाकुन्तलम्, ४. १

हितैषित्वं भगवतः प्रसादाय, लोकस्य महते क्षेमाय चाऽवकल्पेतेत्य् एतत् सर्वम् अनुसन्दधानो महाकविर् नान्दीत्रयम् अवतारयति। कविः `यस्मिन्नीश्वर इथि हेतोः अनन्यविषयः सर्वोऽपि शब्दो यथार्थाक्षरः भवति' इति प्रतिपादयन् श्रृङ्खलितं परमं तत्त्वम् आख्याति। भगवतः सर्वव्यापकत्वात् सर्वान्तर्यामित्वाच् च सर्ववस्तुसामानाधिकरण्यं सेत्स्यति। कर्मसु वेदोक्तेष्वनुष्ठितेषु सर्वदेवतावाचकाः शब्दाः परमात्मानं कञ्चुकर्मसु वेदोक्तेष्वनुष्ठितेषु सर्वदेवतावाचकाः शब्दाः परमात्मानं कञ्चुकिनम् अभिदधतः सर्वकर्मसमाराध्यतां सर्वफलप्रदत्वं च तस्यैवाऽवगमयन्ति। इदम् एव तत्त्वं रघुवंशे दशमे सर्गे विस्तरेण विष्णुवर्णने व्याख्यातम्।

यदि सर्व-व्यापकः सर्वान्यर्यामी भगवान् सर्व-शरीरीति तस्याऽऽराधनाय तस्याऽवयवभूतश् चेतनाऽचेतनवर्ग इति सर्वोऽपि लोकोऽनुसंदधीत,तर्हि लोके परस्परद्वेषाऽसूयाद्यरि-षड्वर्गः झटित्यन्तर्दधीत। यदि परस्परहितैषित्वं, परस्परमैत्री, परस्परक्षेमैकपरायणता, मिथः सन्तोषाभिवर्धितसुखविकास इत्यादयोऽभिवर्धेरन्, तर्हि `सर्वं खल्विदं ब्रह्म' इति जोघुष्यमाणः परम-पुरुषः प्रसीदेत्, अपुनर्भवरूपं सर्वं भव्यम् अनुगृह्णीयात् इत्येतत् सर्वं नान्दीत्रयेण संगृह्णानः श्रुतिस्मृतिसूत्राणाम् ऐककण्ठ्यम् आतन्वानः, शिवेतरक्षतये नाटकत्रयं रचयन् कालिदासो लोकक्षेमैकपरायणः परमपुरुषवरणीयता-हेतु-गुण-सनाथो जगतः सत्यताम् अर्थापयन् विजयतेतमाम्।

वस्तुतस्तु पर्यालोच्यमाने कविरयं शैवविशिष्टाद्वैती भवितुम् अर्हति। अस्य मते मूर्तित्रयस्याऽपि परब्रह्म-रूपत्वान् नाऽस्माकं निर्भरता शिवस्य विष्णोर् वा पारम्यप्रकाशने। इदम् एव परमं रहस्य भवितुम् अर्हति, यत् कालिदासप्रतिपादितानि तत्त्वानि विशिष्टाद्वैतस्य प्राचीनतां प्रकाश्य, जगतः सत्यतां चाऽऽविष्कृत्य वेदान्तप्रासादे विराजन्तेतमाम् इति।

**कालिदासो जगत् सर्वं शरीरं ब्रह्मणो वदन् ।**
**प्रस्थानत्रयसारांशं विशिष्टैक्यं न्यरूपयत्।।** इति ।।



**सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।**
**सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्।। ६**
**अभ्यासनिगृहीतेन मनसा हृदयाश्रयम्।**
**ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये।। ७**
**त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम्।**
**गतिस्त्वं वीतरागाणमभूयस्संनिवृत्तये।। ८**
**प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव।**
**आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा।। ९**
**अनवाप्तमवाप्तव्यं न ते किंचनं विद्यते।**
**लोकानुग्रहं एवैकः हेतुस्ते जन्मकर्मणोः।। १०**

एते श्लोकाः गीतासु पुनःपुनरुपदिष्टा उपनिषत्सु मुहुर्मुहुरुद्घोषिता इति सचेतसः प्रामाणिका ऊरीकुर्वीरन्नेव। अत्र कुत्रचिद् अपि माया वाऽविद्या वा ब्रह्मण आच्छादिका, ब्रह्मैव मुच्यते बध्यते चेति च यत् शोश्रूयते ग्रन्थेषु तन् न मात्रयाप्यत्र निरदेशीति विदांकुर्वन्तु प्रामाणिकाः विमर्शकाः।

**महिमानं यदुत्कीर्त्य तव संह्रियते वचः।**
**श्रमेण तदशक्त्या वा न गुणानामियत्तया।। ११**

इत्ययं श्लोकोऽपरिमितोदारगुणसागरं ब्रह्मेति सूचयन् `प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' इति सगुणत्वं ब्रह्मणो वादरायणोक्तम् आम्रेडयति।

किं चाऽयं कालिदासो विक्रमोर्वशीयनान्द्यां चतुर्षु बादरायणब्रह्मसूत्राऽध्यायेषु प्रतिपादितान् अर्थाश्चतुर्षु पादेष्वसदिग्धं, समासतः प्रमेयजात विवृण्वानो भाष्यकारायते। नान्दी चैवं दृश्यते-

**वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी**
**यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।**

---

६. तत्रैव, १०. २०। ७. तत्रैव, १०. २३। ८. तत्रैव, १०. २७।
९. तत्रैव, १०. २८। १०. तत्रैव, १०. ३१। ११. तत्रैव, १०. ३२।

**अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते**

**स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः।। १२** इति।

अत्र श्लोकस्य प्रथमपादे ब्रह्मसूत्रप्रथमाऽध्यायस्य समन्वयाऽऽख्यस्य निष्कृष्टः समुदितार्थः प्रतिपाद्यते। जगत्कारणं परं ब्रह्म न प्रत्यक्षेण न वाऽनुमित्या ज्ञातुं शक्यते, अपि तु तद् वेदान्तैकसमधिगम्यं भवतीति `वेदातेषु यमाहुर्' ति सिद्धान्तयति। सांख्योक्तप्रधानादिव्यतिरिक्तम् अधिष्ठात्रन्तररहितं सर्वव्यापकं `व्याप्य स्थितं रोदसी' इत्यनेन सार्वज्ञ्यम्-

सत्यसंकल्पत्वादियुक्तं ख्यापयन् कालिदासः, स एव पुरुषो जगतः कारणं भवितुम् अर्हतीति प्रतिपादयति। नान्द्यां द्वितीये पादे पूर्वोक्तस्याऽर्थस्य दुर्धर्षणत्वप्रतिपादनेन सर्ववेदान्ताऽविरोधम् अवगमयति। सर्वनियामके जगत आधारभूते परमपुरुषे सर्वोऽपि शब्द ईश्वर इति हेतोर्यथार्थाऽक्षरोऽनन्य-विषयश्चोपपद्यत इति वदन् कालिदासो वेदान्तव्युत्पित्सूनां बोधकरीं लौकिकपदव्युत्पत्तितो भिन्नां व्युत्पत्तिं शिक्षयतीत्यवधार्यते। श्रुतवेदान्तैः पुरुषैः प्रतिपन्ना शब्दव्युत्पत्तिरन्यादृशीति सुस्पष्टं बोधयति। सर्वोऽपि शब्दो लौकिको वैदिको वा परमात्मपर्यन्तं स्वार्थं बोधयति यतः स शब्दो ब्रह्मणि यथार्थाऽक्षरो भवति। यथार्थान्य अक्षराणि शब्दस्य यस्य स शब्दः मुख्यतया परमात्मानं लक्षयतीति कालिदासः कण्ठरवेण सर्वस्याऽपि शब्दस्याऽपर्यवसानवृत्तिं द्रढयति। लौकिकास्तु पुरुषाः शब्दं व्याहरन्तः शब्द-वाच्ये प्रधानांऽशस्यैव परमात्मनः प्रत्यक्षाद्यपरिच्छेद्यत्वाद् वाच्यैकदेशभूते वाच्यसमाप्तिं मन्यन्ते, वेदान्तश्रवणेनैव व्युत्पत्तिः पूर्यत इति ।

विशेषतोऽर्थसंततिं स्फोरयति। `सर्वे वेदा यत्पदमामनन्ति, सर्वे वेदा यत्रैकं भवन्ति, वेदैश्च सर्वैरहमेव वेद्यः' इति श्रुत्यादिसिद्धं प्रमेयं `ईश्वरत्वादेवानन्यविषयः सर्वोऽपि शब्दो यथार्थाक्षरः' इत्यादे रहस्यं समासतः प्रकाशयति कालिदासः।

तृतीये पादे ब्रह्मसूत्रसाधनाऽध्यायस्य तृतीयस्य ब्रह्माधिगमोपाय-

-------------------------------------

१२. विक्रमोर्वशीयम्, १. १



परस्याऽर्थं संगृह्णानः, दहरविद्यां प्रत्यभिज्ञापयति। दहरविद्या हि एवं श्रूयते-`अथ यदिदं दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन्नन्तर आकाशः, तस्मिन् यदन्तः, तदन्वेष्टव्यम्, तद्वाव विजिज्ञासितव्यम्' इति। `मुमुक्षुभिः अन्तः यो मृग्यते' इति पदसमभिव्याहारेम दहरविद्या प्रत्यभिज्ञाप्यते। स्थिरभक्तियोगसुलभ इति प्रतिपादयन् कालिदासः प्रीतिरूपाऽऽपन्नतैलधारावद् अविच्छिन्नस्मृतिसन्ततिं भगवत्स्वरूपरूपगुणविभावादिविषयिणा भक्तियोगपदेन समाख्याति।

चतुर्थे पादे पुनरन्ते `निःश्रेयसायास्त वः' इति खण्डेन ब्रह्मसूत्र-चतुर्थाऽध्यायस्याऽर्थं संगृह्णाति। निश्चितं श्रेयो हि निःश्रेयसम्। `यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' इथि भगवन्तं कृष्णं प्रति यत् प्रार्थितं पार्थेन निश्चितं श्रेयः तत् स्मारयन्न् इव दृश्यते कालिदासः। निःश्रेयसं पुनः किंरूपम् इति प्रश्नं समादधान इव कालिदासः शाकुन्तले भरतवाक्ये `पुनर्भवं क्षपयतु नीललोहितः' इति वचनेन पुनर्भवक्षपणरूपं भवतीति कण्ठ-रवेण प्रतिपादयति। `अनावृत्तिः शब्दादनावृत्तिः शब्दाद्' इति ब्रह्मसूत्रान्तिमाऽध्यायान्तिमसूत्राऽर्थम् अपुनर्भवरूपं निःश्रेयसाऽपरपर्यायम् अभिधते निःश्रेयसायास्तु वः' इति।

एवं नान्दीत्रयेण कालिदास औपनिषदं प्रमेय-जातं सर्वं संगृह्णानः परस्परविरुद्धवद्भासमानानां विशकलितानाम् उषनिषद्-वाक्यानाम् ऐककण्ठ्यं प्रतिपादयतां बोधायनादिपरिमर्षीणां सूक्तीः संचिन्वानः, भगवतः शरीरभूतं कृत्स्नं जगद् इति तस्य भर्ता सर्वशरीरी सर्वशब्दवाच्य इति, तस्याऽऽराधनायैव चेतनाऽचेतनाऽऽत्मकं जगत् तेनैव धृतं नियम्यमानं च समस्तीति विशदयति।

तस्य भगवतः शरीरभूतत्वाद् विश्वस्याऽपि पदार्थजातस्य चेतन जातस्याऽचेतनवर्गस्य वा न किंचिद् अपि केनाऽपि द्वेष्यं भवितुम् अर्हतीति, सर्वस्य भगवतः शरीरत्वाद् अनुकूलत्वेन वेदनीयम् इति च ज्ञापयति। यदि कश्चित् कंचिद् द्वेष्टि, पराबुभूषति, प्रजिहीर्षति वा, तर्हि सर्वशरीरी भगवान् द्विष्टं पराभूतं प्रहृतम् आत्मानं मन्येत। क्रुद्धे भगवति आसुरीषु योनिषु क्लिष्टतरं जन्म भविता। कुसुममाला कण्ठे कञ्चुकस्योपरि वा समर्पिता यथा चेतनं कञ्चुकधारिणं प्रीणयति, तथा चेतनवर्गस्य भगवतः शरीरभूतस्य विषये प्रवर्तिता द्वेषाऽसूयादयः परस्पर-

पद्मनन्द्याचार्यः तस्य पञ्चविंशति ग्रन्थे एवमलिखत्–

आत्मैकः सोपयोगो मम किमपि ततो नान्यदस्तीति चिन्ता–

भ्यासास्ताशेषवस्तोः स्थितपरममुदायद्गतिर्नोविकल्पे ।

ग्रामे वाकाननेवाजनजनितसुखे निःसुखे वा प्रदेशे

साक्षादाराधना सा श्रुतविशदमतेर्बाह्यमन्यत्समस्तम् ॥

यः साधुः आगमाभ्यासेन निर्मलः सन् मोहं जित्वा सर्वेषु विषयेषु सर्वेषु क्षेत्रेषु च बाह्याभ्यन्तरे समानः भवति सा एव ‘आराधना’ इति कथ्यते इति **पद्मनन्द्याचार्यः** अकथयत् । अत्र आराधना शब्दः जैनपारिभाषिकशब्दः इति वक्तुं शक्यते । अभिधानचिन्तामणौ आराधनाशब्दस्य ‘शुश्रूषाऽऽराधनोपास्ति वस्यापरिष्टयः’ इति कथयित्वा शुश्रूषा, आराधना, उपासना, वरिवस्या, पर्येषणा एते उपचारस्य पर्यायवाचिनः शब्दाः इति सूचितम् । अमरकोशे ‘आराधनं साधनेस्यादवाप्तौ तोषणेऽपि च’ इति उक्तम् । अत्र आराधना इत्युक्ते साधना, आत्मतुष्टीकरणं, पूजा इति ।

**आराधनायाः विधाः-**

षोडशशतमानस्य भट्टारकमल्लिभूषणस्वामिनां शिष्यः स्वर्गीय ब्रह्मचारी श्रीनेमिदत्तेन विरचित आराधनाकथाकोशे आराधनाशब्दस्य विवरणमित्थं प्रतिपादितम्–

सम्यग्दर्शनबोधवृत्ततपसां संसारविच्छेदिनां

शक्त्याभक्तिभरेणसद्गुरुमतात्स्वर्गापवर्गश्रिये ।

उद्योतद्यमनेतथाचनितरांनिर्वाहणंसाधनं ।

पूतैर्निस्तरणंमहामुनिवरैरागाधनेतीरिता ॥ ९ ॥

सम्यग्दर्शनज्ञानचारित्रतपाः संसारविच्छेदनार्थं / नाशनार्थं कारणीभूताः ।

---

४. मूलाराधना, श्लोक-३०४, ३०५

संसिद्धिराधसिद्धंसाधियमाराधियचएयट्ठं । अवगयराधोजोखलुचेयासोहोइअवराधो ॥ ३०४ ॥

जोपुणणिरवराधोचेयाणिस्संकिओउसोहोइ । अवराहणाएणिच्चंवट्टेइअहतिआणंतो ॥३०५ ॥



## सहायकग्रन्थसूची


1. **अभिज्ञानशाकुन्तलम्**–
   अष्टभाषावर्ति–श्रीनिवासाचार्यप्रणीतया शाकुन्तलव्याख्यया राघवभट्ट-कृतार्थद्योतनिकयाटीकया च समलंकृतम्, गणेश काशिनाथ काळे, कल्याण–मुंबई, शकाब्दाः १८३८, संवत् १९७३.
2. **अलंब्रह्म**, प्रो. रेवाप्रसाद द्विवेदी,
   Kalidasa Samsthanam, Varanasi, 2005
3. **कालिदासग्रन्थावली**,
   Prof. Revaprasad Dwivedi, Dr. Mithilaprasad Tripati, Kalidasa Sanskrit Akademi, Ujjain, 2008
4. **कालिदाससर्वस्वम्**–
   The Complete Works of Kaidasa, N.P. Unni, New Bharatiya Book Corporation, Delhi, 2009, 81-8315-106-X/ 978-81-8315-106-1
5. **रघुवंशमहाकाव्यम्**– मल्लिनाथकृतसंजीविन्याटीकयोपेतम्–
   Sri kanakalalsharma, BabuPrahaldas Book Selller, Benares, 1982
6. **साहित्यसुधालहरी**; नरसींहाचार्यः; कल्पवलिगुड्डु; 1979.
7. **संस्कृतसाहित्यानुशीलनम्**; नरेश बत्रा;
   Abhishek Prakashan,Delhi; 2009.
8. **संस्कृतसाहित्यशास्त्रेगुणविवेचनम्**; विश्वमूर्त्ति शास्त्री,
   VishwamurthyShastri, Jammu, 2003.

9. **MÂLAVIKÂGNIMITRA,**
SHANKAR P. PANDIT, Bombay: GOVERNMENT CENTRAL BOOK DEPOT, 1869

**SHIVAPPA H.**
Research Scholar
Karnataka Samskrita University
Bengaluru-560018
Karnataka
Mobil : **9900692308**
E-mail **: shivu.arka@gmail.com**

(**शिवप्प एच्.** महाभागः बेङ्गळूरु महानगरे विराजमानस्य कर्नाटक संस्कृत विश्वविद्यालयस्य एसोसियेट् प्रोफेसर **डा. शरच्चन्द्रस्वामि** महोदयानां मार्गदर्शनेन **"रघुवंशमहाकाव्यस्य सुगमान्वयप्रबोधिकाटीकायाः प्रथमसर्गात् नवमसर्गपर्यन्तं सम्पादनम् अध्ययनञ्च"** इत्यस्मिन् विषये कर्नाटक संस्कृत विश्वविद्यालये संशोधनकर्मणि रतः ।)

*****

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# जैनाराधनामण्डलानामेकमध्ययनम्

**विदुषी तेजस्विनी डि. (मैसूरु)***

यः कर्मरूपिशत्रून् १ जितवान् तं जैनधर्मे 'अरिहन्ता' २ इति सम्बोध्य तस्योपदेशेनैव विश्वं तथैव मोक्षमार्गमवगम्य तस्यानुयायिनः तमेवाराधितवन्तः । 'तत्त्वार्थसूत्रम्' इति ग्रन्थे आचार्य उमास्वामी एवमवदत्–

मोक्षमार्गस्यनेतारं, भेतारंकर्मभूभृतां ।
ज्ञातारंविश्वतत्त्वानांवन्देतद्गुणलब्धये" ॥

जितस्य / जिनस्य अनुयायिनः जैनाः अभवन् । जैनधर्मे गुणानामाराधना भवति न तु व्यक्तेः । अरिहन्तारम् उपदेशानुसारेण सर्वजीविषु आत्मा वर्तते । यदा स आत्मा परमात्मस्वरूपं प्राप्नोति तदा चतुर्गतिरिति ३ विद्यमानजीवनचक्रात् बहिरागच्छति स एव मोक्षः इति ।

शिवकोट्याचार्यः 'मूलाराधना' इति ग्रन्थे आराधनाविषये एवमुल्लिखति- 'व्यवहारदृष्ट्या सम्यग्दर्शनज्ञानचारित्राणि नाम रत्नत्रयाणि आराध्यवस्तूनि परं शुद्धनिश्चयदृष्ट्या परमात्मा एव आराध्यवस्तु । आत्माराधनायाः प्रवृत्तिः अथवा क्रिया आराधनमिति कथ्यते' इति । अपि च कथितं–संसिद्धि, राध, सिद्ध, साधित, आराधित एते पर्यायवाचीशब्दाः । आत्मा यः राधरहितभवति सः अपराधी तथैव चैतन्ययुतआत्मा अपराधीन भवति । सः तु शङ्कारहितो भूत्वा स्वात्मानम् अवगम्य आराधनायां सर्वदा निरतः भवति इति शिवकोटिआचार्यः स्वस्य ग्रन्थे सूचितवन्तः ।

---

१. ज्ञानावरणीय, दर्शनावरणीय, वेदनीय, मोहनीय, आयु, नाम, गोत्र, अन्तरायमिति अष्टकर्माणि ।
२. अरि = शत्रु + हन्ता = नाशितवान् ।
३. देव, मनुष्य, तिर्यञ्च, नरक इति चत्वारः गतयः ।

जैनधर्मानुसारेण मण्डलमिति शब्दः नानार्थं सूचयति । 'सूर्यप्रज्ञप्ति' इत्यस्मिन् ग्रन्थे चतुर्विंशतितमतीर्थङ्कर महावीरस्वामि-गौतमस्वामिनोः संवादः वर्तते । तत्र गौतमस्वामी महावीरस्वामिनं मण्डलशब्दस्य विषये पप्रच्छ । तदा महावीरः नानार्थप्रतिपादकः मण्डलशब्दः इति कथयन् एषः शब्दः रूढ्यर्थवाचकोऽपि इति अकथयत् । सूर्यप्रज्ञप्तिग्रन्थानुसारेण जम्बूद्वीपे सूर्यौस्व १८४ मण्डलेषु भ्रमणं कुरुतः । सूर्यः दक्षिणात् पूर्वं प्रति बाह्य मण्डलैः आभ्यन्तरमण्डलानां प्रत्यागच्छति इति निर्दिष्टम् । अत्र मण्डल शब्दस्य वृत्ताकारयुतमेकं स्थलमिति वक्तुं शक्यते । सूर्यमण्डलस्य ज्ञानं ज्योतिषशास्त्रमपि द्योतयति । अस्मिन् शास्त्रे सूर्यगतिं एकम् अहोरात्रि इति परिगणितम् । अत्र विद्यमानाक्षरेषु अ त्रि इत्यक्षरौ निष्कासितौ चेत् होरा इति अक्षरद्वयमवशिष्यते । ज्योतिषशास्त्रं होराशास्त्रमित्यपि प्रसिद्धम् ।

मण्डलशब्देन सार्धं यदा आराधनाशब्दं योजयामश्चेत् अयं शब्दः विशेषतया मोक्षमार्गं सूचयति । साधकः गुरुभिः उपदिष्टं मोक्षमार्गमवगम्य स्वस्य कर्मनिर्जरार्थं मन्डलाराधनां करोति । सिद्धचक्राराधना, भक्तामरआराधना, श्रुतनोम्पि आराधना इत्यादि नानाविधमण्डलाराधनानि जैनधर्मे कथितानि । तीर्थङ्करस्य उपदेशश्रवणार्थं यदा देवैः समवसरणस्य ८ रचना कृता तदा देवेन्द्रः शचीदेव्या सह तत्रागत्य समवसरणस्य मध्यभागे विद्यमानं तीर्थङ्करं पूजादिविशेषैः नमस्करोति । शचीदेवी रत्नैः तत्र विद्यमानं रङ्गवल्लीं विस्तारयति इति जिनसेनाचार्यकृतमहापुराणे उल्लिखितम् । साधकोपि समवसरणस्य तादृशीमेव कल्पनां मनसि निधाय मण्डलं विरच्य तस्मिन् तीर्थङ्करस्य प्रतिष्ठापनां कृत्वा तं तस्य गुणान् च आराधयन् मोक्षमार्गे गन्तुं प्रयतते ।

अत्र आराधनामण्डलमिति चेत् बाह्यात् आभ्यन्तर स्थितमात्मानं प्रतिसाधकं नेतुम् एकं साधनमिति वक्तुं शक्यते । इदं स्पष्टीकर्तुं नैके आचार्याः अनेकान् प्रतिष्ठाग्रन्थान् अरचयन् । तथैव ईदृशैः आराधनैः कर्मनिर्जरां कृतवतां श्रावक–श्राविकानां प्रसिद्धकथाः आराधनाकथाकोश, नोम्पियकथेगळु इत्यादि ग्रन्थेषु सङ्गृहीतः । तीर्थङ्करैः उपदिष्टमुपदेशं श्रुतमित्युच्यते । इमान् उदेशान् गणधराः चतुर्दशपूर्वरूपेण अन्येभ्यः उपदिष्टवन्तः ।

---

८. समेत्यावसारोप्रेक्षास्तिष्ठन्त्यस्मिन् सुरासुराः......... ॥ महापुराण, आश्वासः, ३३-७३



अतः स्वर्गमोक्षादीनां सुखं प्राप्तुं भक्त्या शक्त्यानुसारेण उद्योत–उद्यमन–निर्वाहण–साधन– निरस्तरणकरणमेव आराधना इति आचार्यः अवदत् । अत्र उद्योत इति चेत् – सम्यग्दर्शनज्ञानचारित्रतपसा लोके प्रकाशनमेव उद्योतः । आलस्यं विना स्वीकृतपसां बाह्याभ्यन्तरेण पालनार्थं प्रयत्नः करणम् उद्यमनम् । स्वीकृतसम्यग्दर्शनादि व्रतपालनसमये सङ्कष्टाः आवृतापि अपरित्यज्य पालनं निर्वाहणं भवति । रागेण विना तत्त्वार्थादि शास्त्रग्रन्थान् समग्रमध्ययनं साधनम् । स्वीकृतं चारित्रम् आजीवनं निर्विघ्नतया पालनं निस्तरणम् । एवं प्रकारेण पूर्वाचार्याः आराधनायाः पञ्च प्रकारान् अवोचयन् ५ ।

**मण्डलानां रचनायाः विधाः (चूर्ण–धान्य–वस्त्रविशेषैः)**

जैनाराधना विधानसङ्ग्रहे मण्डलम् यन्त्र नाम्ना अपि सम्बोधितम्६ । यन्त्रं तु चूर्णयन्त्रं, गन्धयन्त्रं, लोहयन्त्रं, चन्द्रोपकयन्त्रमिति चतुर्विधम् ।

**चूर्णयन्त्रम्**

भूमिं स्वच्छं कृत्वा पीठे तण्डुलचूर्ण, हरिद्रा, कुङ्कुममित्यादिभिः यन्त्ररचनकरणं चूर्णयन्त्रमिति कथ्यते । बहुषु स्थलेषु तण्डुलचूर्णेभ्यः हरिद्रा, हरित्, रक्तवर्णं, कृष्णवर्णमित्यादि मेलयित्वा तेन यन्त्ररचनां कुर्वन्ति । श्वेत, पीत, हरित्, रक्त, कृष्णवर्णान्नेव यन्त्ररचनार्थमुपयोक्तव्यम् । यन्त्रं तु चतुरस्रं भवितव्यम् । अत्र विषम सङ्ख्यया विशालत्वं भवितव्यं न तु समसङ्ख्यया ।

आराधना क्रमात् वृत्ताकारेण कमलदलं विरच्य तस्य चतुर्षु दिक्षु द्वारं रचयित्वा स्वस्तिकां लिखन्ति । नन्तरं पञ्चकर्णिकाः रचयित्वा तेषु श्वेत, पीत, हरित्, रक्त, कृष्णवर्णाः पूरयन्ति । तदनन्तरं पृथ्वीमण्डलस्य रेखां रचयन्ति । चतुर्षु कोनेषु ४-४ भाण्डाः उपरि-उपरि स्थापयन्ति ।

---

५. आराधनाकथाकोशः, रचयिता स्व. ब्रह्मचारी श्रीनेमिदत्तः, सं. स्व. श्री उदयलालकाशलीवाल, प्र. ब्र. मदीबाई, दिगम्बर जैनसमाज, नागौर, राजस्थान, १९७२

६. जैन आराधना विधान सङ्ग्रहः, परिशिष्ट भाग-३

८ कुम्भाः, मङ्गलाष्टकाः, ८ आयुधाः, ८ पताकाः अष्ट दिक्षु स्थापयन्ति । पञ्चवर्णस्य सूत्रेण एतान् त्रिवारं बन्धयन्ति । भाण्डकुम्भयोः अधः तण्डुलान् विस्तार- यन्ति । मण्डल/यन्त्रस्य चतुर्षु कोनेषु चत्वारि स्थम्भान् स्थापयित्वा तस्य पुरतः नारिकेलः, इक्षु, कदली फलानि स्थापयित्वा तस्य शोभां वर्ध - यन्ति । यन्त्रस्य मध्यभागे कलशं संस्थाप्य तस्मिन् गन्धयन्त्रं स्थापयन्ति ।

**गन्धयन्त्रम्-**

समतल स्थालिकायां श्रीगन्धचन्दनञ्च कुङ्कुम, केसरि, कर्पूरमिश्रणैः मिश्रयित्वा लेपनं कुर्वन्ति । लेपः यदा शुष्कत्वं प्राप्नोति तदा शलाकया यन्त्ररचनां कृत्वा दलेषु देवानां नामानि लिखन्ति । मध्ये वृत्तौ क र्तुः नामं नक्षत्रेण सार्धं विलिख्य पञ्चामृत अभिषेकसमये तस्योपरि तीर्थङ्करमूर्ति, श्रुत, गुरुमूर्ति च संस्थाप्य अभिषेकं कुर्वन्ति । तदनन्तरं चूर्णयन्त्रस्य मध्ये कुम्भस्योऽपरि स्थापयित्वा १०८ मन्त्रपुष्पैः क्षेपयन्ति ।

**लोहयन्त्रम्-**

केचन यन्त्रान् देवालये स्थापयन्ति । केचन यन्त्रान् भुजौ, कण्ठे धारयन्ति । तान् यन्त्रान् ताम्र, सुवर्ण, रजतपत्रेषु गन्धयन्त्रमिव देवानां नामानि विलिख्य शुभसमये प्राणप्रतिष्ठां, ४८ दिनानि पञ्चामृत अभिषेकं च कुर्वन्ति । १०८ मन्त्रपुष्पान् संस्थाप्य कलारोपणं कृत्वा चूर्णयन्त्रस्य मध्ये कुम्भस्योपरि स्थापितं गन्धयन्त्रे स्थापयित्वा १०८ आराधनां कुर्वन्ति । तदा तत् यन्त्रं पूर्णशक्तिं परिशुद्धतां च प्राप्नोति ।

**चन्द्रोपकयन्त्रम्-**

श्वेतवस्त्रे गन्ध-चन्दन-हरिद्रां मेलयित्वा यथा चूर्णयन्त्रे लिखितं तथा तथा यन्त्रं लिखन्ति । इदं चूर्णयन्त्रस्योपरि चतुर्षु स्थम्भेषु प्रसार्य सूत्रेण बन्धयन्ति । अस्मात् कारणात् यदि यत्किमपि कीटाः, धूलिः चूर्णयन्त्रस्योपरि पतनावकाशः न भवति । इदं यन्त्रं अन्ययन्त्राणां शुद्धत्वं शुचित्वं च रक्षति । अद्यतन दिनेषु केचन चन्द्रोपकयन्त्रं वस्त्रमध्ये आराधना मण्डलानि विरच्य तस्योपरि एव आराधनां कुर्वन्ति ।



**धान्ययन्त्रम् -**

नैकेषु प्रदेशेषु धान्यैः अपि मण्डलं पूरयित्वा आराधनां कुर्वन्ति । ईदृशी पद्धतिः कर्नाटके तावत् न दृश्यते परन्तु उत्तरप्रदेश, मध्यप्रदेशेषु अस्य प्राशस्त्यमधिकमस्ति ।

**पञ्चचूर्णस्थापनम्**

पञ्चवर्णैः मण्डललेखनसमयेऽपि शुद्धाः भूत्वा भक्त्या मण्डलं रचयन्ति । ॐ श्वेतपीतहरितारुणकृष्णमणिचूर्णं स्थापयामि स्वाहा इति उच्चारयन्तः पञ्चचूर्णानि स्थापनार्थं सिद्धाः भवन्ति । ॐ नागराजाय अमिततेजसे स्वाहा । श्वेतचूर्णस्थापनम् । ॐ हेमप्रभाय धनदाय अमिततेजसे स्वाहा । पीतचूर्णस्थापनम् । एवमेव ॐ हरित्प्रभाय मम शत्रुमथनाय स्वाहा इति उक्त्वा नील अथवा हरिद्वर्णं स्थापनीयम् । ॐ अरुणप्रभाय मम सर्ववशङ्कराय वषट् स्वाहा इति उ च्चारयित्वा रक्तचूर्णं स्थापनीयम् । ॐ कृष्णप्रभाय मम शत्रुवशङ्कराय घे घे स्वाहा इति वदन्तः कृष्णचूर्णस्थापनं करणीयम् । जैनाः २४ तीर्थङ्करान् वर्तमानकाले आराधयन्ति । तेषां वर्णमपि श्वेत, पीत, हरित्, रक्त, कृष्णवर्णैः दर्शयन्ति । आदिनाथ, अजितनाथ, शम्भव, अभिनन्दन पीतवर्णशरीरं प्राप्तवन्तः आसन् । सुमतिनाथः हरित्वर्णे, पद्मप्रभ रक्तवर्णे, सुपार्श्वनाथ पीतवर्णे, चन्द्रप्रभ-पुष्पदन्तौ श्वेतवर्णे, शीतलनाथ-श्रेयांसनाथौ पीतवर्णे, वासुपूज्य रक्तवर्णे, विमल, अनन्त, धर्म, शान्ति, कुन्थु, अर, मल्लि पीतवर्णे, मुनिसुव्रत कृष्णवर्णे, नमिनाथ पीतवर्णे, नेमिनाथ कृष्णवर्णे, पार्श्वनाथ हरितवर्णे, वर्धमानं पीतवर्णे दर्शयन्ति ७ ।

**मण्डलशब्दनिष्पत्तिः, विवरणञ्च-**

आराधनामण्डलानि इत्यस्मिन् शब्दे मण्डलमिति चेत् मडिधातोः कलच् प्रत्यये निष्पन्नः मण्डलमितिशब्दः । अस्य च प्रकारः, वृत्तः, रेखाभिः रचितपदार्थः (सर्वतोभद्र, सूर्यमण्डल, भूमण्डल इत्यादि) इति पद्मनन्दिकोशे कथितम् ।

---

७. नवग्रहशान्ति, जिनेन्द्र आराधना, पृ. -२०९

जैनाराधनामण्डलेषु उपयुक्तानि पञ्चवर्णमयचूर्णानि चतुर्विंशति तीर्थङ्कराणां देहवर्णं प्रतिपादयति । कानिचन ग्रन्थेषु ईदृशानि वर्णमयमण्डलानि रङ्गवल्लि, यन्त्र, मन्डल, **बलि** इत्यादि शब्धैः व्यवहृतम् । क्षेत्रविशेषेण ईदृशानि आराधनामण्डलानि विशेषतया स्वस्य महत्वं स्वयमेव प्रतिपादयति । आत्मानं परमात्मकरणमेव जैनानां सिद्धान्तः । एवं सति पुराणादि ग्रन्थेषु भरतचक्रवर्तिनम् आरभ्य अद्य पर्यन्तं जैनचिह्नानि पुञ्ज–मन्डल–समवसरण इत्यादि रुपेण जनान्आध्यात्मक्षेत्रे आकर्षयदस्ति ।

**आराधना–**

आराधनाशब्दः पूजा इति शब्दस्य व्याप्तौ भवति । जैनग्रन्थेषु आर्याणां षट्कर्माणि कथितानि ।

**'इज्यां वार्तां च दत्तिञ्च स्वाध्यायं संयमं तपः ।**
**श्रुतोपासकसूत्रत्वात्सतेभ्यः समुपादिशत् ॥**

श्रावकाचारसूत्रश्रवणात्तस्मै श्रावकै ईज्या, वार्ता, दत्ति, स्वाध्याय, संयमश्च बोधितम् । धवलाग्रन्थे पूजा शब्दम् एवं विवृतं-"एदाहि सह अ इंदघ्रय-कप्परुक्ख-महामह-सव्वदोभद्दादि महिमाविहाणं पूजा" १५ इति विवृत -मस्ति । अर्हतपरमेश्वरस्य पूजां ईज्या इति कथ्यते । विशुद्धाचरणात् स्थूलरूपि हिंसा न भवेत्यथा तथा कृष्यादिकरणं वार्ता । दया, पात्रा, सम, अन्वयमिति दानकरणस्य चतुर्विधाः । तेभ्यः दत्ति इति कथ्यते । शास्त्रविषये चिन्तनं स्वाध्यायः । उपवासादिनियमेभ्यः तप इति कथ्यते । अहिंसादि व्रताचरणं संयमः ।

इज्यायां पञ्च विधपूजाः कथिताः १६ –

१. देवेन्द्रैः क्रियमाणपूजा' महा– महाइन्द्रध्वज'।

२. महामुकुटबद्धैः राज्ञैः या पूजा क्रियते सा 'सर्वतोभद्रपूजा'

---

१५. धवला-८, ओघानुगम, खण्ड-३, ४२ गाथा, पृ-९२

१६. महापुराण, सर्गः-३८, श्लोकः, २७-३३



चतुर्दशपूर्वेषु विद्यानुवादोपि एकः । अस्मिन् क्षेत्र, श्रेणी, लोकप्रतिष्ठा, संस्थान, समुद्घातान् वर्णितमस्ति । अत्र आराधनाविषयः अपि पाठितः ।

## मण्डलशब्दस्य विवरणम्

देवालयं मानवस्य शरीरेण सार्धं तुलनां कुर्वन्ति । शक्तिः एका व्यूहः इति आमनन्ति । शक्तेः व्यवस्था एव मण्डलम् । मानवस्य शरीरः इतस्ततः चलनशीलमण्डलं चेत् देवालयः एकत्र स्थित अचल मण्डलम् । तन्त्रे मानचदेहस्य मण्डलस्य प्रामुख्यता वर्तते चेत् आगमे दैवीशक्तेः मण्डलस्य प्राधान्यं भवति ९ । योगतत्त्वोपनिषदि मण्डलस्य सङ्केतं पञ्चमहाभूतानां आधारेण विवृणन्ति । तत्र पृथवी तत्त्वस्य आकृतिः चच्चौकमिति, आपस्तत्त्वस्य सङ्केतः अर्धवृत्तं, तेजसः सङ्केतः त्रिकोणः, वायुतत्त्वस्य सङ्केतः षट्कोण, आकाशतत्त्वस्य सङ्केतः वृत्तमिति कथितम् । औन्नत्यविस्तरणं विना एषः सर्वशक्तेः केन्द्रमिति कथितम् । गर्भान्तरे स्थितमर्चामूर्ति बिन्दोः स्थाने वर्तते ।

विश्वकर्ममण्डलस्य विषये महाभारते कथितमस्ति । विश्वकर्मस्य पञ्चपुत्राः । तेषु प्रथमः मनु । एषः मनुष्येषु प्रथमः । मयः द्वितीयः । एषः धर्मराजस्यसभां निर्मितः । एषः जानपदस्य स्थपतिः । तृतीयः त्वष्ट्ट शिल्पिः । लोहकर्मः चतुर्थः । एषः सीवनं, मृत्तिकया पुत्थलिकरणे निपुणः । अन्तिमः अर्क अथवा विश्वज्ञः । एषः सुवर्णरजतकार्ययोः कुशलः । एते मिलित्वा देवालयं निर्मितवन्तः । अतः देवालये ५ देवाः, ५ गुणाः, ५ आकारः भवन्ति । इदं विश्वकर्ममण्डलं ध्योतयति १० ।

प्रा. एस्. के. रामचन्द्राव् मण्डलविषये एवमपि अचिन्तयन् - सूर्यचन्द्रयोः प्रकाशमावृतं वायुः वायुमण्डलम् । इदं विश्वमावृत्य प्रकाशं प्रयच्छति इति कल्पना वर्तते । विश्वस्य समष्टेः सङ्केतः मण्डलम् ।

---

**९. ಭಾರತದ ದೇವಾಲಯ ನೆಲೆ : ಹಿನ್ನೆಲೆ, ಪುಟ ಸಂಖ್ಯೆ–117**

१०. पञ्च आकाराः गुणाश्च-१ त्रिकोण-तामस, २. चच्चौक-ज्ञान, वृत्ता-क्रिया, षट्कोणः-त्रीणि मेलयित्वा, अष्टकोण-शुद्धसत्व. ಭಾರತದ ದೇವಾಲಯ ನೆಲೆ : ಹಿನ್ನೆಲೆ, ಪುಟ ಸಂಖ್ಯೆ–**119**

अतः इदं सामान्यतया वृत्ताकारमेव भवति इति चिन्तयन्ति । वृत्तमित्युक्ते पूर्णम् । इदं सर्वं स्वस्मिन् स्थापयति । प्रायः मण्डलस्य प्रथम आकारः अण्डमिव आसीत् । अतः ब्रह्माण्ड अथवा हिरण्यगर्भः इति साङ्केति कमभूत् । मेरुः वृत्ताकारे अस्ति । तस्य परितः विद्यमानाः चतस्रः दिशाः वृत्तस्य परितः वृत्तमेवकृतचच्चौकः । वास्तु मण्डलय अयमेव आकारः । अस्य ब्रह्मभागः मेरुपर्वतः । देवालयस्य बहिः चौकाकार गर्भगृहमेव मण्डलम् । गर्भगृहस्य उपरि यः विमानः वर्तते सः मेरुपर्वतस्यस्थूलस्वरूपः । विमानस्य रचनायां विश्वकर्ममण्डलस्य नैकाः आकाराः अन्तर्भवन्ति । वास्तुमण्डले वास्तुपुरुषस्य अवयवोपरि विद्यमान देवैः सार्धं एतेषां सादृश्यं सम्बन्धश्च वर्तते ११ । गर्भगृहस्य अन्तः प्रवेशः इति चेत् मण्डलस्य अन्तः प्रवेशः । भक्तस्य देवालस्य अन्तः प्रवेशः इति चेत् लोकधर्मात् शिवधर्मस्य अन्तः प्रवेशः १२ । वैष्णवागमे गर्भगृहः दैवी शक्तिस्वरूपः । सः एव अर्चा । तस्य अन्तः विद्यमानः मूर्तिः अन्तर्यामि । प्रति प्राणिषु विद्यमान दैवसानिध्यं हृदयम् । गर्भगृहस्योपरि विद्यमानः विमानः दैवी शक्तेः विभवस्वरूपं प्रतिपादयति । विमानस्योपरि स्थापित कलशः "व्यूह"स्य अभिव्यक्तिः । कलशस्योपरि स्थापित स्तूपि दैविशक्तेः 'पर' इति प्रकारः इति कथितवन्तः१३ ।

**आराधनायाः महत्वम्**

नैकाः जैनाचार्याः आराधनायाः महत्वं कथयन्तः अपभ्रंश संस्कृत, प्राकृत भाषासु नैकाः ग्रन्थाः रचिताः । श्रीनयनन्दी अभयसूरिः, महेश्वरसूरिः, अमितगति आचार्यः, समयसुन्दराचार्यः, सोमसूरिः 'आराधना' इति, ग्रन्थं रचयित्वा आराधनायाः महत्वं दर्शितवन्तः ।

मल्लिभुषण, श्रुतसागरः, ब्रह्मनेमिदत्तः, प्रभाचन्द्रः, सिंहनन्दी,

---

११. ಭಾರತದ ದೇವಾಲಯ ನೆಲೆ : ಹಿನ್ನೆಲೆ, ಪುಟ ಸಂಖ್ಯೆ-126

१२. ಭಾರತದ ದೇವಾಲಯ ನೆಲೆ : ಹಿನ್ನೆಲೆ, ಪುಟ ಸಂಖ್ಯೆ-130, 131

१३. ಭಾರತದ ದೇವಾಲಯ ನೆಲೆ : ಹಿನ್ನೆಲೆ, ಪುಟ ಸಂಖ್ಯೆ-133



चत्रसेन, ब्रह्मदेव, रत्नकीर्ति इत्यादयः नैकाः आचार्यमुनिपण्डिताश्च "आराधनाकथाकोशः" इति ग्रन्थं व्यरचयन् १४ । जैनधर्मीयाः आराधनामण्डलानि नैमित्तिकपूजासुयोजयित्वा सन्दर्भानुसारेण व्रतादिकं स्वीकृत्य मण्डलाराधनां कुर्वन्ति । ईदृशानां मण्डलाराधनानां चित्राणि जैनदेवालयेषु, मठेषु च द्रष्टुं शक्यते । स्थूलरूपेण सूक्ष्मरूपिणः आत्मनः सिद्ध्यर्थं आराधनामण्डलानि मानवायसहायको भवति ।

जैनधर्मे आराधनामण्डलानि प्रतिपादयितुम् नैकानिशिलाशासनानि उपलभ्यन्ते । एतानि संशोधनाक्षेत्रे ऐतिहासिकधाराः । तथैव नैकाः प्रतिष्ठाग्रन्थान्, पूजाग्रन्थान् रचितवन्तः । जिनसेनकृता 'धर्मरत्नाकरः' (१०००शतमाने), वसुनन्देः 'प्रतिष्ठासार-सङ्ग्रहः', नेमिचन्द्र विरचित 'प्रतिष्ठातिलकम्' (सप्तमशतमानः), पं. आशाधरेण विरचिताः 'प्रतिष्ठासारोद्धारः' (त्रयोदशशतमानं), भट्टाकलङ्ककृत 'प्रतिष्ठाकल्पः' इत्यादि प्रतिष्ठाग्रन्थाः तथैव ८००शततमे वर्षे विरचितम् 'आराधनाकर्णाटटीका', चतुर्मुखकविना अपभ्रंशायां विरचितं 'पउमचरिय' (सप्तमेशतमाने), रत्नशेखरसूरिणा रचितं 'श्रीपालचरिते' (चतुर्दशशतमाने) इत्यादि ग्रन्थेषु काव्येषु च जैनाराधनामण्डलानां विषये विवृतम् । कार्कळप्रदेश विद्यमानस्य जैनदेवालयस्य मानस्तम्भे, मूडुबिदरे क्षेत्रे विद्यमानं साविरकम्बदबसदिमध्ये स्थितेषु स्तम्भेषु च मण्डलानां चित्राणि उद्धृतानि ।

तथैव पुरातनगुहमन्दिरेषु, जैनमठेषु च समवसरणमण्डलानां चित्राणि चित्रितानि । नानासमये नानास्थले चारित्रिक, राजनैतिकक्षेत्रेषु च सम्बद्धमण्डलानामाराधना अद्य पर्यन्तं प्रचलिता वर्तते । उत्तर भारत, मध्यभारत प्रदेशेषु मण्ड लाकारेण जिनदेवालयान् निर्मितवन्तः । उदाहरणतया हस्तिनापुरे आर्यिका ज्ञानमती कमलमन्दिरम्, सहस्रकूटमन्दिरं, त्रिलोकमन्दिरं, जम्बूद्वीपमन्दिरमित्यादि मन्दिराणि लोकस्य आकारे निर्मापितवती ।

---

१४. जिनरत्नकोश, हरिदामोदर वेलन्कर्, भण्डर्कर ओरियण्टल् रिसर्च् इन्स्टिट्यूट्, पूना-१९४४

अनुभयत्रोभयस्पर्शी प्रत्ययः संशयः , अनुभयस्वभावे वस्तुनि उभयान्तपरिमर्शनशीलं, ज्ञानं सर्वात्मना शेत इवात्म यस्मिन् सति स संशयः , यथा अन्धकारे दूरादूर्ध्वाकारवस्तूपलम्भात् साधकबाधकप्रमाणाभावे सति स्थाणुर्वा पुरुषो वेति प्रत्ययः। अनुभयत्रपदं उभयरूपे वस्तुनि उभयकोटिस्पर्शेऽपि संशयत्वनिराकरणाय- यथा अस्ति च नास्ति च घटः नित्यश्चानित्यश्चात्मा इति प्रमाणमीमासांयाम्। ततश्च त्रिकोटिकस्संशयोऽपि जैनग्रन्थेषु दृश्यते। उभयकोटिस्पृग् विज्ञानं संशय ६ इति योगसूत्रतत्त्ववैशारद्यां दृश्यते। सांख्यदर्शने विशिष्य लक्षणं न दृश्यते। पाणिनीयदर्शने विरुद्धानेककोटिकं ज्ञानं संशय ७ इति महाभाष्योद्योत एवं संशयमापन्न ९ इति पाणिनिसूत्राच्च ज्ञायते। विरुद्धकोटिकमिति निर्देशात् उभयकोटिकमित्यत्रैव नाग्रहः परं त्रिकोटिकमपि संशयः व्याकरणदर्शने स्वीक्रियत इति त्रिसंशया इति शब्दे त्रिषु संशया व्यधिकरणबहुब्रीहिश्चेति९ महाभाष्यं नवेति विभाषा चात्र प्रमाणम्।

नानाकोट्यवलम्बी संविदाभासस्संशय इति प्रमाण लक्षणे। स चाज्ञानसमुत्थतथाविधप्रत्ययाभासफलम्। तत्रोदाहरणं - यथाधिगते पदार्थे तत्त्वापरिज्ञानात् स्थाणुर्वा पुरुषो वेति तत्रैव। प्राभाकरमीमांसादर्शने तु संशयो न एकं विज्ञानम्। किन्तु द्वे एते स्थाणुत्वपुरुषत्वगोचरे प्रमृष्टतत्तांशे परस्परविनिर्मुक्ते पुरःस्थितोर्ध्ववस्तुदर्शनाज् जायमाने स्मृतिरूपे। एतत्सर्वं यथार्थमेव। परस्परविनिर्मुक्तयोस्तयोर्विशेषयोः पुरःस्थिते धर्मिणि एकस्यापि व्यवस्था नास्तिति व्यवहारं प्रवर्तयिता प्रवर्तयितुमशक्नुवन् संशेत इति तत्र संशयव्यवहार इत्युक्तम् प्रकरणपञ्चिका तन्त्ररहस्ये च। डोलायामाना प्रतीतिस्संशय इति षड्दर्शनसमुच्चय वृत्तौ। अनवधालणज्ञानं संशय इति लक्षणं न्यायसारे प्रतिपादितम्। न्यायभूषणञ्च ज्ञानद्वयवादिनः संशयमनङ्गीकुर्वाणान् मीमांसकान् खण्डयति।

युक्तिरत्र प्रदर्शिता - प्रत्यक्षपरिदृष्टं गोमयमभिलक्ष्य कश्चनोन्मत्तः प्रलपति नेदं गोमयम् विकारप्रत्ययान्तगोशब्दवाच्यत्वात् पायसवत्।

-----------------------------------------------

६. योगसूत्रतत्त्ववैशारदी, १. ३०

७. महाभाष्योद्योत, १-३-१-९

८. पाणिनिसूत्रम्, ५-१-७३

९. महाभाष्यम्, १-१-४४



३. चक्रवर्तिभिः जगतः इच्छां यया दानेन पूर्यते तस्याः पूजायाः नाम ‘कल्पद्रुमपूजा’।

४. महामहामाण्डलीकैः क्रियमाणा पूजा ‘महापूजा’।

५. स्वशक्त्या स्वगृहे जिनगृहे च अष्टविधद्रव्यैः क्रियमाणपूजा ‘अष्टविधार्चनपूजा’।

भारते जैनधर्मीयाः मण्डलं विरच्य तीर्थङ्कराणामाराधनां कुर्वन्ति । मण्डलाराधने नैकाः प्रकाराः सन्ति । सन्दर्भानुसारेण मण्डलं विरच्य मध्ये तीर्थङ्कराणां बिम्बं संस्थाप्य समवसरणमिति मनसि निधाय मोक्षमार्गे गमनार्थं स्वात्मानं स्वतन्त्रयितुं च तीर्थङ्कराणां गुणगानं कुर्वन्ति, तादृशगुणान् साधकः अपि प्राप्तुं प्रयतति । अतः मण्डलाराधानाक्रमः प्रसिद्धः वर्तते ।

**विदुषी तेजस्विनी डि.**
शोधच्छात्रा
कर्नाटकसंस्कृतविश्वविद्यालयः
चामराजपेटे,
बेङ्गळूरु-560018, कर्नाटक
**Mobil : 9845614502**
**Email : jangdatejaswini71@yahoo.com**

( **विदुषी तेजस्विनी डि** . महाभागा बेङ्गळूरुमहानगरे विराजमानस्य कर्नाटकसंस्कृतविश्वविद्यालयस्य प्राध्यापकानां **डा. वेङ्कटरमण** महोदयानां मार्गदर्शनेन **“जैनाराधनमण्डालानाम् एकमध्ययनम्”** इत्यस्मिन् विषये संशोधन कर्मणि रता ।)

******

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# संशयः

डा. भास्करभट्टः जोशि (बेङ्गळूरु)*

कणभक्षेण मुनिना वैशेषिकसूत्रेषु बुद्धिनिरूपणप्रस्तावे "आत्मा ज्ञानसवायी"१त्ययमंश अभ्यधायि ।

सर्वानुभवसिद्धं हि ज्ञानं देहेन्द्रियादिसङ्घातव्यतिरिक्तद्रव्यस्यात्मनो विशेषगुणः । एतस्य लक्षणं न्यायसूत्रे "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" २इति न्यरूपि ।

बुद्ध्यादयः अष्ट आत्मगुणाः । सुखादीनां सर्वेषाम् उत्तरेषां कारणीभूता इयं बुद्धिः । ज्ञानमिति अस्य नामान्तरम् । इदं च ज्ञानम् द्विविधम् । स्मरणात्मकम् अनुभवात्मकं चेति । अनुभवः पुनः द्वेधा विभज्यते । यथार्थः , अयथार्थश्च । तद्वति तत्प्रकारकानुभवः यथार्थः । यथावस्थितमेव अर्थं विषयीकुर्वन्ननुभवः यथार्थ इत्यर्थः । द्वितीयः अनुभवः तदभाववती" तत्प्रकारकानुभव अयथार्थः ।

अयथार्थानुभवः नाम भ्रमः । सः त्रिविधः । संशयः तर्क ,विपर्ययः ,-भेदात् । तेषु प्रथमः संशयः । संशये कश्चन धर्मी भवति । दौ विरुद्धौ धर्मौ भवतः । तयोः कोटि इति नाम भवति। यथा - दूरात् स्तम्भं दृष्ट्वा 'अयं पुरुषो वा स्थाणुर्वा' इति सन्देहः जायते । प्रकृते धर्मी भवति अयमिति पुरोवृत्ति स्तम्भः । तस्मिन् धर्मद्वयं भासते । स्थाणुत्वं पुरुषत्वं च इति । एतौ उभौ धर्मौ विरुद्धौ भवतः । यत्र पुरुषत्वं भवति तत्र स्थाणुत्वं न भवति । अतः तौ धर्मौ एकत्र न भवत इति विरुद्धौ । तादृशौ विरुद्धौ धर्मौ पुरःस्थिते वस्तुनि भासते । अत इदं ज्ञानं संशयः ।

## संशयस्य सामान्यकारणानि

उभय साधारणधर्मज्ञानम् , असाधारणधर्मज्ञानम्, विप्रतिपत्तिजन्य-कोटिद्वयज्ञानम्, उपलब्धिः अनुपलब्धिः , सामान्यप्रत्यक्षम्, विशेषाप्रत्यक्षम्, विशेषस्मृतिः कोटिद्वयस्मरणम्, धर्मिज्ञानञ्च संशयस्य सामान्यकारणानि भवन्ति ।

---

१. वै. द. सूत्रम्-३.१.२

२. न्यायदर्शनम्- १.१.१५, पृ. सं. २१३



## विशेषसंशयप्रकाराः

स्थाणुपुरुषसाधारणम् ऊर्ध्वतालक्षणं धर्म पुरोवर्तिनि पश्यतः स्थाणुपुरुषौ स्मृत्वा स्थाणुत्वनिर्णायकं वक्रत्वादिकं पुरुषनिर्णायकं शिरः-पाण्यादिकं अपश्यतः पुरुषस्य मनसि डोलायमानं स्थाणुर्वा पुरुषो वेति ज्ञानं समुत्पन्नं भवति । एवं शब्दे आकाशविशेषगुणत्वम् असाधारणधर्मम् उपलभ्मानस्य निर्णायकमजानतः पुरुषस्य किमयं शब्द आकाशवत् नित्य उत अनित्य इति संशयो भवति । तथा इन्द्रियाणि भौतिकानीति वैशेषिकाणाम् , अभौतिकानीति संख्यानाञ्च विप्रतिपन्नं सिद्धन्तं जानतः निश्चायकमपश्यतः पुरुषस्य संशयो भवति इन्द्रियाणि भौतिकानि उत अभौ विकानीति । तथा तस्मिन् वृक्षे पिशाचोऽस्तीति वार्तां श्रुत्वा वृक्षसमीपं गतस्य पुरुषस्य यदा पिशाचो नोपलभ्यते तदा निर्णायकाभावात् विद्यमान एव पिशाचोऽन्तर्हितो नोपलभ्यते उत पिशाच अविद्यमान एवेति संशयो भवति ।

## न्यायेतरदर्शनेषु संशयस्य निरूपणम्

निर्णायकाभावसहकृतसाधारणधर्मवद्धर्मिज्ञानं संशयकारणमिति प्रकारान्तरेण मध्वमतानुयायिनो वदन्ति । ततश्च रज्जौ इयं रज्जुरिति ज्ञानं प्रमा , अयं सर्प इति ज्ञानम् विपर्ययः , रज्जुर्वा सर्पो वेति ज्ञानं संशयोः । उक्तञ्चेदं संशय निरूपणावसरे-

सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशयः ।
दृष्टञ्च दृष्टवत् यथादृष्टमयथादृष्टञ्चोभयथादृष्टत्वात् विद्याविद्यातश्चेति ॥३

प्रमाणसमुच्चयादि ग्रन्थेभ्यः बौद्धानां संशयलक्षणम् अनूदितं दृश्यते । साधकबाधकप्रमाणाभावात् अनवस्थितानेककोटिकसंस्पर्शि ज्ञानं संशयः ४ यथा स्थाणुर्वा पुरुषो वेति प्रमाणनयतत्त्वालोके, अस्वसंविदितगृहीतार्थदर्शनसंशयादयः प्रमाणाभासा इति परीक्षामुखसूत्रे उभयकोटिसंस्पर्शी स्थाणुर्वा पुरुषो वेति परामर्शः संशय५ इति प्रमेयरत्नमालायाञ्च जैनाः ।

---

३. रा. वा.- १-६-९-३६-११ (राजवार्तिकम्)

४. प्रमाणनयतत्त्वालोकः ।

५. प्रमेयरत्नमाला ।

अनेकाकारानवगाहिनि अयं घट इति ज्ञाने अतिव्यातिवारणाय अनेकाकारानवगाहिनिति पदम् । घटपटस्तम्भाः , स्थाणुपुरुषौ, इत्यादौ समूहालम्बनज्ञाने अतिव्यातिवारणाय एकस्मिन् धर्मिणीति पदम् । वृक्षः शिंशुपा , घटो द्रव्यम् , इत्यादौ वृक्षधर्मिकवृक्षत्व -शिंशुपात्वाद्यनेकाकारावगाहिनि ज्ञाने अतिव्यातिवारणाय विरुद्धेति पदम् । इदं रजतमिति विरुद्धानेकाकार-वगाहिज्ञानत्वस्य सत्वेऽपि विरोधत्वस्याभासमानत्वाभावात् नातिव्याप्तिः । विरुद्धोभयारोपसामग्री द्वयसमाजादुभयारोप एक एव भवति स एव संशय इति चिन्तामणौ प्रामाण्यज्ञप्तिवादे । अनवधारणं ज्ञानं संशय इति सप्तपदार्थाम् । अनवधारणात्मकः प्रत्ययः, अवधारणावर्जितं ज्ञानं संशय इति तार्किकरक्षायाम् । परन्तु अवधारणत्वं संशयभिन्नत्वम्, तथा च अवधारणभिन्नं ज्ञानं संशयः संशयः भिन्नं च ज्ञानमवधारणमिति अन्योन्याश्रयापत्तिः ।

अवच्छेद्य-अवच्छेदकभावापन्नविषयतावत्वं संशयत्वमिति गादाधरीये सत्प्रतिपक्षे,१७ धर्मितावच्छेदकावच्छेदेन अन्यतरकोट्यवगाहिज्ञानं संशय इति नीलकण्ठ्याम् स्वीयैककोटिकप्रकारतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धक -तावच्छेदकीभूतापरकोटिकप्रकारताशालिज्ञानत्वं संशयत्वमिति संशयनिरूपणावसरे दिनकर्याञ्च लक्षणानि दृश्यन्ते । एकस्मिन् धर्मिणि प्रतियोगितदभाव-विषयकं ज्ञानम् , संस्कारानाधायकं ज्ञानम् , निश्चयभिन्नं ज्ञानं संशय इति १८ लक्षणानि लक्षणराजौ दृश्यन्ते । साधर्म्यात् विशेषोपलिप्सोर्विमर्शस्संशय इति १९ न्यायवार्त्तिके ।

न्यायकन्दल्यान्तु अनवस्थितरुपेणोभयविशेषसंस्पर्शी विमर्शः ,२० विरुद्धार्थावमर्शज्ञानविशेषो वा संशय इति लक्षणमुपवर्णितम् । अव्यवस्थित-नानावाचकवाच्यत्वप्रतिभासे तु संशयः , परस्परविरुद्धार्थावमर्शस्संशयः, इति लक्षणं विशेषव्यवहारपरिपन्थित्वात् अस्य अविद्यात्वमिति न्यायलीलावत्याम् , अनवधारणज्ञानं संशय इति सप्तपदार्थ्याञ्च लक्षणानि दृश्यन्ते ।

----------------------------------------

१७. सत्प्रतिपक्षः ।
१८. लक्षणराजी ।
१९. न्यायवार्तिकम्, १-१-२३
२०. न्यायकन्दली ।



तद्वत्सार्वजनीनानुभवसमर्थितं संशयं निराकुर्वन् गोमयपायसीयन्यायेन उपेक्षणीयः । सन्देहः खलु सर्वप्राणिनां अनवधारणप्रत्ययात्मकत्वेन स्वात्मसंवेद्यः , स धर्मिविषयो वा भवतु धर्मविषयो वा , एकं ज्ञानं वा भवतु अनेकं वा , तात्त्विकातात्त्विकार्थविषयो वा, किमेभिर्विकल्पैः, अस्य बालाग्रमपि खण्डयितुं न शक्यत इति ।

एकमेवान्तःकरणं वृत्तिभेदात् मनोबुद्धिरहङ्कारश्चित्तमिति तेषां विषयाश्च "संशय-निश्चयो गर्वस्स्मरण "मित्यङ्गीकुर्वाणानां अद्वैतिनां मते जिज्ञासाजनकान्तःकरणवृत्तित्वं संशयत्वम्, उभयकोटिस्पृग् ज्ञानम्, यथा स्थाणुर्वा पुरुषो वेति , नैकधर्मिकविरुद्ध - भावाभावप्रकारकज्ञानत्वमिति संशयलक्षणानि वेदान्तापरिभाषा-शिखामणि- भगवत्यादिषु विद्यन्ते । परन्तु अद्वैतवेदान्तदर्शनीये तत्त्वप्रदीपिकाख्ये चित्सुखीये द्वितीयपरिच्छेदे – अनवधारणज्ञानं संशयः , विरुद्धोभयकोटिसंस्पर्शि ज्ञानं संशयः, अनिर्धारितोभयकोटि संस्पर्शि ज्ञानं संशयः, जिज्ञासाजनकं मिथ्याज्ञानं संशयः , विपर्ययेतरमिथ्याज्ञानं संशयः , संशयत्वजातियोगि संशयः इति लक्षणान्तराण्यनूद्य-

अनिरुक्ते रवधृतेरतिव्याप्तेर्द्वयोरपि ।
अव्याप्तेर्विभ्रमाभेदाज्जातिसाङ्कर्यसक्तितः ॥

इत्यनया प्रसिद्धया कारिकया सविस्तरं च तत्कालपर्यन्तानि यानि संशयलक्षणानि तानि प्रदूष्य संशयः सर्वथापि न निरूपणपथमवतरतीति संशयवादः खण्डितः । एवं खण्डनखण्डखाद्येऽपि चतुर्थपरिच्छेदे संशयवादः खण्डितः ।

एवं विशिष्टाद्वैतदर्शने पुरः किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसायज्ञानं यथार्थमेवेति तेषां सिद्धान्तात् संशयस्य प्रत्यक्षेऽन्तर्भावो वर्णितः । तेषामयं सिद्धान्तः- स्थाणुर्वा पुरुषो वा इत्यत्र पुतोवर्तिवस्तुविज्ञानं स्थाणुत्वपुरुषत्व विषयकं ज्ञानं चैकमेवेति वक्तुं न शक्यते । पुरोवर्तिवस्तुनः स्थाणुत्वविशिष्टतया भाने पुरुषत्वविशिष्टतया भानासम्भवात् । एवं पुरुषत्व विशिष्टतया भाने स्थाणुत्वविशिष्टतया भानासम्भवात् । तथा च तत्र ज्ञानद्वयमवश्यं वाच्यम् । तत्र चोर्ध्वद्रव्यभानमनुभवः । स्थाणुत्वपुरुषभानन्तु स्मरणम्। तत्रापि पूर्वानुभवः ।

तेन कोटिद्वयस्मृतिस्थाणुपुरुष संस्कारोद्बोधे पश्चात् कोटिद्वयस्मरणं जायते। यथार्थत्वन्तु द्वयोरप्यनयोर्निर्विवादमेवादमेवेति वदन्ति। यतीन्द्रमतदीपिकाख्ये ग्रन्थे स्पष्टतया निरूपयामास।

अनवधारणज्ञानं, एकस्मिन् धर्मिणि भासमानविरुद्धानेकाकारावगाहीज्ञानं वा संशयः - यथा स्थाणुर्वा पुरुषो वेति द्वैतदर्शने प्रमाणपद्धति - प्रमाणसंग्रह- प्रमाणचन्द्रिकादौ दृश्यते। एवं चैतन्यसिद्धान्ते भ्रमः प्रमादः विप्रलिप्सा करणापाटवञ्चेति पुरुषदोषाश्चत्वारः तेषु भ्रमः संशयविपर्यासभेदेन द्विधा। तत्र संशयः किंस्विन्नरो वा स्थाणुर्वा इत्यादिबुद्धिरित्युक्तम्। (श्रीतत्त्वसन्दर्भव्याख्या)

संशयोऽथविपर्यासः निश्चयः स्मृतिरेव च।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्॥

इति भागवतात् संशयादिज्ञानानां बुद्धिवृत्तित्वं स्वीकृत्य एकस्मिन् धर्मिणि विरुद्धानेकप्रकारकज्ञानं संशय इति लक्षणमुक्तं वल्लभदर्शने प्रस्थानरत्नाकरप्रमाणपरिज्छेदे। शैवदर्शनीयशैवपरिभाषायां द्वयावलम्बा संशयो बुद्धिस्समानाकारदर्शनादिति पौष्करागमं (प्रथमपरिच्छेदे, श्लोकं 5) प्रमाणीकृत्य साधारण धर्मदर्शनात् कोटिद्वयावलम्बिनी बुद्धिस्संशयः यथा - स्थाणुर्वा पुरुषो वेत्युक्तम्।

## न्याय-वैशेषिकदर्शनम्

"समानानेकधर्मोपपत्तेः विप्रतिपत्तेः इति वैशेषिकसूत्रेषु निरूपयामास। उपलब्ध्यनुपलब्ध्यवस्थातश्च संशयः १० इति न्यायसूत्रेषु च संशय निरूपितः। साधर्म्यदर्शनात् विशेषोपलिप्सोर्विमर्शस्संशय इति बौद्धाः। (न्यायतार्तिक 1-1-23)

यद्यपि सन्निकर्षजन्यत्वात् संशयोऽपि प्रत्यक्षमेव तथापि अनुपलब्ध अनिर्णीते वा न न्यायः प्रवर्तते किन्तु सन्दिग्धे इति न्यायात् संशयः न्यायपूर्वाङ्गं भूत्वा यथार्थज्ञानोत्पत्तौ सहकारी भवतीति संशयः ज्ञानप्रयोजन इति संशयप्रयोजनं वक्तव्यम्।

--------------------------------------------

१०. न्यायसूत्रम्, १-१-२३



## संशयलक्षणानि

समानानेकधर्मोपपत्तेः विप्रतिपत्तेः उपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शस्संशय इति ११ न्यायसूत्रे, एवं समानधर्माधिगमात् समानधर्मोपपत्तेः विशेषस्मृत्यपेक्षो विमर्शस्संशय इति न्यायवार्तिके। परन्तु विमर्शस्संशय इत्येव लक्षणम्। अन्यत्सर्वं हेतुकथनमेव चोक्तम्। अत एव किंस्विदिति वस्तुविमर्शमात्रं अनवधारण ज्ञानं संशय इति , वस्तुस्वरुपानवधारणज्ञानं संशय इति १२ लक्षणान्तरमपि न्यायभाष्य वार्तिकयोर्विस्तृतम्। तथा च सामानधर्मादिभ्य उत्पन्नो विषयस्य विशेषं यो नावधारयति स संशय इति वक्तव्यम्। सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशय इति १३ वैशेषिकसूत्रम्। प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनात् उभयविशेषानुस्मरणात् अधर्माच्च किंस्विदित्युभयावलम्बी विमर्शः संशय इति प्रशस्तपादभाष्ये।

एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशय १४ इति वैशेषिकोपस्कारे। एकस्मिन् धर्मिणि विरूद्धनानाधर्मवैशिष्ट्यज्ञानम् , पकधर्मावच्छन्नविशेष्यकभावाभावप्रकारकं ज्ञानं वा संशयः , यथा पर्वतो वह्निमान् वा नवेति लक्षणराजौ विद्यते। स संशयो मतिर्या स्यात् एकत्राभावाभावायोरिति१५ कारिकावल्याम्, एकधर्मिकविरूद्धभावाभावप्रकारकं ज्ञानं संशय इति विश्वनाथीयगौतमसूत्रवृत्तौ मुक्तावल्याम् तर्कसंग्रहे च दृश्यते। एवं एकस्मिन् धर्मिणि विरूद्धनानार्थावमर्शित्वम्, एकस्मिन् धर्मिणि भासमानविरुद्धनानार्थावमर्शित्वम्,१६ संशयत्वमिति लक्षणानि लक्षणराजौ निर्दिष्टानि। ततश्च एकस्मिन् धर्मिणि भासमानविरुद्धानेकाकारावगाहिज्ञानत्वं संशयत्वमिति पर्यवसितम्। एकस्मिन् पुरोवर्तिनि पदार्थे भासमानविरुद्धानेकाकारौ स्थाणुत्वपुरुषत्वे, तदवगहि ज्ञानं अयं स्थाणुर्वा पुरुषो वा इत्याकारकं ज्ञानम् , तस्मिन् ज्ञानत्वस्य सत्वाल्लक्षणसमन्वयः।

------------------------------------------------

११. न्यायसूत्रम्, १-१-२३
१२. न्यायभाष्यम्, १-१-२३
१३. वैशेषिकसूत्रम्, २-२-९७
१४. वैशेषिकोपस्कारः।
१५. कारिकावली।
१६. लक्षणराजी।

अयथार्थानुभवेषु अन्यतमः संशयः निरूपितः । भिन्न भिन्न दर्शनेषु यथा संशयः प्रतिपादितः सः विषयः अत्र सङ्गृहीतः । तत्तत् दर्शनेषु उल्लिखितानि संशयस्य लक्षणानि, उदाहरणानि च चर्चितानि ।

**डा. भास्कर भट्टः जोशि**
सहायकप्राध्यापकः,
न्यायविभागः
कर्नाटकसंस्कृतविश्वविद्यालयः,
बेङ्गलूरु-560018, कर्नाटक
Mobil : **9742269403**
E-mail **: joshi.bhat@gmail.com**

*******

## EDITORIAL ADVISORY BOARD

| | |
|---|---|
| **Dr. Gopalkrishna Hegde,**<br>Jyotisha Shastra & Dharma Shastra Vidwan<br>Ph: 9741847399 | **Editor in Chief :**<br>Director, Veda Samskrita Academy (Reg.)<br># 1347, Kalkod Road, HEGDE- 581330<br>Kumta, Uttara Kannada, Karnataka |

## BOARD OF EXPERTS AND REFEREES

| | |
|---|---|
| **Prof. Viroopaksha V. Jaddipal, Ujjain**<br>Ph: 9440002813 | **Secretary**<br>Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Vedavidya Marg, Chintaman Ganesh,<br>P.O: Jawasiya-456006, Ujjain, (M. P.) |
| **Prof. A. Sripada Bhat, Tirupati**<br>Ph: 9490586341 | **Professor**<br>Department of Jyotisha<br>National Sanskrit University<br>TIRUPATI-517507 (A.P.) |
| **Prof. N. Laxminarayana Bhatta, Udupi**<br>Ph: 9481750414 | **Principal**<br>S. M. S. P. Samskrita College,<br>UDUPI-576101, Karnataka |
| **Prof. Subray V. Bhat, Shringeri**<br>Ph: 9449160458 | **Director**<br>National Sanskrit University<br>Rajiv Gandhi Campus<br>Mense, Shringeri-577139<br>Chikkamagaluru, Karnataka |
| **Prof. Ramachandra N. Bhat, Sirsi**<br>Ph: 9480019152 | **Rtd. Principal**<br>"SURABHI" # : 6, I st cross, Mahalaxmi Layout Post : N.M.Yard- 581402, Hubli Road, Sirsi, Uttara Kannada, Karnataka |
| **Prof. Shankar Nagesha Bhat, Baligadde**<br>Ph: 9480954301 | **Professor**<br>Dept. of Advaita Vedanta Shastra, Samskrita College, Swarnavalli Matha,Mathadevala-581336<br>Sirsi, Uttara kannada, Karnataka |





| | |
|---|---|
| **Prof. Venkataramana Hegde, Mysore**<br>Ph: 9480476144 | **Professor**<br>Dept. of Dharma Shastra<br>Govt, Maharaja Samskrita College<br>Mysore- 570024, Karnataka |
| **Dr. Shridhar Bhat, Ainkai**<br>Ph. : 9448933957 | **Professor**<br>Dept. of Advaita Vedanta Shastra<br>Govt, Maharaja Samskrita College<br>Mysore- 570024, Karnataka |
| **Dr. U. G. Shastri, Hegde**<br>Ph: 9449992160 | **Rtd. Principal**<br>(A.V. Baliga College, Kumta)<br>"Manasa" Pancharabena, Hegde - 581330,<br>Kumta, Uttara Kannada, Karnataka |
| **Dr. G. L. Hegde, Manaki, Kumta**<br>Ph: 9448441190 | **Rtd. Professor**<br>(Kannada Dept., A V Baliga College)<br>President,<br>Yakshagana Adhyayan Kendra, Kumta<br>& Research Guide,<br>Kannada Vishwa Vidyalaya, Hampi<br>"Amrutavarshini" Manaki,<br>Kumta-581343<br>Uttarakannada, Karnataka |
| **Dr. Narayan Pujar Tirupati**<br>Ph. : 9490077161 | **Associate Professor**<br>Dept. of Dvaita Vedanta<br>National Sanskrit University<br>Tirupati-517507, Andhra Pradesh |
| **Dr. Nagapati Bhat,** Emmegundi Subrahmnya, Kavalakki | **Principal**<br>SRBS Samskrita College<br>Subrahmnya, Surakatte-581334<br>Hannavara, Uttarakannada<br>Karnataka |


******